191
B.D

शारदासंस्कृतग्रन्थ

## निवेदनम् ।

भारविः

कतमोदेशः, कतमद्वा विदितसकलवाङ्मयः
इदमवनीमण्डलं
वास

गौरीनाथ
8/8/23
191
B.D

# श्रीमत्कविशिरोमणिभारविप्रणीतं किरातार्जुनीयम् ।

टीकाद्वयोपेतम् ।

गौरीनाथपाठक ।

5.5

# पाञ्चजन्य का अनुनाद

191
B.17

# निवेदनम् ।

भारविः

[illegible] सर्गत्रयात्मकम्

महामहोपाध्यायकोलाचलमल्लिनाथसूरिकृतया घण्टापथसमाख्यया पाठकोपाभिधगौरीनाथसूरिकृतया सुबोधिन्याख्ययाव्याख्यया च समुल्लसितम् ।

काशीस्थविशालाक्षपाठशालाप्रधानाध्यापकेन विदुषा
श्रीश्यामाचरणकविरत्नमहोदयेन
संस्कृतम् ।

तच्च

काश्याम्

मास्टरखेलाड़ीलालगुप्तमहाशयेन तारायन्त्रालये
श्रीरामेश्वरपाठकद्वारा मुद्रयित्वा
प्राकाश्यं नीतम् ।

खिस्ताब्दाः १९२३.

वनवासिना युधिष्ठिरेण नियुक्तस्य व[illegible]य दुर्य्योधनचरितं ज्ञात्वा द्वैतवने प्रत्यागमनम् ॥ १ ॥
दुर्य्योधनचरितकथनोपक्रमे तस्यात्मभावप्रकाशनम् । २—[illegible]
दुर्य्योधनचरितवर्णनम् । ७—२४
युधिष्ठिरं प्रति वनेचरस्य इतिकर्त्तव्यतोपदेशः ॥ २५ ॥
गते वनेचरे युधिष्ठिरस्य भ्रातॄणां द्रौपद्याश्च समीपे सर्ववृत्तान्त-कथनम् ॥ २६ ॥
युधिष्ठिरं प्रति द्रौपद्या उपालम्भः । २७—४८

## द्वितीयसर्गे ।

युधिष्ठिरं प्रति भीमस्योक्तिः । १—२४
भीमं प्रति युधिष्ठिरस्योक्तिः । २५—५३
वेदव्यासागमनम् । ५४—५९

## तृतीयसर्गे ।

वेदव्यासं प्रति युधिष्ठिरस्योक्तिः । १—९
युधिष्ठिरं प्रति व्यासस्योक्तिः । १०—२३
व्याससकाशादर्जुनस्य विद्याग्रहणम् । २४—२६
अर्जुनं प्रति व्यासस्य तपस्यार्थ आदेशः । २७—२९
व्यासस्यान्तर्धानं यक्षस्य चाविर्भावः । ३०—३१
अर्जुनप्रयाणे युधिष्ठिरादीनां शोकः । ३२—३७
अर्जुनं प्रति द्रौपद्या वचनम् । ३८—५४
अर्जुनस्य प्रयाणम् । ५५—६०

191
B.17

# निवेदनम् ।

## भारविः

कोऽयं महापुरुषः, कतमोदेशः, कतमद्वा[illegible] विदितसकलज्ञना[illegible] लङ्कृतं, कदा वायमिदमवनीमण्डलं मण्डयामास, कस्य वा राज्ञः सभैनेन विभूषिता, कथं वास्य प्रवृत्तिरस्यां महाकाव्यरचनायाङ्कथञ्च व्यावहारिकं ज्ञानमन्याऽपि काचिदस्ति न वास्य कृतिप्रवृत्तिरित्यादिषु विषयेषु किरातार्जुनीयमनुदिनमधीयमानानां निरतिशयं कौतूहलमुत्पद्यत एवेति मन्यामहे ।

## नह्यमूला जनश्रुतिः ।

अत्रेदृशी जनश्रुतिः श्रूयते यत् प्रतिभारविर्भारविर्धारानगरीवास्तव्य आसीत् । अस्य जनकः श्रीधरः, माता च सुशीलेति । असौ भृगुकच्छवासिनश्चन्द्रकीर्त्तेर्दुहितरं रसिकानाम्नीमुपयेमे । अयं स्वजनकापेक्षया शास्त्रेषु सुधीसमाजेषु चाधिकं पाण्डित्यख्यातमवाप । स्वां ख्यातिं विद्वत्तां च विजानन्नहमहमिकया परिपूर्णोऽयं पात्राऽवमाननानिदानभूतमहङ्कारमुन्मूलयितुं गृहे सभासु च [illegible]सनावचनमवोचि । सोऽपि पितुरीदृशं दैनन्दिनं व्यवहारं सोढुमशक्नुवन् पितृहत्यां प्रतिजज्ञे । एकदा रात्रौ प्रच्छन्नो भूत्वा [illegible]परितनगृहकोणे समासीनो भारविः पितुः शिरस उपरि पातयितुमेकां विशालां शिलामादाय तस्य निर्गमनकालं प्रतीक्षमाणश्चिरं तूष्णीं तस्थौ । ततो निशीथसमये पितुर्मातुश्च परस्परं विस्रब्धमालापमश्रौषीत् ।

सुशीलोवाच—आर्य्यपुत्र ! भवतः सार्वकालिकं तिरस्कारमसहमानो भारविर्द्वित्राण्यहान्यनशनेनैवातिवाहयति औदासीन्यमवलम्बते च । भवतश्च नायं प्रशस्यो व्यवहारः । सुतश्च ते पण्डित इति ।

श्रीधरस्तु—नात्र सन्देहावसरो यद्भारविर्न केवलं पण्डितः किन्तु महापण्डित एव । अभिलषामि च यदेनमेकवाक्येन सर्व एव

विपश्चितोऽभिनन्देयुरिति । परमहङ्कारितया, उन्नतिशिखरं समारूढोऽपि जनोऽधःपातमनुभवत्येवेति मया तन्निरसनायैव केवलं [illegible]व्यते। कः खलु मूढो निजसुतस्याभ्युदयं नाभिलषतीति [illegible]तरं ददौ ।

[illegible]त्सल्यमात्मनश्च तथाविधं गर्हितमाचरणमालोच्य [illegible]तशयदुःखसन्तप्तोऽभवत् । प्रभाते पितुरन्तिकमागत्य पितृहत्याभिलाषस्य प्रायश्चित्तमपृच्छत् । पित्रा च षण्मासान् श्वशुरगृहवासोऽवादि। अनन्तरं भारविः सर्वमात्मचेष्टितमकथयत् । तदा पिताऽयमेव प्रायश्चित्तीत्यवधार्य्य तं ततो निवारयितुमैच्छत् । इदं प्रायश्चितं मूर्खाणां कृते, त्वं पण्डितः पश्चात्तापेनैव पापमुक्तो भविष्यसीत्यादिकमनल्पमपि जल्पनमनाकर्ण्यैव भारविः श्वशुरसदनमगमत् । तस्य पत्नी रसिका तदा तत्रैवासीत् । जामातुरागमनेन श्वशुरादयः सर्वे सुप्रसन्ना बभूवुः । पञ्चषदिवसार्थमागतोऽयमित्यनुमाय तैस्तस्य महान् समादरोऽकारि । परं तस्य षण्मासवासमाकर्ण्य आत्मनश्च दारिद्र्यं पर्य्यालोच्य जामातरं गोचारणादि कर्म्मणि नियोज्य रसिका विहाय सर्वे देशान्तरमगमन् । स च प्रत्यहं गोचारणादि कार्य्यं सम्पादयन्नासीत् । वने यावदेकतो गावश्चरन्ति तावदयं तरुतल आसीन आत्मविनोदनार्थं किरातार्जुनीयं काव्यं रचयितुं प्रवृत्तः । प्रत्यहं रचितान् श्लोकान् कण्टकेन वृक्षपर्णेष्वङ्कयित्वा एकत्रास्थापयत् ।

एकदा तत्पत्न्या रसिकया व्ययार्थमर्थे याचिते भारविस्तद्दिनरचितमर्द्धश्लोकं पत्राङ्कितं तस्यै प्रायच्छत् । तया च तदादाय वर्द्धमाननाम्नो वणिजः पत्न्याः समीपं गत्वा विक्रीय कियन्तमर्थमलम्भि । वर्द्धमानपत्न्याऽपि अर्धश्लोकाङ्कितं तत् पत्रं शयनीयशिरःप्रदेशे नागदन्तकेऽस्थापि । तदर्थं पतिः किंचिन्नावादि । वर्द्धमानस्तु संजातगर्भां पत्नीमजानन् तामेकाकिनीं गृहेऽवस्थाप्य वाणिज्यार्थं देशान्तरमयासीत् । यथासमयं सा सुतमेकमसूत । वर्धमानोऽपि पञ्चदशवत्सरानन्तरं गृहं प्रत्याजगाम । अन्तःपुरं प्रविश्यैवैकशय्यायां पुरुषेणैकेन सह निद्रितां पत्नीं वीक्ष्य तां व्यभिचारिणीं निश्चित्य सद्यो रोषकषायितनयनः सन् हन्तु-

मसिमुदयच्छत्। तस्मिन्नसौ नागदन्तके लग्ने तत् पत्रं शय्योपरि-न्यपतत्। वणिक् तद् गृहीत्वा तत्राङ्कितं "सहसा विदधीत न क्रियामविवेकः परमापदां पद" मिति अर्धश्लोकं वाचयित्वा हनना-न्निवृत्य पत्नीं प्रावोधयत्। सा चोत्थाय पतिमुद्वीक्ष्य परमानन्दिता सती सादरं प्रणनाम। पुत्रञ्च; 'वत्स उत्तिष्ठ! पिता ते समागतः, पश्य प्रणमे' त्यवोचत्। अथ वर्धमानो विदितसकलवृत्तान्तः तमर्द्धश्लोकमेव पत्नीपुत्रप्राणरक्षकं विदित्वा प्रशशंस। ततस्तस्य रचयितारं भारविं सादरमाकार्य्य सत्कृत्य च बहुधनं प्रददौ।

## भारवेर्देशः।

अस्य महाकवेः समयपरिज्ञानाय इतिहासादयः साधकतया कथञ्चिदुपलभ्यन्ते। परं देशस्तु सर्वथा अनिश्चित एव। केचित्तु

उरसि शूलभृतः प्रहिता मुहुः प्रतिहतिं ययुरर्जुनमुष्टयः।
भृशरया इव सह्यमहीभृतः पृथुनि रोधसि सिन्धुमहोर्म्मयः॥

इत्यत्र सह्याद्रिवर्णनमात्रेणैव दाक्षिणात्योऽयमिति प्रलपन्ति। केचिच्च हिमालयप्रान्तवर्त्तिन इन्द्रकीलप्रदेशस्य वर्णनात् इन्द्रकीलवासी तत्प्रान्तवासी वासाविति उद्घोषयन्ति। सर्वमेतन्न समीचीनतया प्रतिभाति। स्थानविशेषस्य वर्णनादेव यदि कविस्तत्तत्स्थानवासी मन्येत, तदा नानाभूधरभूप्रदेशादीनां वर्णयिता महाकविः कालि-दासोऽप्येक एव तत्तत्स्थानवासितया नाना भवेत्, तद्वद् एक एव भारविः सह्याद्रीन्द्रकीलयोर्वर्णनात् उभयप्रदेशवासी भवितुमर्हती-त्यद्भुतमुद्भावनम्।

## अत्र शिलालेखः।

दक्षिणदेशाधिपतेर्द्वितीयपुलिकेशीत्यपराभिधानसत्याश्रयमहा-राजाश्रयो रविकीर्त्तिनामा विद्वान् दक्षिणप्रान्तस्थबीजापुरमण्डला-न्तर्गतमलापहारिणीनदीतीरे विराजमाने आयहोलीनाम्नि ग्रामे सुविशालमेकं जैनमन्दिरमकारयत्। तत्र

"प्रशस्तेर्वसतेश्चापि जिनस्य त्रिजगद्गुरोः।
कर्त्ता कारयिता चापि रविकीर्त्तिः कृती स्वयम्।"

इति शिलालेखो लभ्यते।

अयं लेखः "इण्डियन् एण्टिक्वेरी" मासिकपुस्तके प्राचीनलेख-मालायां च मुद्रितः। अस्य लेखनकाल इत्थं वर्ण्यते।

त्रिंशत्सु त्रिसहस्रेषु भारतादाहवादितः।
सप्ताब्दशतयुक्तेषु गतेष्वब्देषु पञ्चसु॥ ( ३७३५ )
पञ्चाशत्सु कलौ काले षट्सु पञ्चाशतासु च।
समासु समतीतासु शकानामपि भूभुजाम्॥ (५५६शकाब्दाः)

अनया रीत्या खिस्तीयसप्तमशताब्द्या आरम्भकालोऽस्य लेखस्य कालोऽनुमीयते। तत्र च

येनायोजि नवेश्म स्थिरमर्थविधौ विवेकिना जिनवेश्म।

स विजयतां रविकीर्त्तिः कविताश्रितकालिदासभारविकीर्त्तिः। अयं श्लोकः समुपलभ्यते। अनेन चानुमीयते यदयं भारविः रविकीर्त्तितः प्राचीनश्चेति।

अपरञ्च काव्यमालायां मुद्रिते १३ शिलालेखे पृथ्वीकोङ्गणि-महाराजस्य दानपत्रे—

"किरातार्जुनीयपञ्चदशसर्गादिकोङ्कारो दुर्विनीतनामधेयः" इति वर्तते। अस्य दानपत्रस्य लेखनकालः ६९८ शकाब्दाः, खिस्ताब्दाश्च ७७६ इति। अत्रेदमवधीयते यदस्य राज्ञो वंशपरम्परायामविनीतः कश्चिदासीत् तत्पुत्रो दुर्विनीतोऽभूत्। दुर्विनीततः षष्ठः सप्तमो वा पृथ्वीकोङ्गणिरासीत्। यदि प्रतिपुरुषं न्यूनतयाऽपि पञ्चविंशतिवर्षाण्यपेक्ष्यन्ते तदाऽस्य लेखकालतः १५० वर्षेभ्यः पूर्वं दुर्विनीतसत्ताकालः समायाति अर्थात् खिस्ताब्दाः ६२६, शकाब्दाश्च ५४८ इति।

अयमेव रविकीर्त्तेरपि कालः। अयं च रविकीर्त्तिः स्वीये शिलालेखे भारविमुल्लिलेख। इत्थं दाक्षिणात्यानां विपश्चितां सप्तमशतकारम्भे भारविणा तत्प्रणीतेन किरातार्जुनीयेन साकं सम्यक् परिचय आसीदिति सुव्यक्तमेव।

याकोजी विदुषा "द्वीएना ओरियेण्टल जर्नल" नाम्नस्त्रैमासिकपुस्तकस्य द्वितीयभागे द्वितीयखण्डे "खिस्ताब्दीयषष्ठशतकमध्यभागात् कथमपि नार्वाचीनो माघकविः, भारविश्च ततोऽपि प्राचीन इति प्राकाश्यत।

एवं स्थिते ख्रिस्ताब्दीयषष्ठशतकस्यान्ते तथा सप्तमशतकस्य प्रारम्भ एव भारविर्भारतभूमावाविरभूदित्यत्र सर्वेषां प्रत्नतत्त्वविविदुषां विदुषामैकमत्यमस्ति ।

असौ कस्य राज्ञः सभासदासीदित्यत्र मया अन्यैरिव केवलं मौनमेवावलम्ब्यते । अस्य अस्यां महाकाव्यरचनायां काचिद्विशिष्टा प्रवृत्तिर्न प्रतीयते, कविकलाकौशलख्यापनाय काव्यरचनापाटवपरीक्षणायैव वा विरचितं भवेदित्यनुमीयते यतः राजशेखरः काव्यकारपरीक्षणावसरे कविगणगणनायां भारविमपि उल्लिलेख ।

तद्यथा—

राजशेखरः—

राजा कविः कविसमाजं विदधीत । राजनि कवौ सर्वो लोकः कवी स्यात् स काव्यपरीक्षायै सभां कारयेत् । सा षोडशभिः स्तम्भैश्चतुर्भिर्द्वारैरष्टभिर्मत्तवारणीभिरुपेता स्यात् । तदनुलग्नं राज्ञः केलिगृहम् । मध्येसभं चतुःस्तम्भान्तरा हस्तमात्रोत्सेधा स मणिभूमिका वेदिका । तस्यां राजासनम् । तस्य चोत्तरतः संस्कृताः कवयो निविशेरन् । बहुभाषा कवित्वे यो यत्राधिकं प्रवीणः स तेन व्यपदिश्यते । यस्त्वनेकत्र प्रवीणः स सङ्क्रम्य तत्र तत्रोपविशेत् । ततः परं वेदविद्याविदः प्रामाणिकाः पौराणिकाः स्मार्ता भिषजो मौहूर्तिका अन्येऽपि तथाविधाः । पूर्वेण प्राकृताः कवयः; ततः-परं नटनर्तकगायनवादकवाग्जीवनकुशीलवतालावचरा अन्येऽपि तथाविधाः । पश्चिमेनापभ्रंशिनः कवयः । ततःपरं चित्रलेप्यकृतौ माणिक्यबन्धका वैकटिका स्वर्णकार वर्धकिलोहकारा अन्येऽपि तथाविधाः । दक्षिणतो भूतभाषाकवयः; ततःपरं भुजङ्गगणिकाः प्लवकशौभिकजम्भकमल्लाः शस्त्रोपजीविनेऽन्येऽपि तथाविधाः । तत्र यथासुखमासीनः काव्यगोष्ठीं प्रवर्तयेत् भावयेत् परीक्षेत च । वासुदेव सातवाहनशूद्रकसाहसाङ्कादीन् सकलान् सभापतीन् दानमानाभ्यामनुकुर्यात् । तुष्टपुष्टाश्चास्य सभ्या भवेयुः, स्थाने च पारितोषिकं लभेरन् । लोकोत्तरस्य काव्यस्य च यथार्हा पूजा कवेर्वा । अन्तरान्तरा च काव्यगोष्ठीं शास्त्रवादाननुजानीयात् । मध्वपि नानवदंशं स्वदते । काव्यशास्त्रविरतौ विज्ञानिष्वभिरमेत । देशान्तरागतानाञ्च विदुषामन्यद्वारा सङ्गङ्गारयेदौचित्याद्यावत्स्थिति पूजां

च। महानगरेषु च काव्यशास्त्रपरीक्षार्थं ब्रह्मसभाः कारयेत्। तत्र परीक्षोत्तीर्णानां ब्रह्मरथयानं पट्टबन्धश्च। श्रूयते चोज्जयिन्यां काव्यकारपरीक्षा—

"इह कालिदासमेण्ठावत्रामररूपसूरभारवयः।
हरिचन्द्रचन्द्रगुप्तौ परीक्षिताविह विशालायाम्॥"

"C.D. Dalal, M.A., and R. Anant Krishna Shastri remark that after giving a very glowing picture of what an ideal poet should be and how he should daily conduct himself, Rajshekhar says that a King should hold assemblies for the examination of the work of poet. He should patronize poets, become the Sabhapati (President) like the ancient King Vasudev, Satwahan, Sudrak and Sahasank and honour and give donation to the poets whose works stand the test. Assemblies of learned men (Brahmasabhas) should be held in big cities for examination of poetical and scientific works, and the successful should be conveyed in a special chariot (Brahmaratha) and should be crowned with a fillect. Such assemblies for examining in poetry were held in Ujjaini. Kalidas, Mentha, Amara, Rupa, Sura, Bharawi, Harichandra and Chandragupta were examined here. Pataliputra was the centre for examination in sciences. It was after passing from here that Upavarsha, Varsha, Panini, Pingala, Vyadi, Vararuchi and Patanjali got fame Sastrakaras."

## किरातार्जुनीयम्।

यद्यपि किरातार्जुनीयमपहायान्यः कोऽपि ग्रन्थो भारविकविरचितो नावलोकितस्तथापि सकलकाव्यलक्षणलक्षितमेकं किरातार्जुनीयमेव महाकाव्यं विरचय्य कविस्तादृशीं ख्यातिमलभत यामनेकग्रन्थरचनयाऽन्ये कवयः कृच्छ्रेण लभन्त इत्यत्र नास्ति कस्यापि विप्रलापः।

उद्गिरन्त्येव प्रायो गिरमिमां प्राज्ञाः—
"उपमा कालिदासस्य भारवेरर्थगौरवम्।
नैषधे पदलालित्यं माघे त्रयमवस्थितम्॥"

अस्मिन् काव्ये कवेर्व्यावहारिकं ज्ञानं, नीतिशास्त्रेषु पाण्डित्यं पदं पदं प्रतिपद्यते। इदं च काव्यं महाभारतीयवनपर्वतः द्वैतवनमधितिष्ठतां पाण्डवानां वृत्तमवलम्ब्य स्वातन्त्र्येण विरचितम्। अत्र किरातवेशधारिणो भगवतश्चन्द्रमौलेर्नरावतारस्य वीरशिरोमणेरर्जुनस्य च युद्धं ततश्च पाशुपतास्त्रलाभः प्रधानतयोपवर्णितः। एतच्च किरातार्जुनावधिकृत्य कृतमित्यतः किरातार्जुनीयमित्यभिधीयते।

अस्य नायकादिपरिज्ञानाय संग्रहश्लोकः--

नेता मध्यमपाण्डवो भगवतो नारायणस्यांशज-
स्तस्योत्कर्षकृतेऽनुवर्णिततमो दिव्यः किरातः पुनः।
शृङ्गारादिरसोऽयमत्र विजयी वीरप्रधानोरसः।
शैलाद्यानि च वर्णितानि बहुशो दिव्यास्त्रलाभः फलम्!

## अस्य टीकाकाराः।

प्रकाशवर्षः, जोनराजः, धर्म्मविजयः, विजयसुन्दरः, एकनाथः' नरहरिः, मल्लिनाथश्चेत्याद्याः किरातार्जुनीयस्य सन्ति बहवष्टीकाकृतः। परमस्माकं दौर्भाग्यात् कालमाहात्म्याद्वा मल्लिनाथं विनाऽन्येषां टीका नोपलभ्यन्ते।

## मल्लिनाथः

सुप्रसिद्धोऽयं टीकाकारशिरोमणिर्मल्लिनाथः रघुवंश-कुमारसम्भव-मेघदूतानां सञ्जीवनीं, शिशुपालवधस्य सर्वङ्कषां, किरातार्जुनीयस्य घण्टापथं, नैषधस्य जीवातुं, रावणवधमहाकाव्यस्य (भट्टिकाव्यस्य) सर्वपथीनं नाम बहीष्टीकाः प्रणीतवान्। असौ तैलङ्गाभिजनः खिस्ताब्दीयचतुर्दशशतक आसीदिति बहूनां सम्मतम्।

अधुना भट्टकुमारिलस्योक्तं। सहृदयान् सुधीजनान् प्रार्थये—

आगमप्रवणश्चाहं नापवाद्यः स्खलन्नपि।
न हि सद्वर्त्मना गच्छन् स्खलितेष्वप्यपोद्यते॥ इति

विद्वज्जनानुगतस्य
गौरीनाथशर्म्मणः।

## सुबोधिनी ।

मल्लिनाथप्रणीता सर्वगुणसम्पन्ना सर्वत्र लब्धप्रचारा घण्टापथाभिधा टीका केवलं विद्वद्ववोध्यैव । परिक्षार्थिनामन्तेवासिनां तु तया काव्यरहस्यज्ञानं दुरापास्तं, श्लोकार्थानामपि सम्यगवगतिर्न भवतीत्यतः प्रथमसर्गत्रयस्य अस्मत्सुहृत्प्रवरैः, शारदाग्रन्थमालासम्पादकैः रघुवंश-मेघदूत-श्रुतबोधादिटीकाकारैः, साहित्याचार्य्य श्रीगौरीनाथपाठकमहोदयैरियं सुबोधिनी सुखबोधाय सम्पादितेति प्रमुदितस्वान्ता वयमेनां सभाजयामः । श्रीमत्पाठकमहाशयैः सुबोधिनीटीका समलङ्कृतानां रघुवंशादीनां प्रकाशनेनोपपादितो यथा छात्राणां सुमहानुपकारः स हृदयङ्गम एव सर्वेषामध्येतॄणामध्यापकानां च । अत इयं सुबोधिनी कीदृशी कियान् वाऽनयोपकार इत्यत्र तटस्था एव वयम् ।

"नहि कस्तूरिकामोदः शपथेन विभाव्यते ।"

समयाभावेन त्वरया ग्रन्थविस्तरभयेन चान्ये वहवो विनिवेश्या विषयास्त्यक्ता एव अग्रिमसंस्करणे संनिवेशयितुमिच्छा वर्तते ।

सन्ति चान्यैराधुनिकैरार्य्यवर्य्यविद्वद्भिर्विरचिताः किरातादीनां पर्य्याययुक्ताष्टीकाः । ताभिश्च कीदृशः कियान् वा उपकारश्छात्राणामिति त एव जानन्तु । पातञ्जलवृत्त्युपक्रमे तत्रभवता श्रीमता भोजराजेनोक्तम्—

"दुर्बोधं यदतीव तद्विजहति स्पष्टार्थमित्युक्तिभिः
स्पष्टार्थेष्वतिविस्तृतिं विदधति व्यर्थैः समासादिकैः ।
अस्थानेऽनुपयोगिभिश्च वहुभिर्जल्पैर्भ्रमं तन्वते
श्रोतॄणामिति वस्तुविप्लवकृतः प्रायेण टीकाकृतः ॥"

महाकवीनां सरसकाव्यानामेतादृशी विडम्बना दुःखायैव काव्यरसज्ञानां सहृदयानामित्यलमनधिकारचर्चया—

श्रीश्यामाचरणकविरत्नस्य ।

# किरातार्ज्जुनीयम् ।

किरातः-व्याधरूपधारी महादेवः । अर्ज्जुनः-तृतीयपाण्डवः । किरातश्च अर्ज्जुनश्च किरातार्ज्जुनौ ( द्वन्द्वः ) तौ अधिकृत्य कृतं काव्यं किरातार्ज्जुनीयम् । "अधिकृत्य कृते ग्रन्थे" (४।३।८७ इत्यनुवर्त्तमाने "शिशुक्रन्द-यमसभ-द्वन्द्वेन्द्रजननादिभ्यश्छः" (४।३।८८) इति छः (ईय) ।

तत्रभवान् महाप्रतिभाप्रभारविर्भारविर्नाम महाकविः "काव्यं यशसेऽर्थकृते" इत्याद्यालङ्कारिकवचनप्रामाण्यात् काव्यस्यानेकश्रेयःसाधनतां पश्यन् किरातार्ज्जुनीयाख्यं महाकाव्यमिदं चिकीर्षुः "आशीर्नमस्क्रियावस्तुनिर्देशो वाऽपि तन्मुखम्" इत्याशीर्वादाद्यन्यतमस्य प्रबन्धमुखलक्षणत्वात् वनेचरस्य युधिष्ठिरसमागमरूपं वस्तु प्रथमं निर्दिशति ।—

श्रियः कुरूणामधिपस्य पालनीं
प्रजासु वृत्तिं यमयुङ्क्त वेदितुम् ।
स वर्णिलिङ्गी विदितः समाययौ
युधिष्ठिरं द्वैतवने वनेचरः ॥ १ ॥

अन्वयः-( युधिष्ठिरः ) कुरूणाम् अधिपस्य श्रियः पालनीं प्रजासु वृत्तिं वेदितुं यम् अयुङ्क्त, वर्णिलिङ्गी सः वनेचरः विदितः ( सन् ) द्वैतवने युधिष्ठिरं समाययौ ॥ १ ॥

श्रिय इति ॥ आदितः श्रीशब्दप्रयोगाद्वर्णगणादिशुद्धिर्नामात्रातीवोपयुज्यते । तदुक्तम्-'देवतावाचकाः शब्दा ये च भद्रादिवाचकाः । ते सर्वे नैव निन्द्याः स्युर्लिपितो गणतोऽपि वा ॥' इति । कुरूणां

निवासाः कुरवो जनपदाः। 'तस्य निवासः' इत्यणप्रत्ययः। जनपदे लुप्। तेषामधिपस्य दुर्योधनस्य संबन्धिनीम्। शेषे षष्ठी। श्रियो राज्यलक्ष्म्याः। 'कर्तृकर्मणोः कृति' इति कर्मणि षष्ठी। पाल्यतेऽनयेति पालनी ताम्, प्रतिष्ठापिकामित्यर्थः, प्रजारागमूलत्वात्सम्पद इति भावः। 'करणाधिकरणयोश्च' इति करणे ल्युट्। 'टिड्ढाणञ्—' इत्यादिना ङीप्। प्रजासु जनेषु विषये। 'प्रजा स्यात्संततौ जने' इत्यमरः। वृत्तिं व्यवहारं वेदितुं ज्ञातुं यं वनेचरमयुङ्क्त नियुक्तवान्। वर्णः प्रशस्तिरस्यास्तीति वर्णी ब्रह्मचारी। तदुक्तम्—'स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभाषणम्। संकल्पोऽध्यवसायश्च क्रियानिर्वृत्तिरेव च। एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः। विपरीतं ब्रह्मचर्यमेतदेवाष्टलक्षणम्॥' एतदष्टविधमैथुनाभावः प्रशस्तिः। 'वर्णाद्ब्रह्मचारिणि' इतीनिप्रत्ययः। तस्य लिङ्गं चिह्नमस्यास्तीति वर्णिलिङ्गी। ब्रह्मचारिवेषवानित्यर्थः। स नियुक्तः वने चरतीति वनेचरः किरातः। 'भेदाः किरातशबरपुलिन्दा म्लेच्छजातयः' इत्यमरः। 'चरेष्टः' इति टप्रत्ययः। 'तत्पुरुषे कृति बहुलम्' इत्यलुक्। विदितं वेदनमस्यास्तीति विदितः। परवृत्तान्तज्ञानवानित्यर्थः। 'अर्शआदिभ्योऽच्' इत्यच्प्रत्ययः। उभयत्रापि 'पीता गावः,' 'भुक्ता ब्राह्मणाः,' 'विभक्ता भ्रातरः' इत्यादिवत्साधुत्वम्। न तु कर्तरि क्तः। सकर्मकेभ्यस्तस्य विधानाभावात्। अतएव भाष्यकारः—'अकारो मत्वर्थीयः। विभक्तमेषामस्तीति विभक्ताः। पीतमेषामस्तीति पीताः' इति सर्वत्र। अथवोत्तरपदलोपोऽत्र द्रष्टव्यः। विभक्तधना विभक्ताः, पीतोदकाः पीता इति। अत्र लोपशब्दार्थमाह कैयटः—"गम्यार्थस्याप्रयोग एव लोपोऽभिमतः। 'विभक्ता भ्रातरः' इत्यत्र च धनस्य यद्विभक्तत्वं तद् भ्रातृषूपचरितम्। 'पीतोदका गावः' इत्यत्राप्युदकस्य पीतत्वं गोष्वारोप्यते" इति तद्वदत्रापि वृत्तिगतं विदितत्वं वेदितरि वनेचर उपचर्यते। एतेन 'वनाय पीतप्रतिबद्धवत्साम्', 'पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु' एवमादयो व्याख्याताः। अथवा विदितो विदितवान्। सकर्मकादप्यविवक्षिते कर्मणि कर्तरि क्तः। यथा 'आशितः कर्ता' इत्यादौ। यथाहुः—'धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसंग्रहात्। प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया॥' इति। द्वैतवने द्वैताख्ये तपोवने। यद्वा

द्वे इते गते यस्मात्तद्द्वीतम्। द्वीतमेव द्वैतम्। तच्च तद्वनं च तस्मिन्। शोकमोहादिवर्जित इत्यर्थः। युधि रणे स्थिरं युधिष्ठिरं धर्मराजम्। 'हलदन्तात्सप्तम्याः संज्ञायाम्' इत्यलुक्। 'गवियुधिभ्यां स्थिरः' इति षत्वम्। समाययौ संप्राप्तः। अत्र 'वने वनेचरः' इति द्वयोः स्वरव्यञ्जनसमुदाययोरेकदैवावृत्त्या वृत्त्यनुप्रासो नामालङ्कारः। अस्मिन्सर्गे वंशस्थवृत्तम्। तल्लक्षणम्—'जतौ तु वंशस्थमुदीरितं जरौ' इति ॥

सुबो०—( युधिष्ठिरः ) कुरूणाम् अधिपस्य ( कुरुदेशपतेः दुर्योधनस्य ) श्रियः (राज्यलक्ष्म्याः) पालनीं ( पाल्यते अनया इति पालनी तां, पालनप्रकारवर्तीं ) प्रजासु ( राज्यस्थेषु जनेषु ) वृत्तिं ( व्यवहारं ) वेदितुं ( ज्ञातुं ) यं ( वनेचरम् ) अयुङ्क्त ( नियोजितवान् ), वर्णिलिङ्गी ( वर्णी ब्रह्मचारी, तस्य लिङ्गं चिह्नं दण्डकमण्डल्वादि विद्यते अस्य इति वर्णिलिङ्गी ब्रह्मचारिवेषधारी ) सः वनेचरः ( द्वैतवनचारी कश्चित् किरातः ) विदितः ( तद्विषये ज्ञानवान् सन् ) द्वैतवने, द्वे इते गते यस्मात्तद्द्वीतं, तदेव द्वैतं, द्वैतञ्च तद्वनं द्वैतवनं तस्मिन् ( द्वैताख्ये वने अवस्थितं ) युधिष्ठिरं समाययौ ( सङ्गतवान् ) ॥ १ ॥

व्याकरणादि—श्रियः=पालनीमित्यस्य कर्म्म, तत्र " कर्तृकर्म्मणोः कृति" इति कर्म्मणि षष्ठी। अधिपस्य=शेषे ( सम्बन्धे ) षष्ठी, वृत्तिमित्यनेनास्य सम्बन्धः। पालनीम्=वृत्तिमित्यस्य विशेषणम्, करणे ल्युट् ( अनट् ), स्त्रीत्वात् ङीप्। अयुङ्क्त=युज्+लङ् त। वर्णी=" वर्णाद् ब्रह्मचारिणि " इति इनिः, "वर्णिनो ब्रह्मचारिणः" इत्यमरः। विदितः=विद्+भावे क्तः, विदितं वेदनं (ज्ञानम्) अस्यास्तीति अर्शआदित्वात् अच्; अथवा अत्र कर्म्माभावात् अकर्म्मकत्वात् कर्त्तरि क्तः। वनेचरः=" तत्पुरुषे कृति बहुलम् " इति सप्तम्याः पाक्षिकः अलुक् ॥ १ ॥

वाच्यपरिवर्त्तनम्—...( युधिष्ठिरेण ) यः अयुज्यत। तेन वर्णिलिङ्गिना विदितेन समाययै युधिष्ठिरः...वनेचरेण ॥ १ ॥

सरलार्थः—( द्यूतक्रीडायां दुर्य्योधनेन पराजितो राजा युधिष्ठिरः भ्रातृभिः द्रौपद्या च सह वनं गतः, त्रयोदशवर्षान्ते राजधानीं प्रतिगत्य प्रजानामनुरागभाजनं भविष्यामि न वेत्याशङ्क्य ) प्रजानामुपरि दुर्य्योधनस्य व्यवहारं परिज्ञातुं वनेचरमेकं प्रेषितवान् । स च ब्रह्मचारिवेषेण गत्वा सर्वं दुर्य्योधनचरितं विदित्वा द्वैतवने कृतवासं युधिष्ठिरं प्रत्याजगाम ॥ १ ॥

वनेचरस्यापि तस्य शिष्टाचारवेदितृत्वम् अकार्पण्यं च दर्शयन्नाह ।—

कृतप्रणामस्य महीं महीभुजे
जितां सपत्नेन निवेदयिष्यतः ।
न विव्यथे तस्य मनो न हि प्रियं
प्रवक्तुमिच्छन्ति मृषा हितैषिणः ॥२॥

अन्वयः—कृतप्रणामस्य, सपत्नेन जितां महीं महीभुजे निवेदयिष्यतः तस्य मनः न विव्यथे । हि हितैषिणः मृषा प्रियं प्रवक्तुं न इच्छन्ति ॥ २ ॥

कृतप्रणामस्येति ॥ कृतप्रणामस्य तत्कालोचितत्वात्कृतनमस्कारस्य । सपत्नेन रिपुणा दुर्योधनेन । 'रिपौ वैरिसपत्नारिद्विषद्द्वेषणदुर्हृदः' इत्यमरः । जितां स्वायत्तीकृतां महीं महीभुजे युधिष्ठिराय । क्रियाग्रहणात्संप्रदानत्वम् । निवेदयिष्यतो ज्ञापयिष्यतः । 'लृटः सद्वा' इति शतृप्रत्ययः । तस्य वनेचरस्य मनो न विव्यथे । कथमीदृगप्रियं राज्ञे विज्ञापयामीति मनसि न चचालेत्यर्थः । 'व्यथ भयचलनयोः' इति धातोर्लिट् ॥ उक्तमर्थमर्थान्तरन्यासेन समर्थयते—न हीति ॥ हि यस्मात् । हितमिच्छन्तीति हितैषिणः स्वामिहितार्थिनः पुरुषा मृषा मिथ्याभूतं प्रियं प्रवक्तुं नेच्छन्ति । अन्यथा कार्यावघातकतया स्वामिद्रोहिणः स्युरिति भावः ॥ 'अमौढ्यममान्द्यममृषाभाषित्वमभ्यूहकत्वं चेति चारगुणा' इति नीतिवाक्यामृते ॥

सुबो०—कृतप्रणामस्य ( कृतः प्रणामो येन तस्य, आदौ कृतनमस्कारस्य, पश्चात् ) सपत्नेन ( शत्रुणा दुर्य्योधनेन ) जितां ( वशीकृतां ) महीं ( पृथिवीं ) महीभुजे महीं भुनक्तीति तस्मै ( राज्ञे युधिष्ठिराय ) निवेदयिष्यतः, निवेदयिष्यतीति निवेदयिष्यन् तस्य निवेदयिष्यतः ( विज्ञापयिष्यतः ) तस्य ( वनेचरस्य ) मनः ( हृदयं ) न विव्यथे ( न विचलितं बभूव ) । हि ( यतः ) हितैषिणः ( हितमिच्छन्ति ये ते हितैषिणः, स्वामिहितार्थिनो जनाः ) मृषा ( मिथ्याभूतं ) प्रियं ( प्रीतिकरं वचनं ) प्रवक्तुं ( कथयितुं ) न इच्छन्ति ( न अभिलषन्ति ) ॥ २ ॥

व्या०—महीभुजे=महीं भुनक्ति पालयतीति मही-भुज्+क्विप्, "क्रियया यमभिप्रैति सोऽपि संप्रदानम्" इति । विव्यथे=व्यथ+लिट् त (ए) ॥ २ ॥

वाच्य०—....विव्यथे....मनसा ।....इष्यते हितैषिभिः ॥ २ ॥

सरलार्थः—असौ वनेचरः आगत्य प्रथमं युधिष्ठिरं प्रणनाम । ततः शत्रुणा दुर्य्योधनेन सर्वं राज्यं सुशासनेन स्वायत्तीकृतमित्यप्रियं वक्तुमुद्यतस्यापि तस्य मनो दुःखितं न बभूव । यतः स्वामिनो हितार्थिनो ये भवन्ति, ते केवलमनस्तुष्टयै मिथ्याप्रियवचनं वक्तुं नेच्छन्ति ॥ २ ॥

तथापि प्रियवचनार्हे राज्ञि कटुनिष्ठुरोक्तिर्न युक्ता इत्याशङ्क्य स्वाम्यनुज्ञया न दुष्यतीत्याशयेनाह—

द्विषां विघाताय विधातुमिच्छतो
रहस्यनुज्ञामधिगम्य भूभृतः ।
स सौष्ठवौदार्यविशेषशालिनीं
विनिश्चितार्थामिति वाचमाददे ॥३॥

अन्वयः—रहसि सः द्विषां विघाताय विघातुम् इच्छतः भूभृतः अनुज्ञाम् अधिगम्य सौष्ठवौदार्य्यविशेषशालिनीं विनिश्चितार्थाम् इति वाचम् आददे ॥ ३ ॥

द्विषामिति ॥ रहस्येकान्ते स वनेचरो द्विषां शत्रूणाम् ॥ कर्मणि षष्ठी । विघाताय । विहन्तुमित्यर्थः । 'तुमर्थाच्च भाववचनात्' इति चतुर्थी । 'भाववचनाश्च' इति तुमर्थे घञ्प्रत्ययः ॥ अत्र तादर्थ्यमपि न दोषः । तथापि प्रयोगवैचित्र्यविशेषस्याप्यलङ्कारत्वादेवं व्याचक्षते । विघातुं व्यापारं कर्तुमिच्छतः । 'समानकर्तृकेषु तुमुन्' । द्विषो विहन्तुमुद्युक्तज्ञानस्येत्यर्थः । अत एव भूभृतो युधिष्ठिरस्यानुज्ञामधिगम्य । सुष्ठु भावः सौष्ठवं शब्दसामर्थ्यम् । सुष्ठुशब्दाद्व्ययादुद्गात्रादित्वाद्ष्ण्यप्रत्ययः । उदारस्य भाव औदार्यमर्थसंपत्तिः । तयोर्द्वन्द्वः सौष्ठवौदार्ये । अत्रौदार्यशब्दस्याजाद्यदन्तत्वेऽपि 'लक्षणहेत्वोः क्रियायाः' इत्यत्राल्पस्वरस्यापि हेतुशब्दस्य पूर्वनिपातमकुर्वता सूत्रकृतैव पूर्वनिपातस्यानित्यत्वज्ञापनान्न पूर्वनिपातः । उक्तं च काशिकायाम्—'अयमेव लक्षणहेत्वोरिति निर्देशः पूर्वनिपातव्यभिचारचिह्नम्' इति । ते एव विशेषः । तयोर्वा विशेषः । तेन शालते शोभत इति सौष्ठवौदार्यविशेषशालिनी ताम् । ताच्छील्ये णिनिः । विनिश्चितार्थां विशेषतः प्रमाणतो निर्णीतार्थाम् । इति वक्ष्यमाणरूपां वाचमाददे स्वीकृतवान् । उवाचेत्यर्थः ॥

सुबो०—रहसि ( निर्जने ) सः ( वनेचरः ) द्विषां (शत्रूणां) विघाताय ( विनाशाय ) विघातुम् ( व्यापारं कर्त्तुम् ) इच्छतः ( अभिलषतः ) भूभृतः ( राज्ञः युधिष्ठिरस्य ) अनुज्ञाम् (आदेशम् ) अधिगम्य ( प्राप्य ) सौष्ठवौदार्य्यविशेषशालिनीं ( सुष्ठु शोभनस्य भावः सौष्ठवं शब्दसामर्थ्यम्, उदारस्य भावः औदार्य्यम् अर्थसम्पत्तिः, सौष्ठवं च औदार्य्यं च सौष्ठवौदार्य्ये तयोर्विशेषः उत्कर्षः, तेन शालते शोभते या ताम्—उत्कृष्टशब्दार्थसमन्वितां ) विनिश्चितार्थां ( विशेषेण प्रमाणेन निश्चितः निर्णीतः अर्थः अभिप्रायः यस्याः तथाभूताम् ) इति ( इमां वक्ष्यमाणां ) वाचं ( वाणीम् ) आददे ( स्वीकृतवान्, उवाच इत्यर्थः ) ॥ ३ ॥

व्या०—द्विषाम् = द्विष+क्विप् षष्ठी । भूभृतः भुवं बिभर्त्तीति भृ-भृ+क्विप् ।

वाच्य०—....तेन सौष्ठवौदार्य्यविशेषशालिनी विनिश्चितार्था इति वाक् आददे ॥ ३ ॥

सरलार्थः—शत्रूणां प्रतिकारं कर्त्तुमिच्छता युधिष्ठिरेण निर्जनस्थानं नीत्वा अकम्पटेन यथातथं वक्तुमादिष्टो वनेचरः साधुशब्दयुक्तं सदर्थसहितं च स्वाभिप्रायव्यञ्जकं वचनमुवाच।३।

प्रथमं तावत् अप्रियनिवेदकमात्मानं प्रति अक्षोभं याचते—

क्रियासु युक्तैर्नृप चारचक्षुषो
न वञ्चनीयाः प्रभवोऽनुजीविभिः ।
अतोऽर्हसि क्षन्तुमसाधु साधु वा
हितं मनोहारि च दुर्लभं वचः ॥४॥

अन्वयः—नृप, क्रियासु युक्तैः अनुजीविभिः चारचक्षुषः प्रभवः न वञ्चनीयाः । अतः असाधु साधु वा क्षन्तुम् अर्हसि । हितं मनोहारि च वचः दुर्लभम् ॥ ४ ॥

क्रियास्विति ॥ हे नृप, क्रियासु कृत्यवस्तुषु युक्तैर्नियुक्तैरनुजीविभिर्भृत्यैः । चारादिभिरित्यर्थः । चरन्तीति चराः । पचाद्यच् । त एव चाराः । चरेः पचाद्यजन्तात्प्रज्ञादित्वादण्प्रत्ययः ॥ त एव चक्षुर्येषां ते चारचक्षुषः । 'स्वपरमण्डले कार्याकार्यावलोकने चाराश्चक्षूंषि क्षितिपतीनाम्' इति नीतिवाक्यामृते। प्रभवो निग्रहानुग्रहसमर्थाः स्वामिनो न वञ्चनीया न प्रतारणीयाः । सत्यमेव वक्तव्या इत्यर्थः । चारापचारे चक्षुरपचारवद्राज्ञां पदे पदे निपात इति भावः । अतोऽप्रतार्यत्वाद्धेतोः । असाध्वप्रियं साधु प्रियं वा । मदुक्तमिति शेषः। क्षन्तुं सोढुमर्हसि। कुतः। हितं पथ्यं मनोहारि प्रियं च वचो दुर्लभम् । अतो मद्वचोऽपि हितत्वादप्रियमपि क्षन्तव्यमित्यर्थः ॥

सुबो०—हे नृप ( राजन् ), क्रियासु ( कर्त्तव्यकर्म्मसु ) युक्तैः (नियुक्तैः) अनुजीविभिः, अनुपश्चाज्जीवन्ति तैः (भृत्यैः) चारचक्षुषः ( चरा एव चाराः, ते एव चक्षुः स्वपरमण्डले कार्य्याकार्य्यावलोकनसाधनं येषां ते तथोक्ताः ) प्रभवः (स्वामिनः) न वञ्चनीयाः ( मिथ्यावचनैः न प्रतारणीयाः )। अतः ( अस्मात् हेतोः, अप्रतार्य्यत्वाद्धेतोः ) साधु असाधु वा ( प्रियम् अप्रियं वा मदुक्तं वचनं ) क्षन्तुं ( सोढुम् ) अर्हसि ( योग्यो भवसि )। हितं ( पथ्यं ) मनोहारि ( प्रियं ) च वचः ( वाक्यं ) दुर्लभं ( केनापि वक्तुं न शक्यमित्यर्थः ) ॥ ४ ॥

व्या०—क्रिया = कृ+श+टाप् । प्रभवः = प्र-भू+डु । अनुजीविभिः = अनु-जीव+णिनि । क्षन्तुम् = क्षम+तुमुन् । दुर्लभम् = दुर्-लभ्+कर्मणि खल् ॥ ४ ॥

वाच्य०—....युक्ताः....चारचक्षुषः....वञ्चयेयुः प्रभून् अनुजीविनः। ....अर्ह्यते (त्वया)....। हितेन मनोहारिणा... दुर्लभेन (भूयते) वचसा ॥४॥

सरलार्थः— यतश्चरा एव राज्ञां चक्षुःस्वरूपाः, अतश्चैरैः मिथ्यावचनै राजानो न प्रतारणीयाः । तस्मादहं सर्वं सत्यमेव ते कथयामि । तत्राप्रियवचनेन यदि मेऽपराधो भविष्यति, स त्वया क्षन्तव्यः ॥ ४ ॥

तर्हि तूष्णींभाव एव वरमित्याशङ्क्याह—

स किंसखा साधु न शास्ति योऽधिपं
हिताद्य यः संशृणुते स किंप्रभुः ।
सदानुकूलेषु हि कुर्वते रतिं
नृपेष्वमात्येषु च सर्वसंपदः ॥ ५ ॥

अन्वयः—यः अधिपं साधु न शास्ति, सः किंसखा । यः हितात् न संशृणुते, सः किंप्रभुः । हि नृपेषु अमात्येषु च अनुकूलेषु (सत्सु) सर्वसम्पदः सदा रतिं कुर्वते ॥ ५ ॥

स इति ॥ यः सखामात्यादिरधिपं स्वामिनं साधु हितं न शास्ति नोपदिशति। 'शुविशासि—' इत्यादिना शासेर्दुहादिपाठाद् द्विकर्मकत्वम्। स हितानुपदेष्टा। कुत्सितः सखा किंसखा। दुर्मन्त्रीत्यर्थः। 'किमः क्षेपे' इति समासान्तप्रतिषेधः। तथा यः प्रभुर्निग्रहानुग्रहसमर्थः स्वामी हितादाप्तजनाद्धितोपदेष्टुः सकाशात्। 'आख्यातोपयोगे' इत्यपादानत्वात्पञ्चमी। न संशृणुते न शृणोति। हितमिति शेषः। 'समो गम्यृच्छि—' इत्यादिना सम्पूर्वाच्छ्रुणोतेरकर्मकादात्मनेपदम् अकर्मकत्वं वैवक्षिकम्। स हितमश्रोता प्रभुः किंप्रभुः कुत्सितस्वामी। पूर्ववत्समासः। सर्वथा सचिवेन वक्तव्यं श्रोतव्यं स्वामिना। एवं च राजमन्त्रिणोरैकमत्यं स्यादित्यर्थः। ऐकमत्यस्य फलमाह—सदेति। हि यस्मान्नृपेषु स्वामिषु। अमा सह भवा अमात्यास्तेषु च। 'अव्ययात्त्यप्'। अनुकूलेषु परस्परानुरक्तेषु सत्सु सर्वसंपदः सदा रतिमनुरागं कुर्वते कुर्वन्ति। ने जातु जहतीत्यर्थः। अतो मया वक्तव्यं त्वया च श्रोतव्यमिति भावः॥ अत्रैव राजमन्त्रिणोर्हितानुपदेशतदश्रवणनिन्दासामर्थ्यसिद्धेरैकमत्यलक्षणकारणस्य निर्दिष्टस्य सर्वसंपत्सिद्धिरूपकार्येण समर्थनात्कार्येण कारणसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः। तदुक्तम्—'सामान्यविशेषकार्यकारणभावाभ्यां निर्दिष्टप्रकृतसमर्थनमर्थान्तरन्यासः' इति॥

सुबो०—यः ( सखा अमात्यादिः ) अधिपं (प्रभुं राजानं) साधु ( हितं ) न शास्ति ( न उपदिशति ) सः किंसखा ( कुत्सितः सखा, दुर्मन्त्री )। यः ( प्रभुः ) हितात् ( हितवादिनः अमात्यात् ) न संशृणुते ( हितवचनं न शृणोति ) सः किंप्रभुः ( कुत्सितः स्वामी )। हि ( यतः ) नृपेषु ( राजसु ) अमात्येषु ( मन्त्रिषु ) च अनुकूलेषु ( परस्परानुरक्तेषु सत्सु ) सर्वसम्पदः ( सर्वा सम्पत्तयः ) सदा ( सर्वदा ) रतिम् (अनुरागं) कुर्वते ( कुर्वन्ति ) ॥ ५ ॥

व्या०—किंसखा = कुत्सितः सखा किंसखा "किं क्षेपे" इति कर्मधारयः, "किमः क्षेपे" इति समासान्तनिषेधः। शासधातोर्द्विकर्मक-

त्वात् साध्विति मुख्यकर्म्म, अधिपमिति गौणकर्म्म हितात्= "आख्यातोपयोगे" इति अपादानत्वात् पञ्चमी । संशृणुते=सम्पूर्वात् अकर्म्मकात् शृणोतेः "अर्त्तिश्रुदृशिभ्यश्चेति वक्तव्यम्" इति आत्मनेपदम्, कर्म्मणोऽविवक्षितत्वात् अत्र श्रुधातोरकर्म्मकत्वम् । किंप्रभुः=पूर्ववत् समासः । कुर्वते=कृ+लट् झ ( अते ) । अमात्येषु=अमा सह भवाः इति "अव्ययात्त्यप्" ।

वाच्य०—तेन किंसख्या भूयते ।..शिष्यते येन अधिपः ।.. येन संश्रूयते तेन किंप्रभुणा भूयते ।...क्रियते रतिः...सर्वसम्पद्भिः ॥ ५ ॥

सरलार्थः—यो मन्त्री राजानं हितं नोपदिशति स दुर्मन्त्री । यश्च राजा मन्त्रिणो हितवचनं न शृणोति स कुराजः । राजानो मन्त्रिणश्च यदि परस्परमनुरक्ताः भवेयुः, तदा राज्यसम्पत् चिरं तिष्ठेत् । अतो मया हितवचनं वक्तव्यम्, त्वयापि प्रसन्नमनसा तत् श्रोतव्यमिति ॥ ५ ॥

सम्प्रति स्वाहंकारं परिहरति—

निसर्गदुर्बोधमबोधविक्लवाः
क्व भूपतीनां चरितं क्व जन्तवः ।
तवानुभावोऽयमवेदि यन्मया
निगूढतत्त्वं नयवर्त्म विद्विषाम् ॥ ६ ॥

अन्वयः—निसर्गदुर्बोधं भूपतीनां चरितं क्व, अबोधविक्लवाः जन्तवः क्व । निगूढतत्त्वं विद्विषां नयवर्त्म यत् मया अवेदि, अयं तव अनुभावः ॥ ६ ॥

निसर्गेति ॥ निसर्गदुर्बोधं स्वभावदुर्ग्रहम् । 'ईषद्दुः–' इत्यादिना खल्प्रत्ययः । भूपतीनां चरितं क्व । अबोधविक्लवा अज्ञानोपहता जन्तवः । मादृशाः पामरजना इत्यर्थः । क्व । नोभयं संघटत इत्यर्थः । तथापि निगूढतत्त्वं संवृतयाथार्थ्यं विद्विषां नयवर्त्म षाड्गुण्यप्रयोगः 'संधिविग्रहयानानि संस्थाप्यासनमेव च । द्वैधीभावश्च विज्ञेयाः

षड्गुणा नीतिवेदिनाम् ॥' इत्यादिरूपो यन्मयाऽवेदि। ज्ञातमिति यावत्। विदेः कर्मणि लुङ्। अयम् इदं वेदनमित्यर्थः। विधेयप्राधान्यात्पुंलिङ्गनिर्देशः। तवानुभावः सामर्थ्यम्। अनुगतो भावोऽनुभाव इति घञन्तेन प्रादिसमासः। न तूपसृष्टाद्घञ्प्रत्ययः। 'श्रिनीभुवोऽनुपसर्गे' इत्यनुपसर्गाद्भवतेर्धातोर्घञ्विधानात्। अत एव कारिकायाम् 'कथं प्रभावो राज्ञां प्रकृष्टो भाव इति प्रादिसमासः' इति। दोषपरिहारौ सम्यग्ज्ञात्वैव विज्ञापयामि। न तु वृथा कर्णकठोरं प्रलपामीत्याशयः ॥

सुबो०—निसर्गदुर्बोधं ( निसर्गेण स्वभावेन दुर्बोधं बोद्धुमशक्यं ) भूपतीनां ( राज्ञां ) चरितं ( कार्यं ) क्व (कुत्र अस्ति), अबोधविक्लवाः ( अबोधेन अज्ञानेन विक्लवाः कातराः—अज्ञानोपहताः ) जन्तवः ( मादृशाः पामरजनाश्च ) क्व ( कुत्र सन्तिः-स्वभावदुर्बोधं राजचरितम् अज्ञजनैर्ज्ञातुं न शक्यते इति भावः )। ( तथापि ) निगूढतत्त्वं ( निगूढं संवृतं तत्त्वं याथार्थ्यं यस्य तत् तथोक्तं ) विद्विषां ( भवतः शत्रूणां राज्ञां ) नयवर्त्म, नयस्य वर्त्म नयवर्त्म (नीतिमार्गः, सन्धिविग्रहयानादिषड्गुणप्रयोगः) यत् मया अवेदि (ज्ञातम्), अयम् (इदं वेदनं) तव अनुभावः (प्रभावः; तवैव प्रभावेण अज्ञानेनापि मया सर्वं द्विषच्चरितं ज्ञातमित्यर्थः) ॥ ६ ॥

स०—अनुभावः=अनुगतो भावः इति प्रादिसमासः।

व्या०—'स्वरूपं च स्वभावश्च निसर्गश्च' इत्यमरः। दुर्बोधम्=दुर्-बुध+कर्म्मणि खल्। अयम्=विधेयप्राधान्यात् पुंस्त्वम्। अवेदि=विद+कर्म्मणि लुङ् त।

वाच्य०—निसर्गदुर्बोधेन....चरितेन....भूयते। अबोधविक्लवैः....जन्तुभिः भूयते।....अनुभावेन अनेन भूयते। अवेदिषं....अहं....।

सरलार्थः—यद्यपि मादृशैरज्ञजनैः कुटिला राजनीतिः ज्ञातुमशक्या, तथापि तव प्रभावेणैव मया सा ज्ञाता।

सम्प्रति यद् वक्तव्यं तदाह—

विशङ्कमानो भवतः पराभवं
नृपासनस्थोऽपि वनाधिवासिनः ।
दुरोदरच्छद्मजितां समीहते
नयेन जेतुं जगतीं सुयोधनः ॥ ७ ॥

अन्वयः—सुयोधनः नृपासनस्थः (सन्) अपि वनाधिवासिनः भवतः पराभवं विशङ्कमानः दुरोदरच्छद्मजितां जगतीं नयेन जेतुं समीहते ॥ ७ ॥

विशङ्कमान इति ॥ सुखेन युध्यते स सुयोधनः । 'भाषायां शासियुधिदृशिधृषिमृषिभ्यो युज्वाच्यः' । नृपासनस्थः सिंहासनस्थोऽपि । वनमधिवसतीति वनाधिवासिनो वनस्थात् । राज्यभ्रष्टादपीत्यर्थः । भवतस्त्वत्तः पराभवं पराजयं विशङ्कमान उत्प्रेक्षमाणः सन् । दुष्टमुदरमस्येति दुरोदरं द्यूतम् । पृषोदरादित्वात्साधु । 'दुरोदरो द्यूतकारे पणे द्यूते दुरोदरम्' इत्यमरः । तस्य च्छद्मना मिषेण जितां लब्धां दुर्नयाजितां जगतीं महीम् । 'जगती विष्टपे मह्यां वास्तुच्छन्दोविशेषयोः' इति वैजयन्ती । नयेन नीत्या जेतुं वशीकर्तुं समीहते व्याप्रियते । न तूदास्त इत्यर्थः । बलवत्स्वामिकमविशुद्धागमं च धनं भुञ्जानस्य कुतो मनसः समाधिरिति भावः । अत्र 'दुरोदरच्छद्मजिताम्' इति विशेषणद्वारेण पदार्थस्य चतुर्थपादार्थं प्रति हेतुत्वेनोपन्यासाद् द्वितीयकाव्यलिङ्गमलङ्कारः । तदुक्तम्—'हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गमुदाहृतम्' ।

सुबो०—सुयोधनः (दुर्योधनः) नृपासनस्थः (राजासनमधिष्ठितः सन्) अपि वनाधिवासिनः (वनस्थात्, राज्यच्युतात् इत्यर्थः) भवतः (त्वत्तः) पराभवं (पराजयं) विशङ्कमानः (सभयम् उत्प्रेक्षमाणः) दुरोदरच्छद्मजितां (दुरोदरस्य द्यूतस्य छद्मना छलेन जितां लब्धां) जगतीं (महीं) नयेन (नीत्या) जेतुं (वशीकर्तुं) समीहते (चेष्टते) ॥ ७ ॥

व्या०—विशङ्कमानः=वि–शकि+शानच् । भवतः="भीत्रार्थानां भयहेतुः" इत्यपादानत्वम्; अथवा पराभवमित्यस्य कर्त्तरि षष्ठी, भवत्-

कर्तृकं पराभवमित्यर्थः । समीहते = सम्-ईह+लट् त ( ते ) । सुयोधनः = सुखेन युध्यतेऽसौ इति सु-युध+कर्म्मणि खलर्थे युच् ( अन ); सुयोधन इति दुर्य्योधनस्य नामान्तरम् ।

वाच्य०—विशङ्कमानेन....नृपासनस्थेन....समीह्यते....सुयोधनेन ।

सरलार्थः—दुर्य्योधनो नृपासनमधिकुर्वन् वनवासिनोऽपि महाविक्रमशालिनो भवतः पराजयमाशङ्कमानः द्यूतक्रीड़या छलेन जितामपि महीम् इदानीं प्रकृतीनामनुरञ्जनेन चिरं वशीकर्तुं नीतिशास्त्रानुसारिणीं वृत्तिमवलम्बते ॥ ७ ॥

नयेन जगतीजयस्य प्रकारमाह—

तथापि जिह्मः स भवज्जिगीषया
तनोति शुभ्रं गुणसंपदा यशः ।
समुन्नयन्भूतिमनार्यसंगमाद्
वरं विरोधोऽपि समं महात्मभिः ॥ ८ ॥

अन्वयः—तथापि जिह्मः सः भवज्जिगीषया गुणसम्पदा शुभ्रं यशः तनोति । भूतिं समुन्नयन् महात्मभिः समं विरोधः अपि अनार्यसङ्गमात् वरम् ॥ ८ ॥

तथापीति । तथापि साशङ्कोऽपि । जिह्मो वक्रः । वञ्चक इति यावत् । स दुर्योधनो भवज्जिगीषया । गुणैर्भवन्तमाक्रमितुमिच्छयेत्यर्थः । 'हेतौ' इति तृतीया । गुणसंपदा दानदाक्षिण्यादिगुणगरिम्णा करणेन । शुभ्रं यशस्तनोति । स खलो गुणलोभनीयां त्वत्संपदमात्मसात्कर्तुं त्वत्तोऽपि गुणवत्तामात्मनः प्रकटयतीत्यर्थः । नन्वेवं गुणिनः सतोऽपि सज्जनविरोधो महानस्त्यस्य दोष इत्याशङ्क्य सोऽपि सत्संसर्गलाभे नीचसंगमाद्वरमुत्कर्षावहत्वादित्याह—समिति । तथाहि । भूतिं समुन्नयन्नुत्कर्षमापादयन् 'लटः शतृशानचौ—' इत्यादिना शतृप्रत्ययः । पुनर्लड्ग्रहणसामर्थ्यात्प्रथमासामानाधिकरण्यम् । महात्मभिः समम् 'सहे'त्यर्थः । 'साकं सत्रा समं सह' इत्यमरः । अनार्यसङ्गमाद् दुर्जनसंसर्गात् । 'पञ्चमी

विभक्ते' इति पञ्चमी । विरोधोऽपि वरं मनाक्प्रियः । 'देवाद् वृते वरः श्रेष्ठे त्रिषु क्लीबं मनाक्प्रिये' इत्यमरः । अत्र मैत्र्यपेक्षया मनाक्प्रियत्वं विरोधस्य 'भूतिं समुन्नयन्' इत्यस्य पूर्ववाक्यान्वये समाप्तस्य वाक्यार्थस्य पुनरादानात्समाप्तपुनरात्ताख्या न दोषापत्तिः । तदुक्तं काव्यप्रकाशे—'समाप्तपुनरादानात्समाप्तपुनरात्तकम् 'इति । न च वाक्यान्तरमेतत् । येनोक्तदोषपरिहारः स्यात् । अर्थान्तरन्यासोऽलङ्कारः । स च भूतिसमुन्नयनस्य पदार्थविशेषणद्वारा विरोधवत्त्वं प्रति हेतुत्वाभिधानरूपकाव्यलिङ्गानुप्राणित इति ॥

सुबो०—तथापि ( तथाच ) जिह्मः ( कुटिलः ) सः ( दुर्य्योधनः ) भवज्जिगीषया ( भवन्तं जेतुमिच्छया हेतुना ) गुणसम्पदा ( दानदाक्षिण्यादिगुणोत्कर्षेण ) शुभ्रं ( निर्म्मलं ) यशः ( कीर्त्तिं ) तनोति ( विस्तारयति ) । ( तथाहि ) भूतिम् ( उत्कर्षं ) समुन्नयन् ( आपादयन् ) महात्मभिः समं ( साधुभिः सह ) विरोधः ( शत्रुता ) अपि अनार्य्यसङ्गमात् ( असाधुभिः सह मैत्र्याः ) वरं ( मनाक्प्रियः ) ॥ ८ ॥

स०—भवज्जिगीषया=जेतुमिच्छा जिगीषा भवतो जिगीषा तया । गुणसम्पदा=गुणानां सम्पत् तया । अनार्य्यसंगमात्=न आर्य्याः अनार्य्याः, तैः संगमः तस्मात् ।

व्या०—" गर्हासमुच्चयप्रश्नशङ्कासम्भावनास्वपि " इत्यमरात् अपिशब्दोऽत्र चार्थः । " तथा विजिह्मः " इति पाठान्तरम् । जिगीषया=जि+सन्+अङ्+टाप् । तनोति=तन+लट् तिप् । समुन्नयन्=सम्—उद्—नी+शतृ । अनार्य्यसङ्गमात्=" पञ्चमी विभक्ते " इति पञ्चमी ॥ ८ ॥

वाच्य०—....जिह्मेन तेन....तन्यते....। समुन्नयता.....वरेण भूयते विरोधेन.....॥ ८ ॥

सरलार्थः—स भवतोऽप्यधिकतरगुणशालितया आत्मानं ख्यापयितुमिच्छन् सर्वैः सह सद्व्यवहारैः विमलं यशो विस्तारयति । अतो मन्ये असाधुभिः सह मैत्रीकरणात् साधुभिः सह शत्रुताकरणं वरम्, येन आत्मोत्कर्षः साध्यते ॥ ८ ॥

तस्य पौरुषं नीतियुक्तमेवेत्याह—

कृतारिषड्वर्गजयेन मानवी-
मगम्यरूपां पदवीं प्रपित्सुना।
विभज्य नक्तंदिवमस्ततन्द्रिणा
वितन्यते तेन नयेन पौरुषम् ॥ ९ ॥

अन्वयः—कृतारिषड्वर्गजयेन, अगम्यरूपां मानवीं पदवीं प्रपित्सुना तेन अस्ततन्द्रिणा ( सता ) पौरुषं नक्तन्दिवं विभज्य नयेन वितन्यते ॥ ९ ॥

कृतेति ॥ षण्णां वर्गः षड्वर्गः। अरीणामन्तःशत्रूणां कामक्रोधादीनां षड्वर्गोऽरिषड्वर्गः। शिवभागवतवत्समासः। तस्य जयः कृतो येन तेन तथोक्तेन। विनीतेनेत्यर्थः। विनीताधिकारं प्रजापालनमिति भावः। अगम्यरूपां पुरुषमात्रदुष्प्राप्याम्। मनोरिमां मानवीम्। मनूपदिष्टसदाचारनुरणामित्यर्थः। पदवीं प्रजापालनपद्धतिं प्रपित्सुना प्रतिपत्तुमिच्छुना। प्रपद्यतेः सन्नन्तादुप्रत्ययः 'सनि मीमा–' इत्यादिनेत्वादेशः। 'अत्र लोपोऽभ्यासस्य' इत्यभ्यासलोपः। अस्ता तन्द्रिरालस्यं यस्य तेनास्ततन्द्रिणा। अनलसेनेत्यर्थः। तदिः सौत्रो धातुः। तस्मात् 'तङ्कन्यादयश्च' इत्यौणादिकः क्निप्रत्ययः 'कृदिकारादक्तिनो वा ङीष् वक्तव्य इति। 'वन्दीघटीतरीतन्द्रीति ङीषन्तोऽपि' इति क्षीरस्वामी। तथा रामायणे प्रयोगः—'निस्तन्द्रिरप्रमत्तश्च स्वदोषपरदोषवित्' इति। तेन दुर्योधनेन। पुरुषस्य कर्म पौरुषं पुरुषकारः। उद्योग इति यावत्। युवादित्वादण्प्रत्ययः। 'पौरुषं पुरुषस्योक्ते भावे कर्मणि तेजसि' इति विश्वः। नक्तं च दिवा च नक्तंदिवम्। अहोरात्रयोरित्यर्थः। 'अचतुर-'इत्यादिना सप्तम्यर्थवृत्त्योरव्ययोर्द्वन्द्वनिपातेऽच्समासान्तः। विभज्यास्यां वेलायामिदं कार्य्यमकार्य्यमिति विभागं कृत्वा नयेन नीत्या वितन्यते विस्तार्यते।

सुबो०—कृतारिषड्वर्गजयेन (जितकामक्रोधादिषड्रिपुणा) अगम्यरूपां ( साधारणपुरुषैः दुर्बोधां ) मानवीं ( मनूपदिष्टां ) पदवीं ( राज्यपालनपद्धतिं ) प्रपित्सुना ( अवलम्बितुमिच्छुना )

तेन ( दुर्य्योधनेन ) अस्ततन्द्रिणा ( अनलसेन सता ) पौरुषं ( पुरुषकर्म्म ) नक्तंदिवं ( रात्रौ च दिने च ) विभज्य ( अस्यां वेलायामिदं कर्म्म कर्त्तव्यमिति विभागं कृत्वा ) नयेन ( नीत्या, नीतिशास्त्रानुसारेण ) वितन्यते ( विस्तार्य्यते, क्रियते इत्यर्थः ) ।

स०—कृतारिषड्वर्गजयेन = षण्णां वर्गः षड्वर्गः, अरीणां षड्वर्गः अरिषड्वर्ग इति शिवभागवतवत् समासः, अथवा अरिश्चासौ षड्वर्गश्चेति कर्म्मधारयः—कृतः अरिषड्वर्गस्य जयो येन सः यानात्सनाद्यादि—षड्वर्ग-निरासनाय अरिरिति विशेषणम्, मानवीम् —मनोरिमामिति । अगम्यरूपाम् = अगम्यं रूपं स्वभावः यस्याः ताम् । अस्ततन्द्रिणा = अस्ता तन्द्रिः येन तेन ।

व्या०—मनु+अण् +ङीप् । प्रपित्सुना = प्र—पद+सन्+उ । नक्तंदिवम् = नक्तं दिवेति द्वयं सप्तम्यर्थवृत्ति अव्ययम्; नक्तं च दिवा चेति द्वन्द्वे "अचतुरे"त्यादिना समासान्तः अच् । असु क्षेपणे+ क्त = अस्त, तद्रि+औणादिक क्तिन्; पौरुषं = पुरुष+अण् । वितन्यते = वि—तन+ कर्म्मणि लट् त ( ते ) ॥ ९ ॥

वाच्य०—कृतारिषड्वर्गजयः...प्रपित्सुः...अस्ततन्द्रिः वितनोति सः... पौरुषम् ॥ ९ ॥

सरलार्थः—स दुर्य्योधनः कामक्रोधादिकं विजित्य अनलसः सन् अहोरात्रयोर्मध्ये अस्यां वेलायामिदं कर्त्तव्यमिति कार्य्याणां विभागं कृत्वा मानवनीतिमनुसृत्य सर्वाणि कर्म्माणि करोति ॥९॥

सम्प्रति तस्य भृत्याद्यनुरागमाह—

सखीनिव प्रीतियुजोऽनुजीविनः
समानमानान्सुहृदश्च बन्धुभिः ।
स सन्ततं दर्शयते गतस्मयः
कृताधिपत्यामिव साधु बन्धुताम् ॥ १० ॥

अन्वयः—गतस्मयः सः सन्ततम् साधु अनुजीविनः प्रीतियुजः सखीन् इव, सुहृदः च बन्धुभिः समानमानान्, बन्धुतां कृताधिपत्याम् इव दर्शयते ॥ १० ॥

सखीनीति । गतस्मयो निरहङ्कारोऽतएव स दुर्योधनः सन्ततमनारतं साधु सम्यक्। अकपटमित्यर्थः। अनुजीविनो भृत्यान्। प्रीतियुजः स्निग्धान्सखीनिव मित्राणीव। दर्शयते । लोकस्येति शेषः। 'हेतुमति च' इति णिच्। 'णिचश्च' इत्यात्मनेपदम्। शोभनं हृदयं येषां तान्सुहृदो मित्राणि च। 'सुहृद्दुर्हृदौ 'मित्रामित्रयोः' इति निपातः । बन्धुभिर्भ्रात्रादिभिः समानमानांस्तुल्यसत्कारान् दर्शयते। बन्धूनां समूहो बन्धुता ताम्॥ 'ग्रामजनबन्धुसहायेभ्यस्तल्'। कृतमाधिपत्यं स्वाम्यं यस्यास्तां कृताधिपत्यामिव दर्शयते। बन्धूनाधिपतीनिव दर्शयतीत्यर्थः। यथा भृत्यादिषु सख्यादिबुद्धिर्जायते लोकस्य तथा तान्संभावयतीत्यर्थः अनुजीव्यादीनाम् 'कर्तुरीप्सिततमं कर्म' इति कर्मत्वम्। पूर्वं त्वस्मिन्नेव पदान्वये वाक्यार्थमित्थं वर्णयन्ति-स राजाऽनुजीव्यादीन्सस्यादीनिव दर्शयते। सख्यादय इव ते तु तं पश्यन्ति । सख्यादिभावेन पश्यतस्तांस्तथा दर्शयते। स्वयमेव छन्दानुवर्तितया स्वदर्शनं तेभ्यः प्रयच्छतीत्यर्थः । अर्थात्तस्येप्सितकर्मत्वम् । अणि कर्तुरनुजीव्यादेः 'अभिवादिदृशोरात्मनेपदानुपसंख्यानम्' इति पाक्षिकं कर्मत्वम् एवं चात्राण्यन्तकर्मणो राज्ञोऽण्यन्ते कर्तृत्वेऽपि 'आरोहयते हस्ती स्वयमेव' इत्यादिवदश्रूयमाणकर्मान्तरभावान्नायं णेरणादिसूत्रस्य विषय इति मत्वा 'णिचश्च' इत्यात्मनेपदं प्रतिपेदिरे। भाष्ये तु णेरणादिसूत्रविषयत्वमप्यस्योक्तम्। यथाह-- "पश्यन्ति भृत्या राजानम्', 'दर्शयते भृत्यान् राजा', 'दर्शयते भृत्यै राजा' अत्रात्मनेपदं सिद्धं भवति" इति। अत्राह कैयटः—'ननु कर्मान्तरसद्भावादत्रात्मनेपदं न भाव्यम् । उच्यते-अस्मादेवोदाहरणाद्भाष्यकारस्यायमेवाभिप्राय ऊह्यते । अण्यन्तावस्थायां ये कर्तृकर्मणी तद्व्यतिरिक्तकर्मान्तरसद्भावादात्मनेपदं न भवति। यथा-,स्थलमारोहयति मनुष्यान्' इति। इह त्वण्यन्तावस्थायां कर्तृणां भृत्यानां णौ कर्मत्वमिति भवत्येवात्मनेपदमिति॥

सुबो०—गतस्मयः ( निरहङ्कारः ) सः ( दुर्योधनः ) सन्ततं ( सर्वदा ) साधु ( अकपटम् ) अनुजीविनः ( भृत्यान् ) प्रीतियुजः ( प्रणयभाजनानि ) सखीन् ( मित्राणि ) इव, सुहृदः (मित्राणि)

च बन्धुभिः ( भ्रात्रादिभिः ) समानमानान् ( तुल्यसत्कारान् ) बन्धुतां ( बन्धुसमूहं ) कृताधिपत्यां ( वस्तुतोऽधिपतिम् ) इव दर्शयते ( लोकस्येति शेषः ) ॥ १० ॥

समासः—गतस्मयः = गतः स्मयो यस्य सः । अनुजीविनः = अनु = पश्चा जीवन्ति तेऽनुजीविनः । प्रीतियुजः = प्रीत्या युञ्जन्ति ते प्रीतियुजः । शोभनं हृदयं येषामिति सुहृदः । समानमानान् = समानः मानः येषां तान् । बन्धूनां समूहो बन्धुता । कृताधिपत्यां = ( मया ) कृतं आधिपत्यं अधिपति कर्म यस्यास्ताम् ।

व्या०—प्रीतियुजः-प्रीतियुज+क्विप् । सुहृदः = शोभनं हृदयं येषामिति निपातः । दर्शयते = दृश+णिच्+लट् त ( ते ) " णिचश्चे " ति आत्मने-पदम् । बन्धुताम् = बन्धु+समूहार्थे तल् ॥ १० ॥

वाच्य०—सखायः....समानमानाः....तेन....दर्श्यन्ते गतस्मयेन कृता-धिपत्या....बन्धुता ॥ १० ॥

सरलार्थः—दुर्य्योधनः सर्वेषामनुरागसञ्चयार्थं सर्वथा निर-भिमानः अकपटश्च सन् भृत्यैः सह मित्रवद् व्यवहरति, मित्राणि सोदरादीनिव समाद्रियते, सोदरादींश्चैवं ज्ञापयति यत् राज्येऽस्मिन् वस्तुतो भवतामेवाधिपत्यं भवत्प्रतिनिधिना सता मया क्रियत इति ।

न चायं त्रिवर्गात् प्रमाद्यतीत्याह—

असक्तमाराधयतो यथायथं
विभज्य भक्त्या समपक्षपातया ।
गुणानुरागादिव सख्यमीयिवान्
न बाधतेऽस्य त्रिगणः परस्परम् ॥ ११ ॥

अन्वयः—यथायथं विभज्य समपक्षपातया भक्त्या असक्तम् आराधयतः अस्य त्रिगणः गुणानुरागात् सख्यम् ईयिवान् इव परस्परं न बाधते ॥ ११ ॥

असक्तमिति ॥ यथायथं यथास्वं विभज्य । असङ्कीर्णरूपं विविच्येत्यर्थः । 'यथास्वे यथायथम्' इति निपातनाद्विभावो नपुंसकत्वं च । 'ह्रस्वो नपुंसके प्रातिपदिकस्य' इति ह्रस्वत्वम् । पक्षे पातः पक्षपात आसक्तिविशेषःसमस्तुल्यो यस्यां तया समपक्षपातया । भक्त्याऽनुरागविशेषेण । पूज्येष्वनुरागो भक्तिरित्युपदेशः । पूज्यश्चायं त्रिवर्ग इति । असक्तमनासक्तम् । अव्यसनितयति यावत् । आराधयतः सेवमानस्यास्य दुर्योधनस्य त्रयाणां धर्मार्थकामानां गणस्त्रिगणस्त्रिवर्गः । 'त्रिवर्गो धर्मकामार्थैश्चतुर्वर्गःसमोक्षकैः' इत्यमरः । गुणानुरागात्तदीयगुणेष्वनुरागात् । गुणवदाश्रयलोभादित्यर्थः । सख्यं मैत्रीम् 'सख्युर्यः' इति यप्रत्ययः । ईयिवानुपगतवानित्युत्प्रेक्षा । 'उपेयिवाननाश्वाननूचानश्च' इति क्वसुप्रत्ययान्तो निपातः । नात्रोपसर्गस्तन्त्रम्' इति काशिकाकार आह स्म । परस्परं न बाधते । समवर्तित्वादस्य 'धर्मार्थकामाः परस्परानुपमर्देन वर्धन्त इत्यर्थः । उक्तं च— धर्मार्थकामाः सममेव सेव्या यो ह्येकसक्तः स जनो जघन्यः' इति ॥

सुबो०—यथायथं ( यथास्वं, यथाभागं ) विभज्य ( विविच्य, धर्म्मार्थकामरूपः त्रिवर्गः मिश्रीकृत्य न सेव्य इत्यतः इयता कालेन धर्म्मः सेव्यः इयता कालेनार्थः इयता कालेन कामश्चेति विभागं कृत्वा ) समपक्षपातया ( समः समानः पक्षपातः आसक्तिविशेषः यस्यां तथाभूतया ) भक्त्या ( अनुरागेण—प्रत्येकं प्रति तुल्यसमादरेण ) असक्तम् ( अनासक्तं यथा स्यात् तथा ) आराधयतः ( सेवमानस्य ) अस्य ( दुर्य्योधनस्य ) त्रिगणः ( त्रयाणां धर्म्मार्थकामानां गणः ) गुणानुरागात् ( तदीयगुणपक्षपातितया ) सख्यं ( मैत्रीम्—धर्म्मं सेवमानस्य अर्थे कामे च आसक्तिर्न जायते, अर्थं सेवमानस्य न धर्म्मे न कामे, कामं भोगं सेवमानस्य न धर्म्मे न चार्थे इतीत्थं परस्परं शत्रुतामापद्यमानोऽपि मित्रत्वम् ) ईयिवान् ( प्राप्तवान् ) इव परस्परम् ( अन्योन्यं ) न बाधते ( न पीड़यति—परस्पराविमर्देन-वर्द्धते इत्यर्थः ) ॥ ११ ॥

समासः—गुणानुरागात् = अनुरज्यत इति अनुरागः, गुणेषु अनुरागस्तस्मात् ।

व्या०—असक्तम् = नञ्-सन्ज+क्त। ईयिवान् = इ + क्वसु। अनुराग = अनु+रञ्ज + घञ् परस्परम् कर्म्मणि द्वितीया ॥ ११ ॥

बाच्य०—...ईयुषा...बाध्यते ..त्रिगणेन परस्परः ॥ ११ ॥

सरलार्थः—स दुर्य्योधनः अनासक्तः सन्नपि अवश्य कर्तव्यतावोधेन धर्म्ममर्थं कामं च कालविभागेन व्यवस्थाप्य सादरं सेवते। अतोऽस्य त्रिवर्गोऽपि पर्य्याप्तं संपद्यते ॥ ११ ॥

अथ तस्य सामदान कौशलं दर्शयति—

निरत्ययं साम न दानवर्जितं
न भूरिदानं विरहय्य सत्क्रियाम् ।
प्रवर्तते तस्य विशेषशालिनी
गुणानुरोधेन विना न सत्क्रिया ॥ १२ ॥

अन्वयः—तस्य निरत्ययं साम दानवर्जितं न । भूरि दानं सत्क्रियां विरहय्य न, विशेषशालिनी सत्क्रिया गुणानुरोधेन विना न प्रवर्त्तते ॥ १२ ॥

निरत्ययमिति । तस्य दुर्योधनस्य निरत्ययं निर्बाधम् । अमायिकमित्यर्थः । अन्यथा जनानां दुर्ग्रहत्वादिति भावः । साम सान्त्वम् । 'साम सान्त्वमुभे समे' इत्यमरः । दानवर्जितं न प्रवर्तते । अन्यथा लुब्धाद्यावर्जनस्य शुष्कप्रियैर्वाक्यैर्दुष्करत्वादिति भावः । उक्तं च—'लुब्धमर्थेन गृह्णीयात्साधुमञ्जलिकर्मणा । मूर्खं छन्दानुरोधेन तत्त्वार्थेन च पण्डितम् ।' इति । तथा भूरि प्रभूतम् । न तु कदाचित्स्वल्पमित्यर्थः दानं धनत्यागः । सदित्यादरार्थेऽव्ययम् । 'आदरानादरयोः सदसती' इति निपातसंज्ञास्मरणात् । तस्य क्रियां सत्क्रियां विरहय्य विहाय । 'ल्यपि लघुपूर्वात्' इत्ययादेशः । न प्रवर्तते । अनादर दानवैफल्यादिति भावः । न चैवं सर्वत्र, येनाविवेकित्वं कोशहानिश्च स्यादित्याह—प्रेति । विशेषशालिन्यतिशययोगिनी सत्क्रियादराक्रिया गुणानुरोधेन गुणानुरागेण विना न

प्रवर्तते । 'पृथग्विना-' इत्यादिना तृतीया । गुणेष्वेवादरो भूरिदानं चेति नोक्तदोषावकाश इत्यर्थः । अत्रोत्तरोत्तरस्य पूर्वपूर्वविशेषणतया स्थापनादेकावल्यलङ्कारः । तदुक्तं काव्यप्रकाशे—'स्थाप्यतेऽपोह्यते वापि यथापूर्वं परं परम् । विशेषणतया वस्तु यत्र सैकावली द्विधा' ॥ इति ॥

सुबो०—तस्य ( दुर्य्योधनस्य ) निरत्ययं ( निर्बाधम्, अविच्छेद्यं ) साम ( सन्धिः ) दानवर्जितं ( दानरहितं सत् ) न प्रवर्त्तते ( न भवति—स येन सह सन्धिं करोति तस्मै धनमपि ददातीत्यर्थः । भूरि ( प्रचुरं ) दानं सत्क्रियां विरहय्य ( समादरं परित्यज्य ) न प्रवर्त्तते ( प्रचुरमपि धनं समादरपूर्वकमेवासौ ददाति इत्यर्थः ) । विशेषशालिनी ( विशिष्टा ) सत्क्रिया ( समादरः ) गुणानुरोधेन ( गुणानुसारेण ) विना न प्रवर्त्तते ( गुणवत्स्वेव तस्य समादरपूर्वकं प्रभूतदानं दृश्यते इत्यर्थः १२॥

स०—निरत्ययं = नास्ति अत्ययः नाशः यस्य तत् । सत्क्रियाम् = सत् आदरः तस्य क्रिया ताम् । विशेषशालिनी = विशेषेण सह शालते शोभत इति ॥ १२ ॥

व्या०—" भेदो दण्डः साम दानमित्युपायचतुष्टयम् " इत्यमरः । विरहय्य = वि-रह+स्वार्थे णिच्+त्वा ल्यप् । विशेषशालिनीत्यत्र णिनिः । विशेषवर्त्तिनीति पाठे विशेषे देशकालयात्राणां भेदे वर्त्तते या सा ॥१२॥

वाच्य०—निरत्ययेन साम्ना....दानवर्जितेन....भूरिणा दानेन.... प्रवृत्यते....विशेषशालिन्या...सत्क्रियया ॥ १२ ॥

सरलार्थः—साम दानं भेदो दण्डश्चेति चतुर्षु उपायेषु असौ विविच्य येन सह सन्धिं करोति तस्मै धनमपि ददाति । स यदि गुणवान् भवति तदा सत्कारपूर्वकं प्रभूतं धनं ददाति ॥ १२ ॥

दण्डप्रकारमाह—

वसूनि वाञ्छन्न वशी न मन्युना
स्वधर्म इत्येव निवृत्तकारणः ।

गुरूपदिष्टेन रिपौ सुतेऽपि वा
निहन्ति दण्डेन स धर्मविप्लवम् ॥ १३ ॥

अन्वयः—वशी सः न वसूनि वाञ्छन् न मन्युना, निवृत्त-कारणः ( सन् ) स्वधर्म्म इति एव गुरूपदिष्टेन दण्डेन रिपौ सुते अपि वा धर्म्मविप्लवं निहन्ति ॥ १३ ॥

वसूनीति । वशी दुर्योधनो वसूनि धनानि वाञ्छन् । लोभान्नेत्यर्थः । 'वसु तोये धने मणौ' इति वैजयन्ती । निहन्तीति शेषः । तथा मन्युना कोपेन न च । 'मन्युर्दैन्ये क्रतौ क्रुधि' इत्यमरः । 'धर्मशास्त्रानुसारेण क्रोधलोभविवर्जितः' इति स्मरणादित्यर्थः किंतु निवृत्तकारणः निवृत्तलोभादिनिमित्तः सन्स्वधर्म इत्येव । स्वस्य राज्ञः सतो ममायं धर्मो ममेदं कर्तव्यमित्यस्मादेव हेतोरित्यर्थः । 'अदण्ड्यान्दण्डयन्राजा दण्डयांश्चैवाप्यदण्डयन् । अयशो महदाप्नोति नरकं चैव गच्छति ।' इति स्मरणादिति भावः । गुरूपदिष्टेन प्राड्विवाकोपदिष्टेन । 'धर्मशास्त्रं पुरस्कृत्य प्राड्विवाकमते स्थितः । समाहितमतिः पश्येद्व्यवहाराननुक्रमात् ।' इति नारदस्मरणात् । दण्डेन दमेन । शिक्षयेत्यर्थः । रिपौ सुतेऽपि वा । स्थितमिति शेषः । एतेनास्य समदर्शित्वमुक्तम् । धर्मविप्लवं धर्मव्यतिक्रमम् । अधर्ममिति यावत् । निहन्ति निवारयति । दुष्ट एवास्य शत्रुः शिष्ट एव बन्धुः । न तु सम्बन्धनिबन्धनः पक्षपातोऽस्तीत्यर्थः ।

सुबो०—वशी ( जितेन्द्रियः ) सः ( दुर्य्योधनः ) न वसूनि ( धनानि ) वाञ्छन् ( इच्छन्—न दण्डलभ्यधनलोभेन इत्यर्थः ) न मन्युना (न क्रोधेन) "अपि च" निवृत्तकारणः (स्नेह मात्सर्यादिहेतुहीनः सन् ) स्वधर्म्मः ( स्वस्य राज्ञो मम धर्म्म एवायम् ) इत्येव (एतावन्मात्रं बुद्ध्वा) गुरूपदिष्टेन ( गुरुणा प्राड्विवाकेन निर्दिष्टेन ) दण्डेन ( दमेन ) रिपौ सुतेऽपि वा ( शत्रौ वा पुत्रे वा ) धर्म्मविप्लवं ( धर्म्मव्यतिक्रमम्, अधर्म्माचरणं ) निहन्ति ( निवारयति ) ॥ २३ ॥

स० —निवृत्तकारणः = निवृत्तं कारणं यस्य सः। धर्मविप्लवं = धर्मस्य विप्लवं ॥ १३ ॥

व्या०—वशी = वश+इनि ॥ १३ ॥

वाच्य०—....वाञ्छता...वाशिना...निवृत्तकारणेन...निहन्यते...तेन धर्म्मविप्लवः ॥ १३ ॥

सरलार्थः—स दुर्य्योधनः लोभक्रोधस्नेहमात्सर्य्यादीनि परित्यज्य प्रधानामात्येन सह मन्त्रयित्वा यथाऽपराधं शत्रुं पुत्रं च यथाशास्त्रं दण्डयति ॥ १३ ॥

संप्रति अधिकृतेषु पुरुषेषु सद्व्यवहारं दर्शयन्नाह—

विधाय रक्षान्परितः परेतरा-
नशङ्किताकारमुपैति शङ्कितः ।
क्रियापवर्गेष्वनुजीविसात्कृताः
कृतज्ञतामस्य वदन्ति सम्पदः ॥ १४ ॥

अन्वयः—( सः ) परितः परेतरान् रक्षान् विधाय शङ्कितः ( सन् अपि ) अशङ्किताकारम् उपैति । क्रियापवर्गेषु अनुजीविसात्कृताः सम्पदः अस्य कृतज्ञतां वदन्ति ॥ १४ ॥

विधायेति । शङ्का सञ्जाताऽस्य शङ्कितोऽविश्वस्तः सन्परितः सर्वत्र स्वपरमण्डले परेतरानात्मीयान् । अवञ्चकानिति यावत् । यद्वा परानितरयन्ति भेदेनात्मसात्कुर्वन्तीति परेतरान् । तत्करोतीति ण्यन्तात्कर्मण्यण्प्रत्ययः । रक्षन्तीति रक्षान्रक्षकान् । मन्त्रगुप्तिसमर्थानित्यर्थः । 'नन्दिग्रहि-' इत्यादिना पचाद्यच् । विधाय कृत्वा । नियुज्येत्यर्थः । अशङ्किताकारमुपैति । स्वयमविश्वस्तोऽपि विश्वस्तवदेव व्यवहरन्परमुखेनैव परान्भिनत्तीत्यर्थः । न च तान्रक्षानुपेक्षते येन तेऽपि विकुर्वीरन्नित्याह—क्रियेति । क्रियापवर्गेषु कर्मसमाप्तिष्वनुजीविसात्कृता भृत्याधीनाः कृताः । अपरावर्तितया दत्ता इत्यर्थः । "देये त्रा च' इति सातिप्रत्ययः । सम्पदोऽस्य राज्ञः कृतज्ञतामुपकारित्वं वदन्ति । प्रीति-

दानैरेवास्य कृतज्ञत्वं प्रकाश्यते, न तु वाङ्मात्रेणेत्यर्थः। कृतज्ञ राजन्यनुजीविनोऽनुरज्यन्तेऽनुरक्ताश्च ते रक्षन्तीति भावः।

सुबो०—( सः ) परितः ( सर्वतः ) परेतरान् ( आत्मीयान् जनान् ) रक्षान् ( रक्षकान् ) विधाय ( कृत्वा, नियोज्य ) शङ्कितः ( तेषु अविश्वस्तः सन्नपि ) अशङ्किताकारं ( विश्वस्तवत् मुखभावादिकम् इङ्गितम् ) उपैति ( प्राप्नोति, प्रकाशयतीत्यर्थः )। क्रियापवर्गेषु ( युद्धादिकर्म्मणाम् अवसानेषु जयादिफलप्राप्तिषु च ) अनुजीविसात्कृताः ( भृत्याधीनाः कृताः, तत्तत्कर्म्माधिकृतेभ्यो भृत्येभ्यो दत्ताः ) सम्पदः ( जयादिलब्धाः पुरस्काररूपा वा द्रव्यादिसम्पत्तयः ) अस्य ( दुर्य्योधनस्य ) कृतज्ञतां ( मर्य्यादाभिज्ञतां ) वदन्ति ( सूचयन्ति ) ॥ १४ ॥

स०—रक्षान् = रक्षन्तीति तान्। परेतरान् = परेभ्य इतरे तान्। अशङ्किताकारम् = शङ्का जाता अस्येति शङ्कितः, न शङ्कित इत्यशङ्कितः तस्य आकारः तम्।

व्या०—रक्षान् = रक्ष+पचाद्यच्। विभज्य रक्षामिति पाठे एभिरयं देशो रक्षितव्य इति विभागं कृत्वा परेतरान् अशङ्किताकारं यथा स्यात् तथा उपैति आश्रयति। शङ्का + इतच्, उपैति = उप-इ + लट्। तिप्। "स्यादपवर्गस्त्यागे मोक्षे कार्य्यावसाने साफल्ये" इति मेदिनी। अनुजीविसात् = "देये त्रा च" इति सातिः ॥ १४ ॥

वाच्य०—...अशङ्किताकारः उपेयते शङ्कितेन।...अनुजीविसात्कृताभिः कृतज्ञता...उद्यते सम्पद्भिः ॥ १४ ॥

सरलार्थः०—स दुर्य्योधनः आत्मीयान् जनान् राज्यरक्षाकर्म्मणि नियुज्य तेषु सम्पूर्णविश्वासमकृत्वा सुगुप्तं तेषां कार्य्याणि पर्य्यालोचयन्नपि बाह्याकारैः विश्वासं प्रदर्शयति। कार्य्यावसाने जयलब्धद्रव्यजातैः पुरस्कारप्रदानेन वा तेषु कृतज्ञतां च प्रकाशयति ॥ १४ ॥

अथोपायप्रयोगस्य फलवत्तां दर्शयति—

अनारतं तेन पदेषु लम्भिता
विभज्य सम्यग्विनियोगसत्क्रियाः।
फलन्त्युपायाः परिबृंहितायती-
रुपेत्य सङ्घर्षमिवार्थसम्पदः। १५।

अन्वयः—तेन पदेषु विभज्य लम्भिताः सम्यग्विनियोगसत्क्रियाः उपायाः सङ्घर्षम् उपेत्य इव परिबृंहितायतीः अर्थसम्पदः अनारतं फलन्ति॥ १५॥

अनारतमिति। तेन राज्ञा पदेषूपादेयवस्तुषु। 'पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुषु' इत्यमरः। सम्यगसंकीर्णमव्यस्तं च विभज्य विविच्य। विनियोग एव सत्क्रियाऽनुग्रहः सत्कार इति यासां ता लम्भिताः। स्थानेषु सम्यक्प्रयुक्ता इत्यर्थः। उपायाः सामादयः। संघर्षं परस्परस्पर्धामुपेत्येवेत्युत्प्रेक्षा। परिबृंहितायतीः प्रचितोत्तरकालाः। स्थिरा इत्यर्थः। अर्थसम्पद अनारतमजस्रं फलन्ति। प्रसुवत इत्यर्थः।

सुबो०—तेन (दुर्योधनेन) पदेषु (स्थानेषु, योग्यपात्रेषु) विभज्य (विविच्य) लम्भिताः (पदं प्रापिताः, प्रयुक्ताः) सम्यग्विनियोगसत्क्रियाः (सम्यक् यथाशास्त्रं विनियोगः प्रयोग एव सत्क्रिया सत्कारः येषां तथा विधाः) उपायाः (सामदानभेददण्डाः) सङ्घर्षं (परस्परस्पर्द्धाम्) उपेत्य (प्राप्य इव) परिबृंहितायतीः (चिरस्थिरा इत्यर्थः) अर्थसम्पदः (धनसम्पत्तीः) अनारतं (सततं) फलन्ति (प्रसूयन्ते)॥ १५॥

समासः—विनियोगसत्क्रियाः=विनियोग एव सत्क्रिया येषां ते। परिबृंहितायतीः=परिबृंहिता उपचिता आयति उत्तरकालो यासां ताः, अर्थसम्पदः=अर्था एव सम्पदः ताः॥ १५॥

व्या०—लम्भिताः=लभ+णिच्+क्त॥ १५॥

वाच्य०—...लम्भितैः....सम्यग्विनियोगसत्क्रियैः फल्यन्ते उपायैः परिबृंहितायतयः....अर्थसम्पदः॥ १५॥

सरलार्थः०—समानैः सह सन्धिः कर्त्तव्यः, बलवत्तरेभ्यो दानं कर्त्तव्यम्, संहताः शत्रवो भेत्तव्याः हीनबलैः सह विग्रहः कार्य्यः इति नीतिशास्त्रानुसारेण विविच्य विहितैः सामाद्युपायैः हेतुभिः सः अनपायिनीः अर्थसम्पत्तीः लभते ॥ १५ ॥

अर्थसम्पत्प्रकारमाह—

अनेकराजन्यरथाश्वसंकुलं
तदीयमास्थाननिकेतनाजिरम्।
नयत्ययुग्मच्छदगन्धिरार्द्रतां
भृशं नृपोपायनदन्तिनां मदः ॥ १६ ॥

अन्वयः—अयुग्मच्छदगन्धिः नृपोपायनदन्तिनां मदः अनेकराजन्यरथाश्वसंकुलं तदीयम् आस्थाननिकेतनाजिरं भृशम् आर्द्रतां नयति ॥ १६ ॥

अनेकेति ॥ अयुग्मच्छदस्य सप्तपर्णपुष्पस्य गन्ध इव गन्धो यस्यासावयुग्मच्छदगन्धिः। 'सप्तम्युपमान—' इत्यादिना बहुव्रीहिरुत्तरपदलोपश्च। 'उपमानाच्च' इति समासान्त इकारः। नृपाणामुपायनान्युपहारभूता ये दन्तिनस्तेषां मदः। 'उपायनमुपग्राह्यमुपहारस्तथोपदा' इत्यमरः। राज्ञामपत्यानि पुमांसो राजन्याः क्षत्रियाः। 'राजश्वशुराद्यत्' इति यत्प्रत्ययः। राज्ञोऽपत्ये जातिग्रहणादण्। रथाश्चाश्वाश्च रथाश्वम्। सेनाङ्गत्वादेकवद्भावः। अनेकेषां राजन्यानां रथाश्वेन संकुलं व्याप्तं तदीयमास्थाननिकेतनाजिरं सभामण्डपाङ्गणं "अङ्गणं चत्वराजिरे" इत्यमरः। भृशमत्यर्थमार्द्रतां पङ्किलत्वं नयति। एतेन महासमृद्धिरस्योक्ता। अत एवोदात्तालङ्कारः। तथा चालङ्कारसूत्रम्—'समृद्धिमद्वस्तुवर्णनमुदात्तः' इति ॥

सुबो०—अयुग्मच्छदगन्धिः ( सप्तपर्णकुसुमगन्धिः ) नृपोपायनदन्तिनां ( नृपाणां राज्ञाम् उपायनानि उपहारभूता ये दन्तिनः गजाः तेषां ) मदः ( दानजलम् ) अनेकराजन्यरथाश्व-

संकुलम् ( अनेके बहवो राजन्याः क्षत्रियाः तेषां रथाश्वेन रथैरश्वैश्च संकुलं व्याप्तं ) तदीयं ( तस्य दुर्य्योधनस्य सम्बन्धि ) आस्थाननिकेतनाजिरं (सभामण्डपप्राङ्गणं) भृशम् ( अत्यन्तम् ) आर्द्रतां ( पङ्किलतां ) नयति ( प्रापयति ) ॥ १६ ॥

समासः--अयुग्मच्छदस्य गन्ध इव गन्धो यस्य सः। रथाश्च अश्वाश्च तेषां समाहारः रथाश्वम्, अनेकेषां राजन्यानां रथाश्वेन सङ्कुलमिति।

व्या०--अनेकराजन्यरथाश्वसंकुलमित्यत्र सेनाङ्गत्वात् नित्यः समाहारद्वन्द्वः। नयति=नी+लट् तिप्; द्विकर्म्मकत्वात् अजिरमिति मुख्यकर्म्म, आर्द्रतामिति गौणकर्म्म। अयुग्मच्छदगन्धिः="उपमानाच्च" इति समासान्त इप्रत्ययः ॥ १६ ॥

वाच्य०--...नीयते...मदेन।

सरलार्थः—प्रत्यहं बहवो राजानो बहून् मदमत्तान् गजान् तस्मै उपहरन्ति, येषां मदजलेन तस्य सभागृहाङ्गनम् आर्द्रतामापद्यते ॥ १६ ॥

संप्रति जनपदक्षेमकरत्वमाह—

सुखेन लभ्या दधतः कृषीवलै-
रकृष्टपच्या इव सस्यसंपदः।
वितन्वति क्षेममदेवमातृका-
श्चिराय तस्मिन्कुरवश्चकासते ॥ १७ ॥

अन्वयः—तस्मिन् क्षेमं वितन्वति ( सति ) अदेवमातृकाः कुरवः कृषीवलैः सुखेन लभ्याः अकृष्टपच्याः इव सस्यसम्पदः दधतः चिराय चकासते ॥ १७ ॥

सुखेनेति ॥ चिराय तस्मिन्दुर्योधने क्षेमं वितन्वति क्षेमंकरे सति। देवः पर्जन्य एव मातृका येषां ते देवमातृका वृष्ट्यम्बुजीविनो देशाः। ते न भवन्तीत्यदेवमातृकाः। नदीमातृका इत्यर्थः। 'देशो

नद्यम्बुवृष्ट्यम्बुसंपन्नव्रीहिपालितः। स्यान्नदीमातृको देवमातृकश्च यथाक्रमम्॥' इत्यमरः। एतेनास्य कुल्यादिपूर्तप्रवर्तकत्वमुक्तम्। कुरूणां निवासाः कुरवो जनपदविशेषाः। कृष्टेन पच्यन्त इति कृष्टपच्याः। 'राजसूय—' इत्यादिना कर्मकर्तरि क्यप्प्रत्ययान्तो निपातः। तद्विपरीतो अकृष्टपच्या इव। कृषिर्येषामस्तीति कृषीवलैः। कर्षकैरित्यर्थः। 'रजः कृषि—' आदिना वलच् प्रत्ययः। 'वले' इति दीर्घः। सुखेनाक्लेशेन लभ्या लब्धुं शक्याः सस्यसंपद दधतो धारयन्तः। 'नाभ्यस्ताच्छतुः' इति नुमागमप्रतिषेधः। चकासते। सर्वोत्कर्षेण वर्तन्त इत्यर्थः। 'अदभ्यस्तात्' इति झेरदादेशः। 'जक्षित्यादयः षट्' इत्यभ्यस्तसंज्ञा। संपन्नजनपदत्वादसन्तापकरत्वाच्च दुःसाध्योऽयमिति भावः॥

सुबो०—तस्मिन् ( दुर्योधने ) क्षेमं ( कूपकुल्यादिपूर्त्तकर्म्मविधानरूपं शुभं ) वितन्वति ( कुर्वति सति ) अदेवमातृकाः ( वृष्टिजलनिरपेक्षाः ) कुरवः ( कुरुदेशाः ) कृषीवलैः (कृषकैः) सुखेन ( अक्लेशेन ) लभ्याः अतएव ) अकृष्टपच्याः इव ( कर्षणं विनैव फलपतीरिव ) सस्यसम्पदः ( सस्यसमृद्धीः ) दधतः ( धारयन्तः सन्तः ) चिराय ( चिरं कालं व्याप्य, सर्वदैव ) चकासते ( शोभन्ते ) ॥ १७ ॥

समासः—कृषीवलैः=कृषिरेषामस्तीति तैः। लब्धुं शक्या लभ्याः, अकृष्टपच्याः=कृष्टे स्वयमेव पच्यन्त इति कृष्टपच्या न कृष्टपच्या अकृष्टपच्याः। सस्यसम्पदः=सस्यस्य सम्पत् ताः, अदेवमातृकाः=देवो माता मातृवत् पोषयिता येषां ते देवमातृकाः तथा न भवन्तीति।

व्या०—दधतः=धा+शतृ। कृषि+वल, "वले" इति दीर्घः, अकृष्टपच्याः=इत्यत्र कर्म्मकर्त्तरि क्यप्, वितन्वति=वि-तन+शतृ। चिरायेत्यव्ययम्। चकासते=च कास×लट् झ ( अते ) ॥ १७ ॥

वाच्य०—...दधद्भिः...अदेवमातृकैः...कुरुभिः कास्यते ॥ १७ ॥

सरलार्थः—नदीप्रवाहवर्द्धन कूपकुल्यादिपूर्त्तकर्म्मविधानद्वारा तस्य राज्यं सदैव शस्यसमृद्धिसम्पन्नं सत् विराजते ॥ १७ ॥

प्रजासुखसाधनार्थमेवं प्रभूतव्ययं कुर्वतोऽपि तस्य प्रभूत आयोऽस्तीत्याह—

उदारकीर्तेरुदयं दयावतः
प्रशान्तबाधं दिशतोऽभिरक्षया।
स्वयं प्रदुग्धेऽस्य गुणैरुपस्तुता
वसूपमानस्य वसूनि मेदिनी ॥ १८ ॥

अन्वयः—उदारकीर्तेः दयावतः अभिरक्षया प्रशान्तबाधम् उदयं दिशतः वसूपमानस्य अस्य गुणैः उपस्तुता मेदिनी वसूनि स्वयं प्रदुग्धे ॥ १८ ॥

उदारेति ॥ उदारकीर्तेर्महायशसः। 'उदारो दातृमहतोः' इत्यमरः। दयावतः परदुःखप्रहाणेच्छोः। अत एव प्रशान्तबाधं प्रशमितोपद्रवं यथा स्यात्तथेति क्रियाविशेषणम्। उदयविशेषणं वा। 'वा दान्त-शान्त-' इत्यादिना शमिधातोर्ण्यन्ताक्तिष्ठान्तो निपातः। अभिरक्षया सर्वतस्त्राणेनोदयं वृद्धिं दिशतः संपादयतो वसूपमानस्य कुबेरोपमस्य। 'वसुर्मयूखाग्निधनाधिपेषु' इति विश्वः। अस्य दुर्योधनस्य गुणैर्दयादाक्षिण्यादिभिरुपस्तुता द्राविता मेदिनी वसूनि धनानि। 'वसु तोये धने मणौ' इति वैजयन्ती। स्वयं प्रदुग्धे। अक्लेशेन दुह्यत इत्यर्थः। दुहेः कर्मकर्तरि लट्॥ 'न दुहस्नुनमां यक्चिणौ' इति यक्प्रतिषेधः। यथा केनचिद्विदग्धेन नवप्रसूता रक्षिता च गौः स्वयं प्रदुग्धे तद्वदिति भावः। अलंकारस्तु—'विशेषणमात्रसाम्यादप्रस्तुतस्य गम्यत्वे समासोक्तिः' इति सर्वस्वकारः। अत्र प्रतीयमानया गवा सह प्रकृताया मेदिन्या भेदेऽभेदलक्षणातिशयोक्तिवशादपोत्वेनोक्तिरिति संक्षेपः॥

सुबो०—उदारकीर्तेः ( महायशसः ) दयावतः ( परदुःखापहरणेच्छोः ) अभिरक्षया ( सर्वतोरक्षणेन हेतुना ) प्रशान्तबाधम् ( उपद्रवशून्यम् ) उदयम् ( उन्नतिं ) दिशतः ( सम्पादयतः ) वसूपमानस्य ( धार्मिकतया उपरिचरवसुसदृशस्य ) अस्य

( दुर्य्योधनस्य ) गुणैः ( दयादाक्षिण्यादिभिर्हेतुभिः ) उपस्तुता ( क्षरिता ) मेदिनी ( पृथिवी ) वसूनि ( धनानि ) स्वयम् ( आत्मना ) प्रदुग्धे ( प्रपूरयति ) ॥ १८ ॥

समासः—उदारकीर्तेः=उदारा कीर्तिर्यस्य तस्य उदारकीर्तेः । प्रशान्तबाधं=प्रशान्ता बाधा यस्य तं । अभिरक्षया=अभितः रक्षा तया वसूपमानस्य=वसुः उपमानं यस्य तस्य ।

व्या०—प्रदुग्धे=प्र-दुह+कर्म्मकर्त्तरि लट् त, ( ते ) " न दुहस्नुनमां यक्चिणौ " इति यक्प्रतिषेधः, " दुहिपच्योर्बहुलं सकर्म्मकयोः " इति वसूनीति कर्म्मणः प्रयोगः ॥ १८ ॥

वाच्य०—...प्रदुह्यते ..उपस्तुतया...मेदिन्या ॥ १८ ॥

सरलार्थः—प्रजारक्षणपरायणतया पूर्त्तकर्म्मादिभिः राज्यस्योन्नतिं विदधते तस्मै राज्यस्थाः प्रजाः स्वेच्छया अतिरिक्तं करं ददति ॥ १८ ॥

वीरभटानुकूल्यमाह—

महौजसो मानधना धनार्चिता
धनुर्भृतः संयति लब्धकीर्तयः ।
नसंहतास्तस्य नभिन्नवृत्तयः
प्रियाणि वाञ्छन्त्यसुभिः समीहितुम् ॥ १९ ॥

अन्वयः—महौजसः मानधनाः धनार्चिताः संयति लब्धकीर्त्तयः धनुर्भृतः नसंहताः नभिन्नवृत्तयः (सन्तः) असुभिः तस्य प्रियाणि समीहितुं वाञ्छन्ति ॥ १९ ॥

महौजस इति ॥ महौजसो महाबलाः । अन्यथा दुर्बलानामनुपकारित्वादिति भावः । मानः कुलशीलाद्यभिमान एव धनं येषां ते मानधनाः । अन्यथा कदाचिद्बलदर्पाद्विकुर्वीरन्निति भावः । धनार्चिता धनैरर्चिताः सत्कृता । अन्यथा दारिद्र्यादेनं जह्युरिति भावः । संयति सङ्ग्रामे लब्धकीर्तयः । बहुयशस इत्यर्थः । अन्यथा कदाचिन्मुह्येयुरिति भावः । संहता मिथः संगताः स्वार्थनिष्ठा न

भवन्तीति न संहताः। नञर्थस्य न शब्दस्य सुप्सुपेति समासः। भिन्नवृत्तयो मिथोविरोधात्स्वामिकार्यकरा न भवन्तीति नभिन्नवृत्तयः। पूर्ववत्समासः। अन्यथा स्वामिकार्यविघातकतया स्वामिद्रोहिणः स्युरित्युभयत्रापि तात्पर्यार्थः। धनुर्भृतो धानुष्काः। आयुधीयमात्रोपलक्षणमेतत्। प्राधान्याद्धनुर्ग्रहणम्। तस्य दुर्योधनस्यासुभिः प्राणैः प्रियाणि समीहितुं कर्तुं वाञ्छन्ति। आनृण्यार्थं प्राणान्दातुमिच्छन्ति। अन्यथा दोषस्मरणादिति भावः। अत्र महौजसादिपदार्थानां प्राणदानकर्तव्यतां प्रति विशेषणगत्या हेतुत्वाभिधानात्काव्यलिङ्गमलङ्कारः। लक्षणं तूक्तम्। तथा साभिप्रायविशेषणत्वात्परिकरालङ्कार इति द्वयोस्तिलतण्डुलवद्विभक्ततया स्फुरणात्संसृष्टिः॥

सुबो०—महौजसः (महाबलाः) मानधनाः (प्रियसत्काराः) धनार्चिताः (अन्तरा अन्तरा दुर्योधनेन धनेन सम्मानिताः) संयति (युद्धे) लब्धकीर्त्तयः (अर्जितयशसः) धनुर्भृतः (योद्धारः) नसंहताः (कदाचित् पृथग्भूता अपि) नभिन्नवृत्तयः (प्रभुकार्यसाधनार्थम् एकमतावलम्बिनः सन्तः) असुभिः (स्वकीयप्राणैः, प्राणपणेन) तस्य (दुर्योधनस्य) प्रियाणि (हितानि) समीहितुं (साधयितुं) वाञ्छन्ति (इच्छन्ति)॥ १९॥

स०—महौजसः=महत् ओजो येषान्ते। मानधनाः=मान एव सम्मान एव धनं येषां ते। धनुर्भृतः=धनूंषि बिभ्रतीति। धनार्चिताः=धनैरर्चिताः। लब्धकीर्तयः=लब्धा कीर्तिर्येस्ते। नभिन्नवृत्तयः=न भिन्ना वृत्तिर्येषान्ते।

व्या०—धनुर्भृतः=धनु+भृ+क्विप्। नसंहताः-नञर्थस्य सुप्सुपेति समासः। नभ्रभेदेवृत्तय इति पाठ तरम्॥ १९॥

वाच्य०—महोजोभिः धनार्चितैः धनुर्भृद्भिः... लब्धकीर्त्तिभिः नसंहतैः ...नभिन्नवृत्तिभिः...वाञ्छन्ते..॥ १९॥

सरलार्थः—तस्य महाबलशालिनोऽनेकयुद्धविजयिनोयोद्धारो धनमानैरर्चिताः सन्तः परस्परमेकमतावलम्बिनः सन्तः प्राणपणेन हितानि कुर्वन्ति॥ १९॥

परराष्ट्रवृत्तान्तं स वेत्ति, तद्राष्ट्रवृत्तान्तं तु अन्ये न विदुरित्याह—

महीभृतां सच्चरितैश्चरैः क्रियाः
स वेद निःशेषमशेषितक्रियः ।
महोदयैस्तस्य हितानुबन्धिभिः
प्रतीयते धातुरिवेहितं फलैः ॥ २० ॥

अन्वयः—अशेषितक्रियः सः सच्चरितैः चरैः महीभृतां क्रियाः निःशेषं वेद । धातुः इव तस्य ईहितं महोदयैः हितानुबन्धिभिः फलैः प्रतीयते ॥ २० ॥

महीभृतामिति ॥ अशेषितक्रियः समापितकृत्यः । आफलोदयकर्मेत्यर्थः । स दुर्योधनः सच्चरितैः शुद्धचरितैः । अवञ्चकैरित्यर्थः । चरन्तीति चरास्तैश्चरैः प्रणिधिभिः । पचाद्यच् । महीभृतां क्रियाः प्रारम्भान्निःशेषं वेद वेत्ति । 'विदो लटो वा' इति णलादेशः । स्वरहस्यं तु न कश्चिद्वेदेत्याह—महोदयैरिति । धातुरिव तस्य दुर्योधनस्येहितमुद्योगो महोदयैर्महावृद्धिभिः । हितमनुबध्नन्त्यनुरुन्धन्तीति हितानुबन्धिभिः । स्वन्तैरित्यर्थः । फलैः कार्यसिद्धिभिः प्रतीयते ज्ञायते । फलानुमेयास्तस्य प्रारम्भा इत्यर्थः ॥

सुबो०—अशेषितक्रियः ( अशेषिताः समापिताः क्रियाः स्व राष्ट्ररक्षणकृत्यानि येन तथाभूतः ) सः ( दुर्य्योधनः ) सच्चरितैः ( सद्वृत्तैः ) चरैः ( प्रणिधिभिः ) महीभृताम् ( अन्येषां राज्ञां ) क्रियाः ( आरम्भान् ) निःशेषं ( सम्पूर्णं ) वेद ( जानाति ) । धातुः ( स्रष्टुः ) इव तस्य ( दुर्य्योधनस्य ) ईहितं ( चेष्टितम्, उद्योगः ) महोदयैः ( सातिशयवृद्धिमद्भिः ) हितानुबन्धिभिः ( स्वराष्ट्रहितकरैः ) फलैः प्रतीयते ( अन्यैः ज्ञायते ) ॥ २० ॥

स०—अशेषितक्रियः=अशेषिता क्रिया यस्य सः । चरन्तीति चरैः । महीभृतां=महीं बिभ्रतीति तेषां । महोदयैः=महान् उदयो येषां तैः । हितानुबन्धिभिः=हितमनुबन्धन्तीति तैः ।

व्या०—महाभुजामिति पाठान्तरम् चरैः=करणे तृतीया । वेद=विद+लट् तिप्, पक्षे वेत्ति । प्रतीयते=प्रति=इ+कर्म्मणि लट् त (ते) ॥ २० ॥

वाच्य०—....क्रियाः तेन विद्यन्ते....अशेषितक्रियेण ।....प्रतियन्ति (अन्ये)....ईहितं....॥ २० ॥

सरलार्थः—स स्वराष्ट्ररक्षां सर्वतो विधाय गुप्तचरैः परेषां राज्ञां क्रियाकलापं जानाति । यथा विधातृचेष्टितं, फलं दृष्ट्वा सर्वे जानन्ति न तु तत् पूर्वम् ; तथा तस्य चेष्टितानि फलानि दृष्ट्वा अन्ये जानन्ति, न तु तत् पूर्वम् । यथा रघुवंशे—" तस्य संवृतमन्त्रस्य गूढाकारेङ्गितस्य च । फलानुमेयाः प्रारम्भाः संस्काराः प्राक्तना इव " इति ॥ २० ॥

मित्रबलमाह—

न तेन सज्यं क्वचिदुद्यतं धनुः
कृतं न वा कोपविजिह्ममाननम् ।
गुणानुरागेण शिरोभिरुह्यते
नराधिपैर्माल्यमिवास्य शासनम् ॥ २१ ॥

अन्वयः—तेन क्वचित् सज्यं धनुः न उद्यतम् । आननं वा कोपविजिह्मं न कृतम् । गुणानुरागेण नराधिपैः अस्य शासनं माल्यम् इव शिरोभिः उह्यते ॥ २१ ॥

नेति ॥ तेन राज्ञा क्वचित्कुत्रापि । सह ज्यया मौर्व्या सज्यम् । 'मौर्वी ज्या शिञ्जिनी गुणः' इत्यमरः । तेन सहेति तुल्ययोगे' इति बहुव्रीहिः । धनुर्नोद्यतं नोर्ध्वीकृतम् । आननं वा कोपविजिह्मं कोपकुटिलं न कृतम् । यस्य कोप एव नोदेति कुतस्तस्य युद्धप्रसक्तिरिति भावः । कथं तर्ह्याज्ञां कारयति राज्ञ इत्याशङ्क्याह—गुणेति । गुणेषु दयादाक्षिण्यादिष्वनुरागेण प्रेम्णा । माल्यपक्षे सूत्रानुषङ्गेण । यद्वा सौरभ्यगुणलोभेन । नराधिपैरस्य शासनमाज्ञा । मालैव माल्यं तदिव । 'चातुर्वर्ण्यादित्वात्स्वार्थे ष्यञ्' इति क्षीरस्वामी । शिरोभिरुह्यते । धार्यते । 'वचिस्वपियजादीनां किति' इति यकि संप्रसारणम् । अत्रोपमा स्फुटैव ॥

सुबो०—तेन ( दुर्य्योधनेन ) क्वचित् ( कुत्रापि ) सज्यं ( मौर्वीसहितं ) धनुः न उद्यतं ( न उन्नमितम् )। आननं (मुखं) वा कोपविजिह्मं ( क्रोधकुटिलं ) न कृतम्। ( तथापि ) गुणानुरागेण ( दयादाक्षिण्यादिगुणपक्षपातितया, माल्यपक्षे सौरभ्य गुणलोभेन ) नराधिपैः ( राजभिः ) अस्य ( दुर्य्योधनस्य ) शासनम् ( आज्ञां ) माल्यम् इव शिरोभिः ( मस्तकैः ) उह्यते ( धार्य्यते ) ॥ २१ ॥

स०—सज्यं=ज्यया सह वर्तमानम्। कोपविजिह्मं=कोपेन विजिह्मम्। गुणानुरागेण=अनुरज्यत इत्यनुरागः गुणेषु अनुरागः तेन। नराधिपैः=अधि=पान्ति रक्षन्तीत्यधिपाः नराणामधिपास्तैः।

व्या०—उद्यतम्=उद्-यम+कर्मणि क्त। उह्यते=वह+कर्म्मणि लट् त ( ते )। माल्यम्=माला+स्वार्थे ष्यञ् ॥ २१ ॥

वाच्य०—....सः....उद्यतवान्....कृतवान्....।....वहन्ति नराधिपाः....॥ २१ ॥

सरलार्थः—स युद्धार्थमुद्यतो न भवति, न वा क्रोधं प्रकाशयति, तथापि सर्वे राजानः गुणानुरक्ता एव तस्याज्ञाम् अवनतमस्तकाः सन्तः पालयन्ति ॥ २१ ॥

संप्रत्यस्य धार्मिकत्वमाह—

स यौवराज्ये नवयौवनोद्धतं
निधाय दुःशासनमिद्धशासनः।
मखेष्वखिन्नोऽनुमतः पुरोधसा
धिनोति हव्येन हिरण्यरेतसम् ॥ २२ ॥

अन्वयः—इद्धशासनः सः नवयौवनोद्धतं दुःशासनं यौवराज्ये निधाय पुरोधसा अनुमतः अखिन्नः ( सन् ) मखेषु हव्येन हिरण्यरेतसं धिनोति ॥ २२ ॥

स इति ॥ इद्धशासनोऽप्रतिहताज्ञः स दुर्योधनो नवयौवनेनोद्धतं प्रगल्भम्। धुरन्धरमित्यर्थः। दुःखेन शास्यत इति दुःशासनस्तम्। 'भाषायां शासियुधि—' इत्यादिना खलर्थे युच्प्रत्ययः। यौवराज्ये युवराजकर्मणि। ब्राह्मणादित्वात्ष्यञ्। निधाय। नियुज्येत्यर्थः। पुरोधसा पुरोहितेनानुमतोऽनुज्ञातः। तस्मिन्याजके सतीत्यर्थः। तदुल्लङ्घने दोषस्मरणादिति भावः। 'निष्ठा' इति भूतार्थे क्तः। न तु 'मतिबुद्धि—' इत्यादिना वर्तमानार्थे। अन्यथा 'पुरोधसा' इत्यत्र 'क्तस्य च वर्तमाने' इति षष्ठी स्यात्। अखिन्नोऽनलसो मखेषु क्रतुषु हव्येन हविषा। हिरण्यं रेतो यस्य तं हिरण्यरेतसमनलं धिनोति प्रीणयति। धिन्वेः प्रीणनार्थात् 'धिन्विकृण्व्योर च' इत्युप्रत्ययः। अकारश्चान्तादेशः॥

सुबो०—इद्धशासनः (अव्याहताज्ञः) सः (दुर्य्योधनः) नवयौवनोद्धतं (नवेन यौवनेन उद्धतं प्रगल्भं, राज्यभारवहनक्षममित्यर्थः) दुःशासनं (तन्नामानं द्वितीयसहोदरं) यौवराज्ये (युवराजकर्म्मणि) निधाय (नियोज्य) पुरोधसा (पुरोहितेन) अनुमतः (आदिष्टः) अखिन्नः (अनलसः सन्) मखेषु (यज्ञेषु) हव्येन (हविषा) हिरण्यरेतसम् (अग्निं) धिनोति (प्रीणयति)॥ २२॥

स०—इद्धशासनः=इद्धं दीप्तं शासनं यस्य सः। नवयौवनोद्धतम्=नवीनञ्च तत् यौवनं नवयौवनं, तेन उद्धतम्। दुःशासनम्=दुःखेन शास्यत इति दुःशासनः तम्। यौवराज्ये=युवराजस्य भावः कर्म वा यौवराज्यं तस्मिन्। हिरण्यरेतसम्=हिरण्यं रेतो यस्य तम् पुरोधसा=पुरोधीयत इति तेन।

व्या०—निधायेत्यत्र विधायेति पाठान्तरम्। दुःशासनम्=दुर-शास+कर्म्मणि खलर्थे युच् (अन)। इद्धशासनः=इन्ध+क्त=इद्ध। खिन्नः=खिद+क्त। अनुमतः=अनु-मन+कर्म्मणि अतीते क्त। पुरोधसा=पुरस्-धा+असुन्। धिनोति=धिवि+लट् तिप् हव्येन=हु+यत्।

वाच्य०—तेन...इद्धशासनेन...अखिन्नेन अनुमतेन धिन्व्यते...हिरण्यरेताः॥ २२॥

सरलार्थः —स स्वकौशलेन राज्यं स्थिरतरं कृत्वा देवताप्रसादेन स्थिरतमं कर्त्तुं दुःशासनं यौवराज्ये अभिषिच्य इदानीं पुरोहितेन सहितः सर्वदा विविधान् यज्ञान् अनुतिष्ठति ॥ २२ ॥

न चैतावता भवता निरुत्साहेन भाव्यमित्याशां प्रदर्शयति—

प्रलीनभूपालमपि स्थिरायति
प्रशासदावारिधि मण्डलं भुवः ।
स चिन्तयत्येव भियस्त्वदेष्यती-
रहो दुरन्ता बलवद्विरोधिता ॥ २३ ॥

अन्वयः—सः प्रलीनभूपालं स्थिरायति आवारिधि भुवः मण्डलम् प्रशासत् अपि त्वत् एष्यतीः भियः चिन्तयति एव । अहो बलवद्विरोधिता दुरन्ता ॥ २३ ॥

प्रलीनेति ॥ स दुर्योधनः प्रलीनभूपालम् । निःसपत्नमित्यर्थः । स्थिरायति । चिरस्थायीत्यर्थः । भुवो मण्डलमावारिधिभ्य आवारिधि। 'आङ्मर्यादाभिविध्योः' इत्यव्ययीभावः। प्रशासदाज्ञापयदपि। 'जक्षित्यादयः षट्' इत्यभ्यस्तसंज्ञा । 'नाभ्यस्ताच्छतुः' इति नुमागमप्रतिषेधः। त्वत्त्वत्त एष्यतीरागमिष्यतीः। धातूनामनेकार्थत्वादुक्तार्थसिद्धिः । अथवाङ्पूर्वः पाठः । 'एत्येधत्यूठ्सु' इति वृद्धिः । 'लटः सद्वा' इति शतृप्रत्ययः । 'उगितश्च' इति ङीप् । 'आच्छीनद्योर्नुम्' इति विकल्पान्नुमभावः । भियो भयहेतून् । विपद इत्यर्थः । चिन्तयत्यालोचयत्येव । स एवाह—अहो बलवद्विरोधिता दुरन्ता दुष्टावसाना । सार्वभौमस्यापि प्रबलैः सह वैरायमाणत्वमनर्थपर्यवसाय्येवेति तात्पर्यम् । सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः॥

सुबो०—सः ( दुर्य्योधनः ) प्रलीनभूपालं ( निष्कण्टकं ) स्थिरायति ( चिरस्थायि ) आवारिधि ( आसमुद्रं, ससागरं ) भुवो मण्डलं ( पृथिवीमण्डलं ) प्रशासत् ( प्रकर्षेण आज्ञाधीनं कुर्वन् ) अपि त्वत् ( भवत्सकाशात् ) एष्यतीः ( प्राप्स्यतीः, उपस्थास्यतीः ) भियः ( पराभवभीतीः ) चिन्तयति एव ( सततं

चिन्तयन् वर्त्तते)। अहो बलवद्विरोधिता (बलवता धनेन विरोधः) दुरन्ता, दुष्परिणामा, मन्दफला भवति)॥ २३॥

स०—प्रलीनभूपालम्=प्रलीनाः=स्वमुष्टिगता भूपाला यस्मिन् तत्। स्थिरायति=स्थिरा आयतिः उत्तरकालो यस्य तत्। आवारिधि=आ वारिधिभ्य इत्यावारिधि।

व्या०—प्रशासत्=प्र-शास+शतृ। आवारिधि=आ वारिधिभ्यः इत्यव्ययीभावः। एष्यतीः=इ+लृटः शतृ॥ २३॥

वाच्य०—...प्रशासता...तेन चिन्त्यन्ते...एष्यत्यः।....दुरन्तया बलवद्विरोधितया भूयते॥ २३॥

सरलार्थः—स आसमुद्रक्षितीशोऽपि त्वत्तो बिभेत्येव। बलवता सह विरोधः परिणामविरसो भवति॥ २३॥

ननु गूढाकारेङ्गितस्य तस्य मत्तोभयं कथं त्वया निर्द्धारितमित्याह—

कथाप्रसङ्गेन—जनैरुदाहृता-
दनुस्मृताखण्डलसूनुविक्रमः।
तवाभिधानाद्व्यथते नताननः
स दुःसहान्मन्त्रपदादिवोरगः॥ २४॥

अन्वयः—कथाप्रसङ्गेन जनैः उदाहृतात् तव अभिधानात् अनुस्मृताखण्डलसूनुविक्रमः (सः) सुदुःसहात् मन्त्रपदात् उरगः इव नताननः (सन्) व्यथते॥ २४॥

कथेति। कथाप्रसङ्गेन गोष्ठीवचनेन जनैः। अन्यत्र कथाप्रसङ्गेन विषवैद्येन। 'कथाप्रसङ्गो वार्तायां विषवैद्येऽपि वाच्यवत्' इति विश्वः। एकवचनस्यातन्त्रत्वाज्जनविशेषणम्। उदाहृतादुच्चारितात्तवाभिधानान्नामधेयात्स्मारकाद्धेतोः। 'हेतौ' इति पञ्चमी। 'आख्याह्वे अभिधानं च नामधेयं च नाम च' इत्यमरः। अन्यत्र तवाभिधानात्। 'नामैकदेशग्रहणे नाममात्रग्रहणम्' इति न्यायात्तश्च वश्च तवौ तार्क्ष्यवासुकी तयोरभिधानं यस्मिन्पदे तस्मात्। यद्वा कथाप्रसङ्ग इनाश्च ते जनाश्चेत्येकं पदम्। अनुस्मृताखण्डलसू-

नुविक्रमः स्मृतार्जुनपराक्रमः सन्दुःसहादतिदुःसहान्मन्त्रपदान्मन्त्रशब्दात्स्मारकाद्धेतोः। आखण्डलसुनूरिन्द्रानुजः। उपेन्द्रो विष्णुरिति यावत्। 'सुनुः पुत्रेऽनुजे रवौ' इति विश्वः। तस्य विः पक्षी। गरुड़ इत्यर्थः। तस्य क्रमः पादविक्षेपः। सोऽनुस्मृतो येन स तथोक्तः स्मृतगरुडमहिमा। उरग इव। नताननः सन्। व्यथते दुःखायते। 'पीडा बाधा व्यथा दुःखम्' इत्यमरः। अत्युत्कटभयदोषादिविकारो दुर्वार इति भावः। 'सर्वतो जयमन्विच्छेत्पुत्रादिच्छेत्पराजयम्' इति न्यायादर्जुनोत्कर्षकथनं युधिष्ठिरस्य भूषणमेवेति सर्वमवदातम्।

सुबो०—कथाप्रसङ्गेन ( गोष्ठीवचनानुक्रमेण ) जनैः ( सभास्थितैः लोकैः ) उदाहृतात् ( उच्चारितात् ) तव अभिधानात् ( नामधेयात् हेतोः ) अनुस्मृताखण्डलसूनुविक्रमः ( अनुस्मृतः अनुध्यातः आखण्डलस्य इन्द्रस्य सूनोः पुत्रस्य अर्जुनस्य विक्रमः पराक्रमो येन तथाभूतः स दुर्योधनः ) सुदुःसहात् ( सोढुमशक्यात् ) मन्त्रपदात् ( विपनाशकमन्त्रगतशब्दात् हेतोः ) उरगः ( सर्पः ) इव नताननः ( अधोमुखः सन् ) व्यथते ( क्लेशमनुभवति ) ॥ २४ ॥

सर्पपक्षे—कथाप्रसङ्गेनजनैः ( कथाप्रसङ्गा विषवैद्याः तेषाम् इनाः प्रभवः श्रेष्ठा इत्यर्थः ते च ते जनाश्च तैः, विषवैद्योत्तमैः जनैः ) उदाहृतात् ( उच्चारितात् ) तवाभिधानात् ( 'नामैकदेशग्रहणे नाममात्रग्रहण' मिति न्यायात् 'आ—का—मा—वैष्वनन्तक' मित्यादिवत् (१) तः तार्क्ष्यः गरुड़ इत्यर्थः, वः वासुकिः, तश्च वश्च तवौ, तयोरभिधानं नामधेयं यस्मिन् तस्मात् ) सुदुःसहात् मन्त्रपदात् ( मन्त्ररूपवाक्यात्—मन्त्रपदमुपश्रुत्य—ल्यब्लोपे पञ्चमी ) अनुस्मृताखण्डलसूनुविक्रमः ( अनुस्मृतः आखण्डलस्य इन्द्रस्य सूनुः अनुजः इन्द्रावरजो विष्णुरिति यावत् तस्य विःपक्षी गरुड़ इत्यर्थः तस्य क्रमः आक्रमणं येन तथाभूतः ) उरगः (सर्पः) नताननः सन् व्यथते ।

कोषः—'कथाप्रसङ्गो वार्त्तायां विषवैद्येऽपि वाच्यवत्' इति विश्वः । 'इनः सूर्ये प्रभौ' इत्यमरः । 'इनः पत्यौ नृपार्कयो' रिति च मेदिनी । 'आखण्डलः सहस्राक्षः' इति इन्द्रपर्य्याये अमरः । 'सूनुः पुत्रेऽनुजेऽर्केना' इति मेदिनी । 'उपेन्द्र इन्द्रावरजश्चक्रपाणिश्चतुर्भुजः' इति विष्णुपर्य्याये अमरः । 'वि–विष्किर-पतत्रयः' इति पक्षिपर्य्याये अमरः । 'क्रमश्चानुक्रमे शक्तौ कल्पे चाक्रमणेऽपि च' इति मेदिनी । 'पदं शब्दे च वाक्ये च व्यवसायप्रदेशयोः' इति मेदिनी ॥ २४ ॥

(१) आ=आषाढः । का=कार्त्तिकः । वै=वैशाखः । एषु दानम् अनन्तफलकं भवतीत्यर्थः ।

समा०—कथाप्रसङ्गेन=कथानां प्रसङ्गस्तेन । अनुस्मृताखण्डलसूनुविक्रमः=आखण्डलस्य सूनुः आखण्डलसूनुः, तस्य विक्रमः आखण्डलसूनुविक्रमः, अनुस्मृतः आखण्डलसूनुविक्रमो येन सः । नताननः=नतम् आननं यस्य सः । मन्त्रपदात्=मन्त्रस्य पदं तस्मात् ।

व्या०—व्यथते=व्यथ+लट् । सुदुःसहात्=सु-दुर्-सह+खल् । उरगः=उरसा गच्छतीति उरस्-गम्+ड, सलोपः ॥ २४ ॥

वाच्य०—....अनुस्मृताखण्डलसूनुविक्रमेण....व्यथ्यते नताननेन.... उरगेण ।

सरलार्थः—कथाप्रसङ्गात् यदि कश्चित् भवतो नाम कथयति तदा तत् श्रुत्वाऽसौ अर्जुनस्य पराक्रमं संस्मृत्य, विषहरमन्त्रश्रवणात् विषधरो यथा अधोमुखः सन् व्यथते, तथाऽधोमुखः सन् व्यथामनुभवति ॥ २४ ॥

युद्धाय प्रवर्त्तयति—

तदाशु कर्तुं त्वयि जिह्ममुद्यते
विधीयतां तत्र विधेयमुत्तरम् ।
परप्रणीतानि वचांसि चिन्वतां
प्रवृत्तिसाराः खलु मादृशां गिरः ॥ २५ ॥

अन्वयः—तत् त्वयि जिह्मं कर्त्तुम् उद्यते तत्र विधेयम् उत्तरं आशु विधीयताम् । परप्रणीतानि वचांसि चिन्वतां मादृशां गिरः प्रवृत्तिसाराः खलु ॥ २५ ॥

तदिति । तत्तस्मात्त्वयि जिह्मं कपटं कर्तुमुद्यते । त्वां जिघांसावित्यर्थः । तत्र तस्मिन्दुर्योधने विधेयं कर्तव्यमुत्तरं प्रतिक्रियाशु विधीयतां क्रियताम् । ननु कर्तव्यमपि त्वयैवोच्यतामिति चेत्तत्राह-परेति । परप्रणीतानि प्रोक्तानि वचांसि चिन्वतां गवेषयतां मादृशाम् वार्ताहारिणामित्यर्थः । गिरः प्रवृत्तिसारा वार्तामात्रसाराः खलु । 'वार्ता प्रवृत्तिर्वृत्तान्तः' इत्यमरः । वार्तामात्रवादिनो वयम्, न तु कर्तव्यार्थोपदेशसमर्थाः । अतस्त्वयैव निर्धार्य कार्यमिति भावः । सामान्येन विशेषसमर्थनादर्थान्तरन्यासः ।

सुबो०—तत् ( तस्माद्धेतोः ) त्वयि ( त्वद्विषये ) जिह्मं ( कपटं ) कर्त्तुम् उद्यते ( प्रवृत्ते ) तत्र ( तस्मिन् दुर्य्योधने ) विधेयं ( कर्त्तव्यम् ) उत्तरं ( प्रतिक्रिया ) आशु ( शीघ्रं ) विधीयतां ( त्वया क्रियताम् ) । परप्रणीतानि ( परोक्तानि ) वचांसि ( वाक्यानि ) चिन्वतां ( संगृह्णतां ) मादृशां ( मद्विधानां वार्त्ताहारिणां ) गिरः ( वाचः ) प्रवृत्तिसाराः ( वार्तामात्रसाराः ) खलु ( निश्चितं भवन्ति ) ॥ २५ ॥

स०—विधेयं = विधातुं योग्यं परप्रणीतानि = परैः प्रणीतानि । प्रवृत्तिसाराः = प्रवृत्तिरेव सारो यासां ताः ।

व्या०—विधीयताम्=वि–धा + कर्म्मणि लोट् । चिन्वतां=चि + शतृ । मादृशाम्=अस्मद्–दृश् + क्विप् । मादृशां धियः इति पाठान्तरम् । धियः बुद्धयः ॥ २५ ॥

वाच्य०—...विधेहि...।...प्रवृत्तिसाराभिः...गीर्भिः भूयते ॥ २५ ॥

सरलार्थः—एवं कपटाचारिणि तस्मिन् भवता प्रतिकारः अवश्यकर्त्तव्यः । कीदृशः प्रतिकारः कर्त्तव्यस्तत्राहमनभिज्ञः किंचित् वक्तुं न शक्नोमि, भवानेव प्रमाणम् ॥ २५ ॥

इतीरयित्वा गिरमात्तसत्क्रिये
गतेऽथ पत्यौ वनसन्निवासिनाम् ।
प्रविश्य कृष्णासदनं महीभुजा
तदाचचक्षेऽनुजसन्निधौ वचः ॥ २६ ॥

अन्वयः—वनसन्निवासिनां पत्यौ इति गिरम् ईरयित्वा आत्तसत्क्रिये गते ( सति ) अथ महीभुजा कृष्णासदनं प्रविश्य अनुजसन्निधौ तत् वचः आचचक्षे ॥ २६ ॥

इतीति । वनसन्निवासिनां पत्यौ वनेचराधिप इति गिरमीरयित्वोक्त्वात्तसत्क्रिये गृहीतपारितोषिके गते सति । तुष्टिदानमेव चाराणां हि वेतनम् । ते हि तल्लोभात्स्वामिकार्येष्वतीव त्वरयन्ते' इति नीतिवाक्यामृते । अथ महीभुजा राज्ञा कृष्णासदनं द्रौपदीभवनं प्रविश्यानुजसन्निधौ तद्वनेचरोक्तं वचो वाक्यमाचचक्षे आख्यातम् । अथवा । कृष्णेति पदच्छेदः । सदनं प्रविश्यानुजसन्निधौ तद्वचः कृष्णाचचक्षे आख्याता चक्षिङोदुहादेर्द्विकर्मकत्वादप्रधाने कर्मणि लिट् ।

सुबो०—वनसन्निवासिनां पत्यौ ( वनेचराणाम् अधिपे ) इति ( पूर्वोक्तां ) गिरं ( वाचम् ) ईरयित्वा ( उक्त्वा ) आत्तसत्क्रिये ( गृहीतपुरस्कारे, युधिष्ठिरप्रदत्तं पारितोषिकं गृहीत्वा इत्यर्थः ) गते ( प्रस्थिते सति ) अथ ( अनन्तरं ) महीभुजा ( राज्ञा युधिष्ठिरेण ) कृष्णासदनं ( द्रौपद्या भवनं ) प्रविश्य अनुजसन्निधौ ( अनुजानां भ्रातॄणां भीमादीनां समीपे ) तत् ( वनेचरोक्तं ) वचः ( वाक्यम् ) आचचक्षे ( उक्तम् ) ॥२६॥

स०—आत्तसत्क्रिये=आत्ता सत्क्रिया येन तस्मिन् । महीभुजा=महीं भुनक्तीति तेन । कृष्णासदनं=कृष्णायाः सदनम् । अनुजसन्निधौ=अनुजानां सन्निधिः तस्मिन् ।

व्या०—आत्तसत्क्रिये=आङ्-दा+क्त=आत्त, पक्षे आदत्त । आचचक्षे=आङ्-चक्ष+कर्म्मणि लिट् त ( ए ) ॥ २६ ॥

वाच्य—...महीभुक्...॥ २६ ॥

सरलार्थः—एतावदुक्त्वा पारितोषिकं गृहीत्वा च वनेचरे प्रस्थिते सति युधिष्ठिरः द्रौपदीभवनं प्रविश्य तत्र स्थितान् भ्रातॄन् वनेचरकथितं सर्वं वाक्यमुवाच ॥ २६ ॥

तदा किं वृत्तमित्याह—

निशम्य सिद्धिं द्विषतामपाकृती-
स्ततस्ततस्त्या विनियन्तुमक्षमा ।
नृपस्य मन्युव्यवसायदीपिनी-
रुदाजहार द्रुपदात्मजा गिरः ॥ २७ ॥

अन्वयः—ततः द्रुपदात्मजा द्विषतां सिद्धिं निशम्य ततस्त्याः अपाकृतीः विनियन्तुम् अक्षमा ( सती ) नृपस्य मन्युव्यवसायदीपिनीः गिरः उदाजहार ॥ २७ ॥

निशम्येति । अथ द्रुपदात्मजा द्रौपदी द्विषतां सिद्धिं वृद्धिरूपां निशम्य ततस्तदनन्तरम् । ततो द्विषद्भ्य आगतास्ततस्त्याः । 'अव्ययात्त्यप्' इति त्यप् अपाकृतीर्विकारान्विनियन्तुं निरोद्धुमक्षमा सती नृपस्य युधिष्ठिरस्य मन्युव्यवसाययोः क्रोधोद्योगयोर्दीपिनीः संवर्धिनीर्गिरो वाक्यान्युदाजहार । जगादेत्यर्थः ।

सुबो०—ततः ( तदनन्तरं ) द्रुपदात्मजा ( द्रुपदतनया कृष्णा ) द्विषतां ( शत्रूणां दुर्योधनादीनां ) सिद्धिं ( सफलतां ) निशम्य ( श्रुत्वा ) ततस्त्याः ( तेभ्य आगताः, तैः कर्त्तव्याः ) अपाकृतीः ( अपकारान् ) नियन्तुं ( प्रतिकर्त्तुम् ) अक्षमा ( अशक्ता सती ) नृपस्य ( राज्ञो युधिष्ठिरस्य ) मन्युव्यवसाय-दीपिनीः ( मन्युः क्रोधः व्यवसायः उद्योगः तयोः दीपिनीः ( उत्तेजिनीः ) गिरः ( वक्ष्यमाणा वाचः ) उदाजहार ( उक्तवती ) ॥ २७ ॥

समासः—द्रुपदात्मजा = आत्मनः जाता आत्मजा, द्रुपदस्य आत्मजा द्रुपदात्मजा । ततस्त्याः = ततो आगताः ततस्त्याः । मन्युव्यवसायदीपिनीः मन्युश्च व्यवसायश्च मन्युव्यवसायौ तयोः दीपिनीः ।

व्या०—निशम्य = नि-शम ( तुदादि ) + क्त्वो ल्यप् । उदाजहार = उद्-आङ्-हृ + लिट् तिप् ( णल् ) । दीपिनीरिति पाठान्तरम् ॥ २७ ॥

वाच्य०—....अक्षमया....मन्युव्यवसायदीपिन्यः उदाजह्रिरे द्रुपदात्मजया....॥ २७ ॥

सरलार्थः—युधिष्ठिरोक्तं वनेचरवाक्यं श्रुत्वा द्रौपदी, दुर्योधनो वनवासिनोऽप्यस्मान् अपकरिष्यतीत्याशङ्क्य, युधिष्ठिरस्य क्रोधोद्दीपनार्थं तत्प्रतीकारविधानार्थं च वक्ष्यमाणं वचनमुवाच ॥ २७ ॥

द्रौपदी प्रथमं तावत् स्वाविनयं परिहरति—

भवादृशेषु प्रमदाजनोदितं
भवत्यधिक्षेप इवानुशासनम् ।
तथापि वक्तुं व्यवसाययन्ति मां
निरस्तनारीसमया दुराधयः ॥ २८ ॥

अन्वयः—भवादृशेषु प्रमदाजनोदितम् अनुशासनम् अधिक्षेपः इव भवति । तथापि निरस्तनारीसमयाः दुराधयः मां वक्तुं व्यवसाययन्ति ॥ २८ ॥

भवादृशेष्विति । भवादृशो भवद्विधाः । पण्डिता इत्यर्थः । तेषु विषये । 'त्यदादिषु-' इत्यादिना कश् । 'आ सर्वनाम्नः' इत्याकारादेशः । प्रमदाजनोदितं स्त्रीजनोक्तम् । वदेः क्तः । 'वचिस्वपि-' इत्यादिना संप्रसारणम् । अनुशासनं नियोगवचनमधिक्षेपस्तिरस्कार इव भवति । अतो न युक्तं वक्तुमित्यर्थः । तथापि वक्तुमनुचितत्वेऽपि निरस्तनारीसमयास्त्याजितशालीनतारूपस्त्रीसमाचाराः । 'समयाः शपथाचारकालसिद्धान्तसंविदः' इत्यमरः । दुराधयः समयोल्लङ्घनहेतुत्वाद् दुष्टा मनोव्यथाः । 'पुंस्याधिर्मानसी व्यथा' इत्यमरः । मां वक्तुं व्यवसाययन्ति प्रेरयन्ति । न किंचिदयुक्तं दुःखिनामिति भावः ।

सुबो०—भवादृशेषु ( त्वद्विधेषु पण्डितेषु ) प्रमदाजनोदितं ( स्त्रीजनेन कथितम् ) अनुशासनम् ( उपदेशवचनम् ) अधिक्षेपः

( तिरस्कारः ) इव भवति । तथापि ( ईदृशवचनस्य वक्तुमयुक्तत्वेऽपि ) निरस्तनारीसमयाः ( निरस्तः नाशितः नारीसमयः शालीनतारूपः स्त्रीजनाचारः यैः तथाविधाः ) दुराधयः ( दुरन्ता मनोव्यथाः ) मां वक्तुम् ( अनुचितवचनं कथयितुं ) व्यवसाययन्ति ( नियोजयन्ति ) ॥ २८ ॥

समासः—भवादृशेषु = भवन्त इव दृश्यन्त इति तेषु । प्रमदाजनोदितं = प्रमदाजनेन उदितम् । अनुशासनं = अनुशास्यत इति । निरस्तनारीसमयाः = निरस्तः नारीसमयो यैः ताः ।

व्या०—भवादृशेषु = भवत्-दृश + कर्म्मणि कञ् । उदितम् = वद + कर्म्मणि क्त । व्यवसाययन्ति = वि-अव-सो + णिच् + लट् झि (अन्ति)॥२८॥

वाच्य०—...प्रमदाजनोदितेन भूयते अधिक्षेपेण...अनुशासनेन । ...व्यवसाय्ये अहं निरस्तनारीसमयैः दुराधिभिः ॥ २८ ॥

सरलार्थः—त्वद्विधेषु पण्डितेषु मादृशीनां मूर्खाणां नारीणाम् उपदेशस्तिरस्कार इव भवति । तथापि दुरन्तया मनोव्यथया उचितानुचितज्ञानशून्याऽहं किंचिद् ब्रवीमि ॥२८॥

त्वदोषेणैव त्वया राज्यं हारितमित्याह—

अखण्डमाखण्डलतुल्यधामभि-
श्चिरं धृता भूपतिभिः स्ववंशजैः ।
त्वयात्महस्तेन मही मदच्युता
मतङ्गजेन स्रगिवापवर्जिता ॥ २९ ॥

अन्वयः—आखण्डलतुल्यधामभिः स्ववंशजैः भूपतिभिः चिरम् अखण्डं धृता मही, मदच्युता मतङ्गजेन स्रक् इव, त्वया आत्महस्तेन अपवर्जिता ॥ २९ ॥

अखण्डमिति । आखण्डलतुल्यधामभिरिन्द्रतुल्यप्रभावैः । स्ववंशजैः भूपतिभिर्भरतादिभिश्चिरमखण्डमविच्छिन्नं धृता मही त्वया । मदं च्योततीति मदच्युत् । क्विप् । तेन मदस्राविणा

मतङ्गजेन स्रगिवात्महस्तेन स्वकरेण। स्वचापलेनेत्यर्थः। अपवर्जिता परिहृता त्यक्ता। स्वदोषादेवायमनर्थागम इत्यर्थः॥

सुबो०—आखण्डलतुल्यधामभिः ( इन्द्रतुल्यपराक्रमैः ) स्ववंशजैः ( स्वकुलसंभूतैः ) भूपतिभिः (राजभिः भरतादिभिः) चिरं ( बहुकालं व्याप्य ) अखण्डम् ( अविच्छिन्नं यथा स्यात् तथा ) धृता ( पालिता ) मही ( पृथिवी ) मदच्युता ( मदक्षरणकारिणा, मदमत्तेन ) मतङ्गजेन ( करिणा ) स्रक् ( माल्यम् ) इव त्वया आत्महस्तेन (स्वकरेण) अपवर्जिता (परित्यक्ता) ॥२९॥

समासः—आखण्डलतुल्यधामभिः=आखण्डलस्य तुल्यं धाम येषां तैः। मदच्युता=मदं च्योततीति तेन।

व्या०—मदच्युता=मद-च्युत+क्विप्। मदश्च्युतेति पाठे श्च्युतिरक्षरणे इति धातुः। अपवर्जिता=अप-वृज+क्त ॥ २९ ॥

वाच्य०—धृतां...त्वं ..महीं मदीच्युत् मतङ्गजः सूनम्....अपवर्जितवान् ॥ २९ ॥

सरलार्थः—मदान्धो गजो यथा शोभार्थं स्वशिरसि पालकेन न्यस्तं पुष्पमाल्यम् अज्ञतया दूरे निक्षिपति, तथा त्वमपि पुरुषपरम्परागतं राज्यं स्वदोषेण परित्यक्तवान् ॥ २९ ॥

शठे शाठ्यं समाचरेदिति नीतिमवजानन् शत्रुभिः पराभूयते इत्याह—

व्रजन्ति ते मूढधियः पराभवं
भवन्ति मायाविषु ये न मायिनः।
प्रविश्य हि घ्नन्ति शठास्तथाविधा-
न संवृताङ्गान्निशिता इवेषवः ॥ ३० ॥

अन्वयः—ये मायाविषु मायिनः न भवन्ति, मूढधियः ते पराभवं व्रजन्ति। इषवः असंवृताङ्गान् इव शठाः तथाविधान् प्रविश्य हि घ्नन्ति ॥ ३० ॥

व्रजन्तीति ॥ मूढधियो निर्विवेकबुद्धयस्ते पराभवं व्रजन्ति ये मायाविषु मायावत्सु विषये । 'अस्मायामेधा-, इत्यादिना विनिप्रत्ययः । मायिनो मायावन्तः । व्रीह्यादित्वादिनिप्रत्ययः । न भवन्ति । अत्रैवार्थान्तरं न्यस्यति—प्रविश्येति । शठा अपकारिणो धूर्तास्तस्थाविधानकुटिलानसंवृताङ्गानवर्मितशरीरान्निशिता इषव इव प्रविश्य प्रवेशं कृत्वात्मीया भूत्वा घ्नन्ति हि ।' आर्जवं हि कुटिलेषु न नीतिः इति भावः ॥

सुबो०—ये [ जनाः ] मायाविषु [ प्रतारणापरेषु शठेषु ] मायिनः [ प्रतारणापराः ] न भवन्ति, मूढधियः [ निर्विवेकबुद्धयः ] ते पराभवं [ पराजयं ] व्रजन्ति [ प्राप्नुवन्ति ] । इषवः [ बाणाः ] असंवृताङ्गान् [ वर्म्मणा अनाच्छादितशरीरान् जनान् ] इव शठाः [ मायाविनः ] तथाविधान् [ तादृशान् प्रतारणाविमुखान् जनान् ] प्रविश्य [ अन्तर्गत्य, आत्मीया भूत्वा च ) हि ( निश्चितं ) घ्नन्ति ( नाशयन्ति ) ॥ ३० ॥

समासः—मूढधियः = मूढा धीर्येषान्ते । असंवृताङ्गान् = असंवृतानि अङ्गानि येषां तान् ।

व्या०—घ्नन्ति = हन + लट् झि ( अन्ति ) निशिताः = नि-शो + कर्म्मणि क्त ॥ ३० ॥

वाच्य०—व्रज्यते तैः मूढधीभिः पराभवः । भूयते....यैः....मायिभिः । ...हन्यन्ते शठैः तथाविधाः असंवृताङ्गाः निशितैः—इषुभिः ॥ ३० ॥

सरलार्थः—ये मायाविषु मायां न कुर्वन्ति, ते तैः पराभूयते ॥ ३० ॥

स्वोपेक्षादोषमूलेयं ते राज्यच्युतिरित्याह—

गुणानुरक्तामनुरक्तसाधनः
कुलाभिमानी कुलजां नराधिपः ।
परैस्त्वदन्यः क इवापहारये-
न्मनोरमामात्मवधूमिव श्रियम् ॥ ३१ ॥

अन्वयः—अनुरक्तसाधनः कुलाभिमानी त्वत् अन्यः कः इव नराधिपः आत्मवधूम् इव गुणानुरक्तां कुलजां मनोरमां श्रियं परैः अपहारयेत् ॥ ३१ ॥

गुणेति ॥ अनुरक्तसाधनोऽनुकूलसहायवान्। उक्तं च कामन्दकीये–'उद्योगादनिवृत्तस्य ससहायस्य धीमतः। छायेवानुगता तस्य नित्यं श्रीः सहचारिणी ॥' इति। कुलाभिमानी क्षत्रियत्वाभिमानी कुलीनत्वाभिमानी च त्वदन्यस्त्वत्तोऽन्यः। 'अन्यारात्–' इत्यादिना पञ्चमी। क इव नराधिपो गुणः सन्ध्यादिभिः सौन्दर्यादिभिश्चानुरक्तामनुरागिणीं कुलजां कुलक्रमादागतां कुलीनां च मनोरमां श्रियमात्मवधूमिव स्वभार्यामिव 'वधूर्जाया स्नुषा स्त्री च' इत्यमरः। परैः शत्रुभिरन्यैश्चापहारयेत्। स्वयमेवापहारं कारयेदित्यर्थः। कलत्रापहारवल्लक्ष्म्यपहारोऽपि राज्ञां मानहानिकरत्वादनुपेक्षणीय इति भावः ॥

सुबो०—अनुरक्तसाधनः ( अनुकूलसहायवान् ) कुलाभिमानी ( वंशमर्य्यादाभिज्ञः ) त्वत् अन्यः ( भवतोऽपरः ) क इव नराधिपः ( राजा ) आत्मवधूम् ( निजपत्नीम् ) इव गुणानुरक्तां ( गुणैः यानासनादिषड्भिः पक्षे दयादाक्षिण्यादिभिश्च अनुरागिणीं ) कुलजां ( कुलक्रमागतां पक्षे सद्वंशजातां ) मनोरमां ( मनोहारिणीं ) श्रियं ( राज्यलक्ष्मीं ) परैः ( शत्रुभिः पक्षे अन्यैः ) अपहारयेत् ( अपहृतां कारयेत्, न कोऽपीत्यर्थः )॥ ३१॥

समा०—अनुरक्तसाधनः = अनुरक्तानि साधनानि यस्य सः। कुलाभिमानी = कुलं अभिमन्यत इति। नराधिपः = नराणां अधिप इति। आत्मवधूं = आत्मनः वधू तां। गुणानुरक्तां = गुणैः अनुरक्ता तां। मनोरमां = मनोरमयतीति तां।

व्या०—नराधिप इत्यत्र जनाधिप इति पाठान्तरम्। परैः = "हृक्रोरन्यतरस्याम्" इति प्रयोजककर्त्तुः पाचिककर्मसंज्ञाऽभावः। इव = वाक्यालंकारे। (कः) अपहारयेत् = अप-हृ + णिच् + विधिलिङ् तिप् ( यात् ) ॥ ३१ ॥

वाच्य—गुणानुरक्ता अनुरक्तसाधनेन कुलाभिमानिना कुलजा नराधिपेन....अन्येन केन...अपहार्य्येत मनोरमा आत्मवधूः...श्रीः ॥३१॥

सरलार्थः—यथा कश्चित् सहायवानपि कौलीन्यमर्य्यादाभिज्ञोऽपि स्वदोषेणैव गुणानुरागिणीं कुलीनां मनोहारिणीं पत्नीम् अन्यैरपहारयति, तथा त्वमपि भ्रात्रादिसहायसंपन्नोऽपि आत्मानं क्षत्रियकुलजं मन्यमानोऽपि गुणानुरागिणीं कुलक्रमागतां मनोरमां राज्यलक्ष्मीं स्वदोषेणैव शत्रुभिरपहारितवानसि ॥३१॥

अथ दशभिः कोपोद्दीपनं करोति—

भवन्तमेतर्हि मनस्विगर्हिते
विवर्तमानं नरदेव वर्त्मनि ।
कथं न मन्युर्ज्वलयत्युदीरितः
शमीतरुं शुष्कमिवाग्निरुच्छिखः ॥ ३२ ॥

अन्वयः—नरदेव उच्छिखः अग्निः शुष्कं शमीतरुम् इव एतर्हि उदीरितः मन्युः मनस्विगर्हिते वर्त्मनि विवर्त्तमानं भवन्तं कथं न ज्वलयति ॥ ३२ ॥

भवन्तमिति ॥ हे नरदेव नरेन्द्र, एतर्हीदानीम् । अस्मिन्नापत्कालेऽपीत्यर्थः 'एतर्हि संप्रतीदानीमधुना सांप्रतं तथा' इत्यमरः । 'इदमोर्हिल्' इति हिल्प्रत्ययः । 'एतेतौ रथोः' इत्येतादेशः । आपदमेवाह—मनस्विगर्हिते शूरजनजुगुप्सिते वर्त्मनि मार्गे विवर्तमानम् । शत्रुकृतां दुर्दशामनुभवन्तमित्यर्थः । भवन्तं त्वामुदीरित उद्दीपितो मन्युः क्रोधः । शुष्कं नीरसम् । 'शुषः कः' इति निष्ठातकारस्य ककारः । शमी चासौ तरुश्चेति विशेषणसमासः । तम् । शमीग्रहणं शीघ्रज्वलनस्वभावात्कृतम् । उच्छिख उद्गतज्वालः । घृणिज्वाले अपि शिख' इत्यमरः । वह्निरिव । कथं न ज्वलयति । ज्वलयितुमुचितमित्यर्थः । 'मितां ह्रस्वः' इति ह्रस्वः ॥

सुबो०—नरदेव ( हे राजन् ) उच्छिखः ( उद्गतज्वालः ) अग्निः शुष्कं ( नीरसं ) शमीतरुम् इव एतर्हि ( इदानीम् )

उदीरितः (मया उद्दीपितः) मन्युः (क्रोधः) मनस्विगर्हिते (शूरजननिन्दिते) वर्त्मनि (पथि, निश्चेष्टावस्थायामित्यर्थः) विवर्त्तमानम् (अवस्थितं) भवन्तं (त्वां) कथं न ज्वलयति (उद्दीपयति) ॥ ३२ ॥

समा०—उच्छिखः=उद्गता शिखा यस्य सः। मनस्विगर्हिते=प्रशस्तं मनः अस्ति अस्य तैः गर्हितं तस्मिन्।

व्या०—ज्वलयति=ज्वल+णिच्+लट् तिप्। शुष्कम्=शुष+क्त ३२॥

वाच्य—भवान्....विवर्त्तमानः...मन्युना ज्वल्यते उदीरितेन शमीतरुः शुष्कः...अग्निना उच्छिखेन ॥ ३२ ॥

सरलार्थः—शुष्कः शमीतरुः अग्निसंयोगेन तत्क्षणादेव ज्वलति, त्वं तु एतावन्तं कालं ईदृशीं शोचनीयदशामापन्नो मया पुनः पुनर्वाक्यबाणैर्विद्धोऽपि कथं कोपेन न ज्वलसि॥३२॥

अवन्ध्यकोपस्य विहन्तुरापदां
भवन्ति वश्याः स्वयमेव देहिनः।
अमर्षशून्येन जनस्य जन्तुना
न जातहार्देन न विद्विषादरः॥ ३३ ॥

अन्वयः—अवन्ध्यकोपस्य आपदां विहन्तुः देहिनः स्वयम् एव वश्याः भवन्ति। अमर्षशून्येन जन्तुना जातहार्देन (सता) जनस्य आदरः न। विद्विषा च (सता) जनस्य दरः न ॥३३॥

अवन्ध्येति ॥ अवन्ध्यः कोपो यस्य तस्यावन्ध्यकोपस्यात-एवापदां विहन्तुः निग्रहानुग्रहसमर्थस्येत्यर्थः। पुंस इति शेषः। देहिनो जन्तवः स्वयमेव वश्या वशंगता भवन्ति। 'वशं गतः' इति यत्प्रत्ययः। अतस्त्वया कोपिना भावितव्यमित्यर्थः। व्यतिरेकेत्वनिष्टमाचष्टे—अमर्षशून्येन निष्कोपेन जन्तुना। कन्यया शोक इतिवत्। 'हेतौ' इति तृतीया। हृदयस्य कर्म हार्दं स्नेहः। 'प्रेमा ना

प्रियता हार्दं प्रेम स्नेहः' इत्यमरः। युवादित्वादण्। 'हृदयस्य हृल्लेखयदण्लासेषु' इति हृदादेशः। जातहार्देन जातस्नेहेन सता जनस्यादरो न। विद्विषा द्विषता च सतादरो न। अमर्षहीनस्य रागद्वेषावकिंचित्करत्वादगण्यावित्यर्थः। अथवा विद्विषा सता दरो भयं न। 'दरोऽस्त्रियां भये श्वभ्रे' इत्यमरः। एतस्मिन्नेव प्रयोगे संधिवशाद् द्विधा पदच्छेदः। पुंवाक्येषु न दोषः। अतः स्थाने कोपः कार्यस्त्याज्यस्त्वस्थाने कोप इति भावः॥

सुबो०—अवन्ध्यकोपस्य (अव्यर्थक्रोधस्य अतएव) आपदां विहन्तुः (सर्वानिष्टप्रतिकारसमर्थस्य पुंसः) देहिनः (जन्तवः) स्वयम् (आत्मना) एव वश्याः (वशंगताः) भवन्ति। अमर्षशून्येन (क्रोधहीनेन) जन्तुना (जनेन) जातहार्देन (संजातस्नेहेन, मित्रेण सता) जनस्य (लोकस्य) आदरः न (यत्नः न भवति—तस्य मित्रत्वं शत्रुत्वं च कोऽपि न गणयतीत्यर्थः)। विद्विषा च सता जनस्य दरः (भयं) न भवति॥ ३३॥

स०—अवन्ध्यकोपस्य = अवन्ध्यः कोपो यस्य तस्य। अमर्षशून्येन = अमर्षेण शून्यः तेन। जातहार्देन = जातं हार्दं यस्य तेन।

व्या०—विहन्तुः = वि–हन + तृच्। जन्तुना = हेतौ तृतीया॥३३॥

वाच्य—...भूयंत वश्यैः...देहिभिः। आदरेण भूयते॥ ३३॥

सरलार्थः—अव्यर्थकोपस्य जनस्य सर्वे वश्या भवन्ति। अक्रोधं तु जनं शत्रुं मित्रं वा सन्तं कोऽपि न गणयति॥ ३३॥

परिभ्रमँल्लोहितचन्दनोचितः
पदातिरन्तर्गिरि रेणुरूषितः।
महारथः सत्यधनस्य मानसं
दुनोति नो कच्चिदयं वृकोदरः॥ ३४॥

अन्वयः—लोहितचन्दनोचितः महारथः अयं वृकोदरः रेणुरूषितः पदातिः (सन्) अन्तर्गिरि परिभ्रमन् सत्यधनस्य (तव) मानसं नो दुनोति कच्चित्॥ ३४॥

परिभ्रमाणिति ॥ लोहितचन्दनोचितउचितलोहितचन्दनः ।
'वाहिताग्न्यादिषु-' इति साधुः । अभ्यस्तरक्तचन्दन इत्यर्थः ।
'अभ्यस्तेत्युचितं न्याय्यम्' इति यादवः । महारथो रथचारी उभय-
त्रादि प्रागिति शेषः । अद्य तु रेणुरूषितो धूलिच्छुरितः । पादाभ्या-
मतति गच्छतीति पदातिः पादचारी । 'अज्यतिभ्यां च' इत्यनुवृत्तौ
'पादे च' इत्यौणादिक इण्प्रत्ययः । 'पादस्य पदाज्यातिगोपहतेषु'
इति पदादेशः । अन्तर्गिरि गिरिष्वन्तः । विभक्त्यर्थेऽव्ययीभावः ।
'गिरेश्च सेनकस्य' इति विकल्पात्समासान्ताभावः । परिभ्रमन्नयं
वृकोदरो भीमः । सत्यधनस्येति सोल्लुण्ठनवचनम् । अद्यापि सत्य-
मेव रक्ष्यते, न तु भ्रातर इति भावः । तवेति शेषः । मानसं नो
दुनोति । कच्चिन्न परितापयति । 'कच्चित्कामप्रवेदने' इत्यमरः ।
स्वाभिप्रायाविष्करणं कामप्रवेदनम् ॥

अन्वो०—लोहितचन्दनोचितः ( अभ्यस्तरक्तचन्दनः, यः पूर्वं
सर्वदा रक्तचन्दनानुलिप्तकाय आसीत् तथा ) महारथः ( महतारथेन
गमनशीलः ) अयं वृकोदरः ( भीमसेनः ) रेणुरूषितः ( इदानीं
धूलिधूसरितः ) पदातिः ( पादचारी सन् ) अन्तर्गिरि ( पर्वतानां
मध्ये ) परिभ्रमन् ( सर्वतो विचरन् ) सत्यधनस्य ( सत्यप्रियस्य
तव ) मानसं ( मनः ) नो दुनोति कच्चित् ( न परितापयति
किम् ) ॥ ३४ ॥

समा०—लोहितचन्दनोचितः = लोहितञ्च तच्चन्दनं लोहितचन्दनं,
उचितं लोहितचन्दनं येन सः । रेणुरूषितः = रेणुभिः रूषितः । पदातिः =
पद्भ्यां अतति इति पदातिः । अन्तर्गिरिः = गिरिषु अन्त इति । सत्यधनस्य
= सत्यमेव धनं यस्य तस्य ।

व्या०—लोहितचन्दनोचितः = इत्यत्र आहिताग्न्यादित्वात् क्तान्तस्य
पाक्षिकः परनिपातः । पदातिः = अत्र पाद्-अत + औणादिक इण्,
पादस्य पदादेशः । अन्तर्गिरि = गिरिषु अन्तः ( अव्ययीभावः ) ॥ ३४ ॥

वाच्य—परिभ्रमता लोहितचन्दनोचितेन पदातिना...रेणुरूषितेन
महारथेन...मानसं दूयते...अनेन वृकोदरेण ॥ ३४ ॥

सरलार्थः—योऽयं मध्यमपाण्डवः पूर्वं रक्तचन्दनविलिप्तकायः रथचारी आसीत् तम् इदानीं धूलिधूसरितं पादचारेण गिरिसंकटे परिभ्रमन्तं दृष्ट्वा दुःखं नानुभवसि अहो ते सत्यप्रियता ॥ ३४ ॥

विजित्य यः प्राज्यमयच्छदुत्तरा-
न्कुरूनकुप्यं वसु वासवोपमः ।
स वल्कवासांसि तवाधुनाहरन्
करोति मन्युं न कथं धनञ्जयः ॥ ३५ ॥

अन्वयः—वासवोपमः यः उत्तरान् कुरून् विजित्य प्राज्यम् अकुप्यं वसु अयच्छत्, सः धनञ्जयः अधुना वल्कवासांसि आहरन् तव मन्युं कथं न करोति ॥ ३५ ॥

विजित्येति ॥ वासव इन्द्र उपमा उपमानं यस्य स वासवोपम इन्द्रतुल्यो यो धनञ्जयः । उत्तरान्कुरून्मेरोरुत्तरान्मानुषान्देशविशेषान्विजित्य प्राज्यं प्रभूतम् । 'प्रभूतं प्रचुरं प्राज्यम्' इत्यमरः । कुप्यादन्यदकुप्यं हेमरूप्यात्मकम् । 'स्यात्कोशश्च हिरण्यं च हेमरूप्ये कृताकृते । ताभ्यां यदन्यत्तत्कुप्यम्' इत्यमरः । वसु धनमयच्छद्दत्तवान् । 'पाघ्रा-, इत्यादिना दाणो यच्छादेशः । स धनं जयतीति धनञ्जयोऽर्जुनः । 'संज्ञायां भृतॄवृजि-' इत्यादिना खच्प्रत्ययः । 'अरुर्द्विषत्-' इत्यादिना मुमागमः । अधुनाऽस्मिन्काले । 'अधुना' इति निपातनात्साधुः । तव वल्कवासांस्याहरन्कथं तव मन्युं क्रोधं दुःखं वा न करोति ॥

सुबो०—वासवोपमः ( इन्द्रसदृशः ) यः उत्तरान् कुरून् ( तदाख्यान् देशान् ) विजित्य ( आयत्तीकृत्य ) प्राज्यं ( प्रचुरं ) अकुप्यं ( हेमरूप्यात्मकं ) वसु ( धनम् ) अयच्छत् ( तुभ्यं प्रादात् ) स धनञ्जयः ( अर्जुनः ) अधुना ( इदानीं ) वल्कवासांसि ( वल्कलरूपवस्त्राणि ) आहरन् ( संगृह्णन् ) तव मन्युं ( दुःखं, शत्रून् प्रतिक्रोधं वा ) कथं न करोति ( जनयति ) ॥ ३५ ॥

समा०—वासवोपमः = वासवः उपमा यस्य सः । वल्कवासांसि = वल्कान्येव वासांसि तानि । अकुप्यं = न कुप्यमकुप्यम् ।

व्या०—अयच्छत् = दा + लङ् त् । अकुप्यम् = गुप + क्यप् = कुप्यं ( सुवर्णरजतभिन्नम् ), धनञ्जयः = धन–जि + खच् ॥ ३५ ॥

वाच्य—...येन प्राज्यम् अदीपत.. अकुप्यं वसु वासवोपमेन । तेन...आहरता क्रियते मन्युः...धनञ्जयेन ॥ ३५ ॥

सरलार्थः—योऽर्जुनः पूर्वमुत्तरकुरून् विजित्य प्रभूतं धनं तुभ्यं प्रादात् स इदानीम् अस्माकं परिधानार्थं वल्कलान्याहरतीति दृष्ट्वा कथं दुःखितो न भवसि ॥ ३५ ॥

वनान्तशय्याकठिनीकृताकृती
कचाचितौ विष्वगिवागजौ गजौ ।
कथं त्वमेतौ धृतिसंयमौ यमौ
विलोकयन्नुत्सहसे न बाधितुम् ॥ ३६ ॥

अन्वयः—अगजौ गजौ इव वनान्तशय्याकठिनीकृताकृती विष्वक् कचाचितौ एतौ यमौ विलोकयन् त्वं कथं धृतिसंयमौ बाधितुं न उत्सहसे ॥ ३६ ॥

वनान्तेति ॥ वनान्तो वनभूमिरेव शय्या तया कठिनीकृताकृती कठिनीकृतदेहौ । 'आकारो देह आकृतिः' इति वैजयन्ती । विष्वक्समन्तात् । 'समन्ततस्तु परितः सर्वतो विष्वगित्यपि' इत्यमरः । कचाचितौ कचव्याप्तौ । विशीर्णकेशावित्यर्थः । अत एवागजौ गिरिसम्भवौ गजाविव स्थितावेतौ यमौ युग्मजातौ । माद्रीपुत्रावित्यर्थः । 'यमो दण्डधरे श्वाङ्के संयमे यमजेऽपि च' इति विश्वः । विलोकयंस्त्वं कथं धृतिसंयमौ सन्तोषनियमौ । 'धृतिर्योगान्तरे धैर्ये धारणाध्वरतुष्टिषु' इति विश्वः । बाधितुं नोत्सहसे न प्रवर्तसे । 'शक धृष–'इत्यादिना तुमुन् । अहो ते महद्धैर्यमिति भावः ॥

सुबो०—अगजौ ( गिरिसम्भवौ ) गजौ ( हस्तिनौ ) इव वनान्तशय्याकठिनीकृताकृती ( वनान्तं वनभूमिरेव शय्या तया

कठिनीकृता कर्कशीकृता आकृतिर्ययोः तौ, भूमिशयनवशात् कर्कशीभूतकायौ ) विष्वक् ( समन्तात् ) कचाचितौ ( केशव्याप्तौ, विकीर्णमूर्द्धजौ ) यमौ ( यमजौ माद्रीसुतौ नकुलसहदेवौ ) विलोकयन् ( पश्यन् ) त्वं कथं ( केन प्रकारेण ( धृतिसंयमौ ( धृतिं सन्तोषं संयमं धैर्य्यं च ) बाधितुं ( परित्यक्तुं ) न उत्सहसे ( न प्रवर्त्तसे ) ॥ ३६ ॥

समा०—अगजौ = अगे जातौ । अकठिना कठिना कृतेति कठिनीकृता, वनान्तमेव शय्या तया कठिनीकृता आकृतिर्ययोस्तौ । कचाचितौ = कचैः आचितौ । धृतिसंयमौ = धृतिश्च संयमश्च तौ ।

व्या०—वनान्तेत्यत्र अन्तशब्दः स्वरूपवाची "अन्तं स्वरूपे नाशे ना नस्त्री शेषेऽन्तिके त्रिषु" इति मेदिनी । कृतेति चिः । अगजौ अग–जन + ड ॥ ३६ ॥

वाच्य—...त्वया...विलोकयता उत्सह्यते...॥ ३६ ॥

सरलार्थः—स्वभावतः कोमलाङ्गावपि भूमिशयनात् कठिनाङ्गौ मातृहीनाविमौ नकुलसहदेवौ दृष्ट्वा कथमिदानीमपि त्वं कथं सन्तोषं चावलम्ब्य वर्त्तसे ॥ ३६ ॥

भ्रातॄणां दशां वर्णयित्वा इदानीं राज्ञः स्वदशामाह—

इमामहं वेद न तावकीं धियं
विचित्ररूपाः खलु चित्तवृत्तयः ।
विचिन्तयन्त्या भवदापदं परां
रुजन्ति चेतः प्रसभं ममाधयः ॥ ३७ ॥

अन्वयः—अहम् इमां तावकीं धियं न वेद । चित्तवृत्तयः विचित्ररूपाः खलु । परां भवदापदं विचिन्तयन्त्या मम आधयः चेतः प्रसभं रुजन्ति ॥ ३७ ॥

इमामिति ॥ इमां वर्तमानाम् । तवेमां तावकीं त्वदीयाम् । 'तस्येदम्' इत्यणप्रत्ययः । 'तवकममकावेकवचने' इति तवकादेशः । धियं त्वदापद्विषयां चित्तवृत्तिमहं न वेद कीदृशी वा न वेद्मि ।

परबुद्धेरप्रत्यक्षत्वादिति भावः। 'विदो लटो वा' इति लटो णलादेशः। न चात्मदृष्टान्तेनापक्षत्वाद् दुःखित्वमनुमातुं शक्यते। धीरादिष्व-नैकान्तिकत्वादित्याशयेनाह—चित्तवृत्तयो विचित्ररूपा धीराधीरा-द्यनेकप्रकाराः खलु। किन्तु परामुत्कृष्टां भवदापदं विचिन्तयन्त्या भावयन्त्या मम चेतश्चित्तम्। आधयो मनोव्यथाः। 'उपसर्गे घोः किः' इति किप्रत्ययः। प्रसभं प्रसह्य रुजन्ति भञ्जन्ति। 'रुजो भङ्गे' इति धातोर्लेट्। पश्यतामपि दुःसहा दुःखजननी त्वद्विपत्तिरनुभ-वितारं त्वां न विकरोतीति महच्चित्रमित्यर्थः। चेत इति 'रुजार्था-नां भाववचनानामज्वरेः' इति षष्ठी न भवति। तत्र शेषाधिकाराच्छे-षत्वस्य विवक्षितत्वादिति॥

सुबो०—अहम् इमाम् ( ईदृशीं ) तावकीं (त्वत्सम्बन्धिनीं) धियं बुद्धिं न वेद ( न जानामि )। चित्तवृत्तयः ( लोकानां मनोभावाः ) विचित्ररूपाः ( अनेकप्रकाराः भवन्ति ) खलु ( इति प्रसिद्धिः ) पराम् ( उत्कर्षप्राप्तां ) भवदापदं ( तव विपदं ) विचिन्तयन्त्याः ( भावयन्त्याः ) मम आधयः ( मनोव्यथाः ) चेतः ( मनः ) प्रसभं ( बलात् ) रुजन्ति ( पीड़यन्ति )॥ ३७॥

समा०—तावकीं = तव इयं तावकी तां। चित्तवृत्तयः = चित्तस्य वृत्तयः। विचित्ररूपाः = विचित्रं रूपं यासां ताः।

व्या०—वेद = विद् + लट् मि। तावकीम् = युष्मद् + अण् एकवचने तवकादेशः। रुजन्ति = रुज + लट् झि.( अन्ति )॥ ३७॥

वाच्य—इयं मया...विद्यते तावकी धीः। विचित्ररूपाभिः... चित्तवृत्तिभिः भूयते।...रुज्यते...आधिभिः॥ ३७॥

सरलार्थः—कीदृशी ते बुद्धिर्मया न ज्ञायते। विभिन्नबुद्धयो हि लोकाः। किन्तु तव यादृशीमवस्थामालोक्य मम दुःखं जायते, तादृश्यामवस्थायां त्वं स्वयं धैर्य्यं धत्से इति महदाश्चर्य्यमेव॥३७॥

पुराधिरूढः शयनं महाधनं
विबोध्यसे यः स्तुतिगीतिमङ्गलैः।
अदभ्रदर्भामधिशय्य स स्थलीं
जहासि निद्रामशिवैः शिवारुतैः॥ ३८॥

अन्वयः—यः ( त्वं ) महाधनं शयनम् अधिरूढः ( सन् ) स्तुतिगीतिमङ्गलैः पुरा विबोध्यसे, सः ( त्वम् ) अदभ्रदर्भां स्थलीम् अधिशय्य अशिवैः शिवारुतैः निद्रां जहासि ॥ ३८ ॥

पुरेति ॥ यस्त्वं महाधनं बहुमूल्यं श्रेष्ठम् । 'महाधनं महामूल्ये' इति विश्वः । शयनं शय्यामधिरूढः सन् । स्तुतयो गीतयश्चता एव मङ्गलानि तैः करणभूतैः पुरा विबोध्यसे । वैतालिकैरिति शेषः । पूर्वं बोधित इत्यर्थः । 'पुरि लुङ् चास्मे' इति भूतार्थे लट् । स त्वमदभ्रदर्भां बहुकुशाम् । 'अल्पी कुशं कुथो दर्भः' इति । 'अदभ्रं बहुलं बहु' इति चामरः । स्थलीमकृत्रिमभूमिम् । 'जानपद–'इत्यादिनाकृत्रिमार्थे ङीप् । एतेन दुःसहस्पर्शत्वमुक्तम् । 'अधिशीङ्स्थासां कर्म' इति कर्मत्वम् । अधिशय्य शयित्वा । 'अयङ्यङ्ङिति' इत्ययङादेशः । अशिवैरमङ्गलैः शिवारुतैः क्रोष्टुवासितैः । 'शिवा हरीतकी क्रोष्टा शमी नद्यामलक्युभे' इति वैजयन्ती । निद्रां जहासि । अद्येति शेषः ॥

सुबो०—यस्त्वं महाधनं ( बहुमूल्यं ) शयनं ( शय्याम् ) अधिरूढः ( अधिशयितः सन् ) स्तुतिगीतिमङ्गलैः (मङ्गलमयीभिः स्तुतिभिर्गीतिभिश्च) पुरा ( पूर्वं ) विबोध्यसे (जागर्य्यसे) वैतालिकैरिति शेषः । स त्वम् अदभ्रदर्भां ( बहुकुशाच्छादितां स्थलीम् ( अकृत्रिमां भूमिम् ) अधिशय्य ( तत्र शयनं कृत्वा ) निद्रां जहासि ( इदानीं त्यजसि ) ॥ ३८ ॥

समासः—महाधनं = महत् धनं मूल्यं यस्य तत् । स्तुतिगीतिमङ्गलैः = स्तुतयश्च गीतयश्च ता एव मङ्गलानि तैः । अदभ्रदर्भां = अदभ्रा दर्भा यस्यां तां । शिवारुतैः = शिवानां रुतानि तैः ।

व्या०—अधिरूढः = अधि–रुह + क्त । शयनम् = शो + अधिकरणे–ल्युट् ( अनट् ) । विबोध्यसे = वि–बुध + णिच् + कर्म्मणि " पुरिलुङ् चास्मे " इति भूतार्थे लट् । अधिशय्य = अधि–शी + ल्यप् । स्थली = " अधिशीङ्स्थासां कर्म्म " इति कर्म्मसंज्ञा । जहासि = हा + लट् सिप् ।

वाच्य— ..अधिरूढेन...विबोधयन्ति (वैतालिकाः) यं....।...तेन... हीयते निद्रा... ॥ ३८ ॥

सरलार्थः—यस्य ते पूर्वं दुग्धफेननिभायां शय्यायां शयितस्य वैतालिकानां स्तुतिगीतिभिर्निद्राभङ्गो भवतिस्म, तस्य ते साम्प्रतं कुशावृतायां भूमौ शयानस्य शृगालरवैर्निद्राभङ्गो भवति। अहो दशाविपर्य्ययः ॥ ३८ ॥

पुरोपनीतं नृप रामणीयकं
द्विजातिशेषेण यदेतदन्धसा।
तदद्य ते वन्यफलाशिनः परं
परैति कार्श्यं यशसा समं वपुः ॥ ३९ ॥

अन्वयः—नृप यत् एतत् पुरा द्विजातिशेषेण अन्धसा रामणीयकम् उपनीतम्, अद्य वन्यफलाशिनः (सतः) ते तत् वपुः यशसा समं परं कार्श्यं परैति ॥ ३९ ॥

पुरेति ॥ हे नृप, यदेतत्पुरोवर्ति वपुः पुरा द्विजातिशेषेण द्विजभुक्तावशिष्टेनान्धसान्नेन। 'भिस्सा स्त्री भक्तमन्धोऽन्नम्' इत्यमरः रमणीयस्य भावो रामणीयकं मनोहरत्वमुपनीतं प्रापितम्। नयतेर्द्विकर्मकत्वात्प्रधाने कर्मणि क्तः। 'प्रधानकर्मण्याख्येये लादीनाद्विकर्मणाम्' इति वचनात्। अद्य वन्यफलाशिनस्ते तव तद्वपुर्यशसा समं परमतिमात्रं कार्श्यं परैति प्राप्नोति। उभयमपि क्षीयत इत्यर्थः। अत्र सहोक्तिरलङ्कारः। तदुक्तं काव्यप्रकाशे—'सा सहोक्तिः सहार्थस्य बलादेकं द्विवाचकम्' इति ॥

सुबो०—नृप (हे राजन्) यत् एतत् (इदं त्वदीयं वपुः) पुरा (पूर्वं) द्विजातिशेषेण (अतिथिब्राह्मणभुक्तावशिष्टेन) अन्धसा (अन्नेन) रामणीयकं (मनोहरत्वम्) उपनीतं (प्रापितम्) अद्य (इदानीं) वन्यफलाशिनः (वनोद्भवफलभोजिनः सतः) ते (तव) तत् वपुः (शरीरं) यशसा (कीर्त्या) समं (सह) परम् (अत्यन्तं) कार्श्यं (क्षीणतां) परैति (प्राप्नोति) ॥ ३९ ॥

समासः—द्विजातिशेषेण = द्वे जाती येषां ते द्विजातयः, द्विजातिभ्यः शेषं तेन तदुक्तम्—"जन्मना जायते शूद्रः संस्कारैर्द्विज उच्यते" इति।

रामणीयकं रमणीयस्य भावः रामणीयकं । वन्यफलाशिनः=वने भवानि वन्यानि, वन्यानि च तानि फलानि वन्यफलानि तानि अश्नातीति तस्य कार्श्यं=कृशस्य भावः कार्श्यम् ।

व्या० —रामणीयकं=रमणीय+भावार्थे वुञ् ( अकञ् ) गौणकर्म्म । वन्यफलाशिनः=इत्यत्र णिनिः । परैति=परा=इ+लट् तिप् । कार्श्यम्=कृश+भावार्थे ष्यञ् ॥ ३९ ॥

वाच्य०—...उपनीतवत्...द्विजातिशेषं...अन्धः । तेन...परेयते.... वपुषा ॥ ३९ ॥

सरलार्थः—त्वं पूर्वम्, अतिथिब्राह्मणभोजनानन्तरम् नानारसमन्नं भुक्त्वा हृष्टपुष्टशरीर आसीः, इदानीं शत्रुभिर्विताडितो यथा क्षीणयशा अभवस्तथा वन्यफलमात्राहारः सन् क्षीणदेहश्च संवृत्तः ॥ ३९ ॥

अनारतं यौ मणिपीठशायिना-
वरञ्जयद्राजशिरःस्रजां रजः ।
निषीदतस्तौ चरणौ वनेषु ते
मृगद्विजालूनशिखेषु बर्हिषाम् ॥ ४० ॥

अन्वयः—राजशिरःस्रजां रजः अनारतं मणिपीठशायिनौ यौ अरञ्जयत्, तौ ते चरणौ मृगद्विजालूनशिखेषु बर्हिषां वनेषु निषीदतः ॥ ४० ॥

अनारतमिति ॥ अनारतमजस्रं मणिपीठशायिनौ मणिमयपादपीठस्थायिनौ यौ चरणौ राजशिरःस्रजां नमद्भूपालमौलिस्रजां रजः परागोऽरञ्जयत्, तौ ते चरणौ मृगैर्द्विजैश्च तपस्विभिरालूनशिखेषु च्छिन्नाग्रेषु बर्हिषां कुशानाम् । 'बर्हिः कुशहुताशयोः' इति विश्वः । वनेषु निषीदतस्तिष्ठतः ॥

सुबो०—राजशिरःस्रजां ( प्रणतानां राज्ञां शिरःस्थितानां पुष्पमालानां ) रजः ( परागः ) अनारतं ( सततं ) मणिपीठशायिनौ ( मणिमयपादपीठावस्थायिनौ ) यौ ( चरणौ ) अरञ्जयत् ( रञ्जितवत् ), तौ ते (तव) चरणौ (पादौ) मृगद्विजालूनशिखेषु

( मृगाणां हरिणानां द्विजाः दन्ताः तैः आलूनाः ईषत् छिन्नाः शिखा अग्राणि येषु तेषु ) बर्हिषां ( कुशानां वनेषु निषीदतः ( इदानीं तिष्ठतः ) ॥ ४० ॥

समासः—राजशिरःसूनां = राज्ञां शिरांसि तेषु ( स्थिताः ) तेषां वा सूनः तासां । मणिपीठशायिनौ = मणिखचितं पीठं मणिपीठं तस्मिन् शयात-इति मणिपीठशायिनौ । मृगद्विजालूनशिखेषु = मृगाणां द्विजाः तैः आलूना शिखा अग्राणि च येषु तेषु ।

व्या०—मणिपीठशायिनौ = इत्यत्र णिनिः । अरञ्जयत् = रञ्ज + णिच् + लङ् तिप् । निषीदतः नि-सद् + लट् तस् ॥ ४० ॥

वाच्य०—...अरञ्ज्येतां...रजसा । निषद्यते ताभ्यां चरणाभ्यां...४०।

सरलार्थः—तव यौ चरणौ पुरा मणिमयपीठे स्थितौ तदा भयभग्नभूपालानां शिरस्थमाल्यरजोभिश्च रञ्जितावास्तां, ताविदानीं कुशकण्टकक्षतजेन रुधिरेण रञ्जितौ भवतः ॥ ४० ॥

ननु सर्वप्राणिसाधारण्यामापदि का परिदेवनेत्यत्राह—

द्विषन्निमित्ता यदियं दशा ततः
समूलमुन्मूलयतीव मे मनः ।
परैरपर्यासितवीर्यसंपदां
पराभवोऽप्युत्सव एव मानिनाम् ॥ ४१ ॥

अन्वयः—यत् द्विषन्निमित्ता, ततः इयं दशा मे मनः समूलम् उन्मूलयति इव । परैः अपर्यासितवीर्यसम्पदां मानिनां पराभवः अपि उत्सवः एव ॥ ४१ ॥

द्विषदिति ॥ यद्यतः कारणादियं दशाऽवस्था । 'दशा वर्तावव-स्थायाम्' इति विश्वः । द्विषन्तो निमित्तं यस्याः सा । 'द्विषोऽमित्रे' इति शतृप्रत्ययः । अतो मे मनः समूलं साशयमुन्मूलयतीवोत्पाटय-तीव । दैविकीत्वापन्न दुःखायेत्याह-परैरिति । परैःशत्रुभिरपर्या-सितापर्यावर्तिता वीर्यसंपद्येषां तेषां मानिनां पराभवो विपदप्युत्सव एवेति वैधर्म्येणार्थान्तरन्यासः। मानहानिर्दुःसहा,न त्वापादेति भावः॥

सुबो०—यत् ( यस्मात्कारणात् ) द्विषन्निमित्ता ( द्विषन्तः शत्रवो निमित्तानि यस्याः सा, शत्रुकृता भवति ) ततः ( तस्मात् कारणात् ) इयं ( वर्त्तमाना ) दशा ( तव अवस्था ) मे ( मम ) मनः समूलं ( धैर्य्यज्ञानाद्याश्रयसहितं यथा स्यात् तथा ) उन्मूलयति ( उत्पाटयति ) इव । परैः ( शत्रुभिः ) अपर्य्यासितवीर्य्यसम्पदाम् ( अनिराकृतबलश्रियाम्, अपराजितानां ) मानिनां ( मानवतां पुरुषाणां ) पराभवः (विपत्, दैवकृतो दशाविपर्य्ययः) अपि उत्सवः ( सम्पत् ) एव भवति ॥ ४१ ॥

समासः—द्विषन्निमित्ता = द्विषन्तः निमित्तानि यस्याः सा । अपर्यासितवीर्यसम्पदाम् = वीर्यञ्च सम्पच्च वीर्यसम्पदौ अपर्यासिते वीर्यसम्पदौ येषां तेषां ।

व्या०—उन्मूलयति = उत्पाटितं मूलं यस्य तत् उन्मूलम्, तत्करोतीति णिच् । अपर्य्यासितवीर्य्यसम्पदाम् = परि-आस + णिच् + क्त, ॥ ४१ ॥

वाच्य०—द्विषन्निमित्तया भूयते...अनया दशया....उन्मूल्यते...मनः। ....पराभवेन...उत्सवेन भूयते....॥ ४१ ॥

सरलार्थः—शत्रुकृतामिमां दुर्दशां दृष्ट्वा मनो मे व्यथते । दैवकृता चेदियं दशा, तत्र न धैर्य्यमवलम्बनीयं स्यात् ॥ ४१ ॥

कर्त्तव्यमुपदिशति—

विहाय शान्तिं नृप धाम तत्पुनः
प्रसीद संधेहि वधाय विद्विषाम् ।
व्रजन्ति शत्रूनवधूय निःस्पृहाः
शमेन सिद्धिं मुनयो न भूभृतः ॥ ४२ ॥

अन्वयः—नृप शान्तिं विहाय विद्विषां वधाय तत् धाम पुनः संधेहि प्रसीद । निःस्पृहाः मुनयः शत्रून् अवधूय शमेन सिद्धिं व्रजन्ति, भूभृतः न ॥ ४२ ॥

विहायेति ॥ हे नृप, शान्तिं विहाय तत्प्रसिद्धं धाम तेजो विद्विषां वधाय पुनः सन्धेह्यङ्गीकुरु प्रसीद । प्रार्थनायां लोट् । ननु शमेन कार्यसिद्धौ किं क्रोधेनेत्यत्राह-व्रजन्तीति । निःस्पृहा मुनयः शत्रूनवधूय निर्जित्य शमेन क्रोधवर्जनेन सिद्धिं व्रजन्ति । भूभृतस्तु न । कैवल्यकार्यवद्राजकार्यं न शान्तिसाध्यमित्यर्थः ॥

सुबो०—नृप ( हे राजन् ) शान्तिं ( क्षमां ) विहाय ( परित्यज्य ) विद्विषां ( शत्रूणां ) वधाय ( विनाशाय ) तत् ( प्रसिद्धं ) धाम ( तेजः ) पुनः ( भूयः ) संधेहि ( प्रवर्त्तय ) प्रसीद ( प्रसन्नोभव ) । निःस्पृहाः ( विषयासक्तिरहिताः ) मुनयः शत्रून् अवधूय ( उपेक्ष्य ) शमेन ( शान्त्या क्षमया ) सिद्धिं व्रजन्ति ( प्राप्नुवन्ति ), भूभृतः ( राजानस्तु ) न (सिद्धिं न व्रजन्ति) ॥ ४२ ॥

समासः—भूभृतः = भुवं बिभृतीति । निःस्पृहाः = निर्गता स्पृहा येषां ते ।

व्या०—संधेहि = सम्-धा + लोट् । भूभृत इत्यत्र भूभुज इति पाठान्तरम् ॥ ४२ ॥

वाच्य०—....प्रसद्यतां संधीयताम्...। वृज्यते...निःस्पृहैः....सिद्धिः मुनिभिः...भूभृद्भिः ॥ ४२ ॥

सरलार्थः—इदानीं शमं त्यक्त्वा तेजः प्रकाशय । संसारविरक्ता मुनय एव क्षमया सिद्धिं लभन्ते न तु संसारानुरक्ता राजानः । ते क्रोधं विना सिद्धिं न यान्ति ॥ ४२ ॥

पुरःसरा धामवतां यशोधनाः
सुदुःसहं प्राप्य निकारमीदृशम् ।
भवादृशाश्चेदधिकुर्वते रतिं
निराश्रया हन्त हता मनस्विता ॥ ४३ ॥

अन्वयः—धामवतां पुरःसराः यशोधनाः भवादृशाः ईदृशं सुदुःसहं निकारं प्राप्य चेत् रतिम् अधिकुर्वते, ( तदा ) हन्त मनस्विता निराश्रया ( सती ) हता ॥ ४३ ॥

पुर इति ॥ किं च धामवतां तेजस्विनाम् । परनिकारासहिष्णूनामित्यर्थः । पुरः सरन्तीति पुरःसरा अग्रेसराः । 'पुरोऽग्रतोऽग्रेषु सर्तेः' इति टप्रत्ययः । यशोधना भवादृशाः सुदुःसहमतिदुःसहमीदृशमुक्तप्रकारं निकारं पराभवं प्राप्य रतिं संतोषमधिकुर्वते स्वीकुर्वते चेत्तर्हि । हन्त इति खेदे । मनस्विताऽभिमानिता निराश्रया सती हता । तेजस्विजनैकशरणत्वान्मनस्विताया इत्यर्थः । अतः पराक्रमितव्यमिति भावः । यद्यप्यत्र प्रसहनस्यासङ्गतेरधिपूर्वात्करोतेः अधेः प्रसहने' इत्यात्मनेपदं न भवति । 'प्रसहनं परिभवः' इति काशिका । तथाप्यस्याः कर्त्रभिप्रायविवक्षायामेव प्रयोजकत्वात्कर्त्रभिप्राये 'स्वरितञितः-' इत्यात्मनेपदं प्रसिद्धम् ॥

सुबो०—धामवतां ( तेजस्विनां ) पुरःसराः ( अग्रेसराः ) यशोधनाः (यशःप्रियाः) भवादृशाः (त्वत्सदृशा मानिनो वीराः) ईदृशम् ( एवंविधं ) सुदुःसहम् ( अत्यन्तमसह्यं ) निकारं (पराभवं) प्राप्य चेत् ( यदि ) रतिं ( सन्तोषम् ) अधिकुर्वते ( स्वीकुर्वते ) तदा हन्त ( हा ) मनस्विता ( अभिमानिता ) निराश्रया (आश्रयहीना सती) हता ( नष्टा ) ॥ ४२ ॥

समासः—धामवतां = धाम विद्यन्ते येषां तेषां । पुरःसराः = पुरः-सरन्ति ते । यशोधनाः = यश एव धनं येषां ते । मनस्विता = मनस्विनो-भावः मनस्विता ।

व्या० —पुरःसराः = पुरस्-सृ + ट । दुःसहम् = दुर्-सह + कर्म्मणि खल् । अधिकुर्वते परानना श्रयेति पाठान्तरम् । परान् शत्रून् अधिकुर्वते क्षमन्ते इत्यर्थः "अधेः प्रसहने" इत्यात्मनेपदम्, प्रसहनं क्षमाऽभिभवश्च।४२

वाच्य०—पुरःसरैः....यशोधनैः....भवादृशैः...अधिक्रियते रतिम् । निराश्रयया...हतया भूयते मनस्वितया ॥ ४२ ऽ

सरलार्थः—भवादृशाः तेजस्विनो यशोधनाः महापुरुषा अपि एवंप्रकारं पराभवं प्राप्य यदि सन्तोषमवलम्ब्य वर्त्तन्ते तदा अभिमानिता आश्रयाभावात् नश्यत्येव ॥ ४३ ॥

अथ क्षमामेव निरस्तविक्रम-
श्चिराय पर्येषि सुखस्य साधनम्।
विहाय लक्ष्मीपतिलक्ष्म कार्मुकं
जटाधरः सञ्जुहुधीह पावकम्॥ ४४॥

अन्वयः—अथ निरस्तविक्रमः (सन्) चिराय क्षमाम् एव सुखस्य साधनं पर्येषि (तदा) लक्ष्मीपतिलक्ष्म कार्मुकं विहाय जटाधरः सन् इह पावकं जुहुधि॥ ४४॥

अथेति॥ अथ पक्षान्तरे निरस्तविक्रमः सन्। चिराय चिरकालेनापि क्षमां क्षान्तिमेव। 'क्षितिक्षान्त्योः क्षमा' इत्यमरः। सुखस्य साधनं पर्येष्यवगच्छसि तर्हि लक्ष्मीपतिलक्ष्म राजचिह्नं कार्मुकं विहाय। धरतीति धरः। पचाद्यच्। जटानां धरो जटाधरः सन्निह वने पावकं जुहुधि। पावके होमं कुर्वित्यर्थः। अधिकरणे कर्मत्वोपचारः विरक्तस्य किं धनुषेत्यर्थः। 'हुझल्भ्यो हेर्धिः'।

सुबो०—अथ (यदि पुनः) निरस्तविक्रमः (विक्रमहीनः सन्) चिराय (चिरकालेन) क्षमाम् एव सुखस्य साधनं (सुखजनकं) पर्येषि (अवगच्छसि) तदा लक्ष्मीपतिलक्ष्म (राजचिह्नं) कार्मुकं (धनुः) विहाय (परित्यज्य) जटाधरः सन् इह (अस्मिन् वने) पावकम् (अग्निं) जुहुधि हवनेन तर्पय)॥ ४४॥

समासः—निरस्तविक्रमः=निरस्तः विक्रमो येन सः। लक्ष्मीपतिलक्ष्म=लक्ष्मीपतेः लक्ष्म। जटाधरः=धरतीति धरः जटानां धरः।

व्या०—पर्येषि=परि—इ+लट् सिप्। जटाधरः=धरतीति धरः पचाद्यच्। जुहुधि=हु+लोट् सिप् (हि)॥ ४४॥

वाच्य—....क्षमा....निरस्तविक्रमेण (त्वया) परीयते....।....जटाधरेण (त्वया) सता हूयताम्....पावकः॥ ४४॥

सरलार्थः—परन्तु यदि क्षमयैव सुखं भविष्यतीति निश्चिनोषि तदा धनुः परित्यज्य मुनिवेषधारी सन् इह तपस्तपस्व॥ ४४॥

प्रतिज्ञाभङ्गाद् विभेषि चेत् तदपि न किंचिदित्याह—

न समयपरिरक्षणं क्षमं ते
निकृतिपरेषु परेषु भूरिधाम्नः ।
अरिषु हि विजयार्थिनः क्षितीशा
विदधति सोपधि संधिदूषणानि ॥ ४५ ॥

अन्वयः—परेषु निकृतिपरेषु ( सत्सु ) भूरिधाम्नः ते समयपरिरक्षणं क्षमं न । हि विजयार्थिनः क्षितीशाः अरिषु सोपधिसन्धिदूषणानि विदधति ॥ ४५ ॥

नेति ॥ परेषु शत्रुषु । निकृतिः परं प्रधानं येषु तेषु । तथोक्तेष्वपकारतत्परेषु सत्सु भूरिधाम्नो महौजसः प्रतीकारक्षमस्य ते तव समयस्त्रयोदशसंवत्सरान्वने वत्स्यामीत्येवंरूपा संवित् । 'समयाः शपथाचारकालसिद्धान्तसंविदः' इत्यमरः । तस्य परिरक्षणं प्रतीक्षणं न क्षमं न युक्तम् । 'युक्ते क्षमं शक्ते हिते त्रिषु' इत्यमरः । हि यस्माद्विजयार्थिनो विजिगीषवः क्षितीशाः । अरिषु विषये सोपधि सकपटं यथा तथा । 'कपटोऽस्त्री व्याजदम्भोपधयश्छद्मकैतवे' इत्यमरः । संधिदूषणानि विदधति केनचिद्व्याजेन दोषमापाद्य सन्धिं दूषयन्ति । विघटयन्तीत्यर्थः । शक्तस्य हि विजिगीषोः सर्वथा कार्यसाधनं प्रधानमन्यत्समयरक्षणादिकमशक्तस्येति भावः । अर्थान्तरन्यासोऽलङ्कारः । पुष्पिताग्रावृत्तम् ॥

सुबो०—परेषु ( शत्रुषु ) निकृतिपरेषु ( अपकारतत्परेषु सत्सु ) भूरिधाम्नः ( महौजसः ) ते ( तव ) समयपरिरक्षणं ( त्रयोदश संवत्सरान् वने वत्स्यामीति समयस्य प्रतिज्ञायाः परिरक्षणं परिपालनं ) क्षमम् ( उचितं ) न भवति । हि ( यतः ) विजयार्थिनः ( विजिगीषवः ) क्षितीशाः ( राजानः ) अरिषु ( शत्रुषु विषयेषु ) सोपधि ( सकपटं यथा स्यात् तथा ) सन्धिदूषणानि ( सन्धिदोषान् ) विदधति ( कुर्वन्ति ) दोषान् प्रदर्श्य सन्धिं विघटयन्तीत्यर्थः ॥ ४५ ॥

समासः—निकृतिपरेषु = निकृतिः परं प्रधानं येषां तेषु। भूरिधाम्नः = भूरि धाम यस्य तस्य। समयपरिरक्षणं = समयस्य परिरक्षणम्। क्षितीशाः = क्षितेरीशाः। सन्धिदूषणानि = सन्धेः दूषणानि।

व्या०—विदधति = वि–धा + लट् झि ( अति ) ॥ ४५ ॥

वाच्य—....समयपरिरक्षणेन क्षमेन ( भूयते )....।....विजयार्थिभिः क्षितीशैः विधीयन्ते....॥ ४५ ॥

सरलार्थः—अपकारिषु शत्रुषु प्रतिज्ञाभङ्गभयं न कर्त्तव्यम्। छलेन सन्धिदोषं प्रदर्श्य प्रतिज्ञाभङ्गः कर्त्तव्य एव। तत्र राज्ञां दोषो न जायते ॥ ४५ ॥

उक्तमर्थमाशीर्वादपूर्वकमुपसंहरति—

विधिसमयनियोगाद्दीप्तिसंहारजिह्मं
शिथिलवसुमगाधे मग्नमापत्पयोधौ।
रिपुतिमिरमुदस्योदीयमानं दिनादौ
दिनकृतमिव लक्ष्मीस्त्वां समभ्येतु भूयः ॥ ४६ ॥

इति भारविकृतौ महाकाव्ये किरातार्जुनीये
प्रथमः सर्गः।

अन्वयः—लक्ष्मीः विधिसमयनियोगात् दीप्तिसंहारजिह्मं शिथिलवसुं अगाधे आपत्पयोधौ मग्नं रिपुतिमिरम् उदस्य उदीयमानं त्वां दिनादौ दिनकृतम् इव भूयः समभ्येतु ॥ ४६ ॥

विधीति ॥ विधिर्दैवम्। 'विधिर्विधाने दैवे च' इत्यमरः। समयः कालस्तयोर्नियोगान्नियमनाद्धेतोः। तयोर्दुरतिक्रमत्वादिति भावः। अगाधे दुस्तरे। आपत्पयोधिरिवेत्युपमितसमासः। दिनकृतमिवेति वक्ष्यमाणानुसारात्तस्मिन्नापत्पयोधौ मग्नम्। सूर्योऽपि सायं सागरे मज्जति परेद्युरुन्मज्जतीत्यागमः। दीप्तिः प्रताप आतपश्च तस्याः संहारेण जिह्मम्प्रसन्नम्। शिथिलवसुं शिथिलधनम् अन्यत्र शिथिलरश्मिम्। 'वसुर्देवेऽग्नौ रश्मौ च वसु तोये धने मणौ' इति वैजयन्ती। 'शिथिलबलम्' इति पाठे तूभयत्रापि शिथिलशक्तिकमित्यर्थः।

रिपुस्तिमिरमिवेति रिपुतिमिरमुदस्य निरस्योदीयमानमुद्यन्तम्। 'ईङ् गतौ' इति धातोर्दैवादिकात्कर्तरि शानच्। त्वां दिनादौ दिनकृतमिव लक्ष्मीर्भूयः समभ्येतु भजतु। आशिषि लिङ्लोटौ' इति लोट्। चमत्कारकारितया मङ्गलाचरणरूपतया च सर्गान्त्यश्लोकेषु लक्ष्मीशब्दप्रयोगः। यथाह भगवान्भाष्यकारः—'मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथयन्ते धीरपुरुषकाण्यायुष्मत्पुरुषकाणि च भवन्त्यध्येतारश्च प्रवक्तारो भवन्ति' इति। पूर्णोपमेयम्। मालिनी वृत्तम् 'सर्गा तत्वादृत्तभेदः। यथाह दण्डी--'सर्गैरनतिविस्तीर्णैः श्राव्यवृत्तैः सुसंधिभिः। सर्वत्र भिन्नवृत्तान्तैरुपेतं लोकरञ्जकम्॥' इति॥

अथ कविः काव्यवर्णनीयाख्यानपूर्वकं सर्गपरिसमाप्तिं कथयति-इतीत्यादि। इतिशब्दः परिसमाप्तौ। भारविकृताविति कविनामकथनम्। महाकाव्य इति महच्छब्देन लक्षणसंपत्तिः सूचिता। किरातार्जुनीय इति काव्यवर्णनीययोः कथनम्। प्रथमः सर्गः। समाप्त इति शेषः। एवमुत्तरत्रापि द्रष्टव्यम्। किरातार्जुनावधिकृत्य कृतो ग्रन्थः किरातार्जुनीयम्। शिशुक्रन्दयमसभद्वन्द्वेन्द्रजननादिभ्यश्छः' इति द्वन्द्वाच्छप्रत्ययः। राघवपाण्डवीयमितिवत्। तथा ह्यर्जुन एवात्र नायकः। किरातस्तु तदुत्कर्षाय प्रतिभटतया वर्णितः। यथाह दण्डी--'वंशवीर्यप्रतापादि वर्णयित्वा रिपोरपि। तज्जयान्नायकोत्कर्षकथनं च धिनोति नः॥' इति। अथायं संग्रहः--'नेता' मध्यमपाण्डवो भगवतो नारायणस्यांशजस्तस्योत्कर्षकृते त्ववर्यततरां दिव्यः किरातः पुनः। शृङ्गारादिरसोऽङ्गमत्र विजयी वीरःप्रधानो रसः शैलाद्यानि च वर्णितानि बहुशो दिव्यास्त्रलाभः फलम्॥' इति॥

इति श्रीमहामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां किरातार्जुनीयकाव्यव्याख्यायां घण्टापथसमाख्यायां प्रथमः सर्गः समाप्तः।

———

सुबो०—लक्ष्मीः ( राजश्रीः, सूर्य्यपक्षे तेजःसम्पत् ) विधिसमयनियोगात् ( विधिर्दैवस्य समयस्य कालस्य च नियोगात् हेतोः ) दीप्तिसंहारजिह्मं ( दीप्तिः प्रतापः पक्षे आतपः तस्याः संहारेण नाशेन जिह्मम् अप्रसन्नं ) शिथिलवसुं ( शिथिलं क्षीणं वसु धनं पक्षे किरणाः यस्य तम् ) अगाधे ( अपरिच्छिन्ने पक्षे अतले ) आपत्पयोधौ ( आपत् पयोधिरिव तस्मिन्, विपत्सागरे ) मग्नं ( पतितं ) रिपुतिमिरं ( रिपुः तिमिरम् अन्धकार इव तम् ) उदस्य ( निरस्य, दूरीकृत्य ) उदीयमानम् ( अभ्युदयमापद्यमानं ) त्वां दिनादौ ( प्रभाते ) दिनकृतं ( सूर्य्यम् ) इव भूयः ( पुनः ) समभ्येतु ( भजतु ) ॥ ४६ ॥

समासः—विधिसमयनियोगात् = विधिश्च समयश्च विधिसमयौ तयोर्नियोगस्तस्मात् । दीप्तिसंहारजिह्मं = दीप्तेः संहारः दीप्तिसंहारः, तेन जिह्मम् । शिथिलवसुं = शिथिलं वसु यस्य तं । आपत्पयोधौ = आपत्पयोधिरिवेत्यापत्पयोधौ । रिपुतिमिरं = रिपुः तिमिरमिवेति रिपुतिमिरं । दिनादौ = दिनस्य आदिः तस्मिन् ।

व्या०—शिथिलवसुमित्यत्र शिथिलबलं, शिथिलदशमिति च पाठान्तरम्। उदस्य = उद्–अस + ल्यप् । उदीयमानम् = उद्–ई (दिवादि) + शानच् ॥

वाच्य—....दीप्तिसंहारजिह्मः शिथिलवसुः = मग्नः....उदीयमानः.... दिनकृत्....लक्ष्म्या त्वं सममीयस्व....॥ ४६ ॥

सरलार्थः—सूर्य्यो यथा सायं प्रभाहीनः सन् पश्चिमसमुद्रे निमज्जति पुनः प्रातरुदेति च, तथा त्वमपि दैववशात् कालगत्या च विपत्सागरे मग्नोऽसि इदानीं रिपूनभिभूय पुनरभ्युदयं लभस्वं ४६॥

इति श्रीपाठकोपाव्ह गौरीनाथ शर्म्म विरचितया सुबोधिन्याख्यया व्याख्यया सरलार्थया च संवलितो महाकवि भारविविरचितः किरातस्य प्रथमः सर्गः समाप्तः ।

## द्वितीयः सर्गः

विहितां प्रियया मनःप्रिया-
मथ निश्चित्य गिरं गरीयसीम् ।
उपपत्तिमदूर्जिताश्रयं
नृपमूचे वचनं वृकोदरः ॥ १ ॥

अन्वयः—अथ वृकोदरः प्रियया विहितां गिरं गरीयसीं निश्चित्य नृपम् उपपत्तिमत् ऊर्जिताश्रयं वचनम् ऊचे ॥ १ ॥

विहितामिति ॥ अथ वृकोदरः भीमः प्रियया द्रौपद्या । प्रियाग्रहणमस्या हितोपदेशतात्पर्यसूचनार्थम् । विहिताम् । अभिहितामित्यर्थः । विपूर्वस्य दधातेः क्रियासामान्यवाचिनो योग्यविशेषपर्यवसानात् । मनःप्रियामभिमतार्थयोगान्मनोहराम् । विशेषणद्वयेनापि गिरो ग्राह्यत्वमुक्तम् । गिरं गरीयसीं सारवत्तरां निश्चित्य नृपं धर्मराजमुपपत्तिमद्युक्तियुक्तमूर्जिताश्रयमुदारार्थं वचनमूचे उक्तवान् । कर्तरि लिट् । ब्रुवो वचिरादेशः । 'ब्रुविशासि-' इत्यादिना द्विकर्मकत्वम् । 'अकथितं च' इति नृपस्य कर्मत्वम् ॥

सुबो०—अथ ( द्रौपदीवचनानन्तरं ) वृकोदरः ( भीमः ) प्रियया ( द्रौपद्या ) विहितां ( कथितां ) गिरं ( वाचं ) गरीयसीं ( सारवत्तरां ) निश्चित्य ( स्थिरीकृत्य ) नृपं ( राजानं युधिष्ठिरम् ) उपपत्तिमत् ( युक्तियुक्तम् ) ऊर्जिताश्रयम् ( ऊर्जितं बलम् आश्रयो यस्य तत्, तेजोव्यञ्जकं ) वचनं ( वाक्यम् ) ऊचे ( उक्तवान् ) ॥ १ ॥

समास०—मनःप्रियाम् = मनसः प्रिया ताम् । गरीयसीं = अतिशयेन गुर्वी गरीयसी तां ।

व्या०—विहिताम् = वि-धा + कर्मणि क्त । नृपम् = गौणकर्म्म । ऊचे = ब्रु + लिट् त ( ए ) ॥ १ ॥

वाच्य०— ..नृपः....वृकोदरेण ॥ १ ॥

सरलार्थः—अथ भीम आत्मनोऽभिमतं सारगर्भं द्रौपदीवचनमाकर्ण्य युधिष्ठिरं युक्तियुक्तं तेजोव्यञ्जकं वचनमकथयत् ॥१॥

किं तद्वचनं तदाह—

यदवोचत वीक्ष्य मानिनी
परितः स्नेहमयेन चक्षुषा।
अपि वागधिपस्य दुर्वचं
वचनं तद्विदधीत विस्मयम् ॥ २ ॥

अन्वयः—मानिनी स्नेहमयेन चक्षुषा परितः वीक्ष्य यत् अवोचत, वागधिपस्य अपि दुर्वचं तत् वचनं विस्मयं विदधीत॥२॥

यदिति ॥ मानिनी क्षत्रियकुलाभिमानवती द्रौपदी स्नेहमयेन स्नेहप्रचुरेण। 'तत्प्रकृतवचने मयट्'। चक्षुषा ज्ञानचक्षुषा। एतेनाप्तत्वमुक्तम्। परितो वीक्ष्य समन्ततो विविच्य यद्वचनमवोचत। ब्रुवो वक्तेर्वा लुङ्। 'वच उम्' इत्युमागमः। वागधिपस्य बृहस्पतेरपि दुर्वचं वक्तुमशक्यम्। शेषे षष्ठीयम्, न कृद्योगलक्षणा। अतो 'न लोक-' इत्यादिना षष्ठीप्रतिषेधो नास्ति। तद्वचनं विस्मयं विदधीत। सर्वस्यापीति शेषः। अथवा वागधिपस्यापि विस्मयं विदधीतेति सम्बन्धः। दुर्वचम्। केनापीति शेषः। यतः स्त्रैणमपि शास्त्रमनुरुणद्धि हितं चानुबध्नाति। अतो विस्मयकरं ग्राह्यं चैतद्वचनमिति तात्पर्यार्थः॥

सुबो०—मानिनी (कुलाभिमानवती द्रौपदी) स्नेहमयेन (स्नेहप्रचुरेण, स्नेहपूर्णेन) चक्षुषा (ज्ञाननेत्रेण) परितः (समन्तात्, आत्मपरपक्षविषये) वीक्ष्य (विचार्य्य) यत् अवोचत (उक्तवती), वागधिपस्य (बृहस्पतेः) अपि दुर्वचं (वक्तुमशक्यं) तत् वचनं (वचः) विस्मयम् (सर्वेषाम् वागधिपस्य वा आश्चर्य्यं) विदधीत (कुर्य्यात्) ॥ २ ॥

समासः—वागधिपस्य=अधिकृत्य पाति रक्षतीति अधिपः, वाचाम् अधिपः तस्य। "समन्ततस्तु परितः" इति तथा "वचनं वचः" इति चामरः।

व्या०—अवोचत=ब्रु+लुङ् त । वीक्ष्य=वि-ईक्ष+ल्यप् । वागधिपस्य=वाचाम् अधिपः तस्य, शेषे षष्ठी । दुर्वचम्=दुर्-वच+कर्मणि खल् । विदधीत=वि-धा+विधिलिङ् त ( ईत )॥ २ ॥

वाच्य०—यत् अवोचि....मानिन्या...दुर्वचेन वचनेन तेन विधीयते विस्मयः ।

सरलार्थः—द्रौपदी सर्वतो विचार्य्य यद्वचनमुक्तवती, तद्वचनं बृहस्पतिरपि वक्तुं न समर्थः, अतस्तस्यापि विस्मयं जनयेत् ॥ २ ॥

विस्मयकरत्वे हेतुमाह—

विषमोऽपि विगाह्यते नयः
कृततीर्थः पयसामिवाशयः ।
स तु तत्र विशेषदुर्लभः
सदुपन्यस्यति कृत्यवर्त्म यः ॥ ३ ॥

अन्वयः—विषमः अपि नयः पयसाम् आशयः इव कृततीर्थः ( सन् ) विगाह्यते । तु तत्र सः विशेषदुर्लभः यः कृत्यवर्त्म सत् उपन्यस्यति ॥ ३ ॥

विषम इति ॥ विषमोऽपि दुर्बोधोऽपि । अन्यत्र दुष्प्रवेशोऽपि । नयो नीतिशास्त्रम् । पयसामाशयो ह्रद इव । कृततीर्थः कृताभ्यासाद्युपायः सन् । 'तीर्थं शास्त्राध्वरक्षेत्रोपायोपाध्यायमन्त्रिषु' इति विश्वः । अन्यत्र कृतजलावतारः सन् । 'तीर्थं योनौ जलावतारे च इति हलायुधः । विगाह्यते गृह्यते प्रविश्यते च । किंतु तत्र नये जलाशये च स तादृशःपुरुषो विशेषदुर्लभोऽत्यन्तदुर्लभो यः कृत्यं संधिविग्रहादि कार्यं स्नानादिकं च तस्य वर्त्म सत्साधु देशकालाद्यविरुद्धम् । यथा तथा । अन्यत्र गर्तग्राहपाषाणादिरहितम् यथा तथोपन्यस्यत्युदाहरति । 'उपन्यासस्तु वाङ्मुखम् । उपोद्घात उदाहारः' इत्यमरः । यथा केचित्कृततीर्थे पयसि गम्भीरेऽपि प्रवेष्टारः सन्ति । तीर्थकरस्तु विरलः । तद्वन्नीतावपि गूढमपि तत्त्वं वक्तरि

सति बोद्धारः सन्ति। वक्ता तु न सुलभः। अत इयमपठितापि साधु वक्तीति युज्यते विस्मय इत्यर्थः॥

सुबो०—विषमः (दुर्बोधः, जलाशयपक्षे बन्धुरतीरः) अपि नयः (नीतिशास्त्रं) पयसाम् आशयः (जलाशयः) इव कृततीर्थः (कृतगुरुः सन्, पक्षे कृतावतरणस्थानः सन्) विगाह्यते (गृह्यते, पक्षे प्रविश्यते)। तु (किंतु) तत्र (तस्मिन् नये जलाशये च) सः (तादृशः जनः) विशेषदुर्लभः (अत्यन्तदुर्लभः) यः कृत्यवर्त्म (कृत्यस्य सन्धिविग्रहादिकार्य्यस्य, पक्षे स्नानादिकार्य्यस्य वर्त्म उपायं) सत् (शोभनं यथा स्यात् तथा) उपन्यस्यति (उपदिशति, पक्षे करोति)॥ ३॥

समासः – कृततीर्थः=कृतं तीर्थं यस्मिन् सः। 'तीर्थं शास्त्राध्वरक्षेत्रोपायनारीरजःसु च। अवतारर्षिजुष्टाम्बु पात्रोपाध्यायमन्त्रिषु' इति मेदिनी। विशेषदुर्लभः=विशेषेण दुर्लभः। कृत्यवर्त्म=कृत्यस्य वर्त्म।

व्या०—विगाह्यते=वि-गाह+कर्मणि लट् ते (त)। उपन्यस्यति=उप-नि-अस+लट् तिप्॥ ३॥

वाच्य०—विषमम्....विगाहन्ते (सर्वे) नयम् कृततीर्थं...आशयम्। तेन...विशेषदुर्लभेन भूयते....उपन्यस्यते...येन॥ ३॥

सरलार्थः—यथा दुष्प्रवेशोजलाशयः केनचित् घट्टे कृते सति सर्वैः प्रविश्यते, किंतु घट्टकृत एव दुर्लभः, तथा उपदेष्टरि सति सुदुर्बोधं नीतिशास्त्रं सर्वैर्बुध्यते, किंतु तत्र उपदेष्टैव दुर्लभः। असत्युपदेष्टरि यद् द्रौपदी ईदृशीं नीतिशास्त्रानुसारिणीं वाचमवोचत् इदमेवातीव विस्मयकरम्॥ ३॥

अथ द्रौपदीवचनस्य श्रेष्ठत्वमाह—

परिणामसुखे गरीयसि
व्यथकेऽस्मिन्वचसि क्षतौजसाम्।
अतिवीर्यवतीव भेषजे
बहुरल्पीयसि दृश्यते गुणः॥ ४॥

अन्वयः—परिणामसुखे गरीयसि क्षतौजसां व्यथके अल्पीयसि अस्मिन् वचसि अतिवीर्य्यवति भेषजे इव बहुः गुणः दृश्यते ॥ ४ ॥

परिणामेति ॥ परिणामः फलकालः परिपाकावस्था च । तत्र सुखे हिते । 'शस्तं चाथ त्रिषु द्रव्ये पापं पुण्यं सुखादि च' इति सुखशब्दस्य विशेष्यलिङ्गत्वम् । गरीयसि भूयिष्ठे श्रेष्ठे च । क्षतौजसामुभयत्रापि क्षीणशक्तीनां व्यथके युद्धोपोद्बलकत्वाद्भयङ्करे । अन्यत्रादौ संशयादिदुःखजनके । अल्पीयस्यल्पात्तरेऽल्पमात्रे च । उक्तं च—'स्वल्पा च मात्रा बहुलो गुणश्च' इति । अस्मिन्वचसि द्रौपदीवाक्ये । अतिवीर्यवत्यत्यन्तसामर्थ्यवति भेषज औषध इव । 'भेषजौषधभैषज्यम्' इत्यमरः । बहुरनेको गुणो मानत्राणराज्यलाभादिरारोग्यबलपोषादिश्च दृश्यते । अतो ग्राह्यमस्या वचनमिति भावः॥

सुबो०—परिणामसुखे ( अन्ते हितकरे ) गरीयसि (श्रेष्ठे) क्षतौजसां ( क्षीणशक्तीनां ) व्यथके ( खेदजनके ) अल्पीयसि ( स्वल्पमात्रे च ) अस्मिन् वचसि ( द्रौपदीवाक्ये ) अतिवीर्य्यवति ( अत्यन्तसामर्थ्यशालिनि ) भेषजे ( औषधे ) इव बहुः ( अनेकः ) गुणः दृश्यते ( मया अनुभूयते ) ॥ ४ ॥

समासः—परिणामसुखे=परिणामे सुखं तस्मिन् । क्षतौजसाम्=क्षतं ओजो येषां तेषाम् ॥ ४ ॥

व्या०—गरीयसि=गुरु+ईयसु । 'भेषजौषधभैषज्यान्यगदोजायुरित्यपि' इत्यमरः ।

वाच्य०—....बहुम्....पश्यामि गुणम् ॥ ४ ॥

सरलार्थः—उत्कृष्टमौषधं स्वल्पमपि यथा बहुगुणकं भवति तथा द्रौपदीवचनम् स्वल्पमपि सारवत् लक्ष्यते ॥ ४ ॥

सत्यमेवं तथापि नार्युक्ततया मह्यं न रोचते इति चेत् तत्राह—

इयमिष्टगुणाय रोचतां
रुचिरार्था भवतेऽपि भारती ।

ननु वक्तृविशेषनिःस्पृहा
गुणगृह्या वचने विपश्चितः ॥ ५ ॥

अन्वयः—रुचिरार्था इयं भारती इष्टगुणाय भवते अपि रोचताम्। गुणगृह्याः विपश्चितः वचने वक्तृविशेषे निःस्पृहाः ननु ॥ ५ ॥

इयमिति ॥ रुचिरार्था हितार्थसम्पन्नेति रुचिहेतूक्तिः। इयं भारती द्रौपदीवाक्यमिष्टगुणाय। गुणग्राहिण इत्यर्थः। भवते तुभ्यमपि। 'रुच्यर्थानां प्रीयमाणः' इति सम्प्रदानत्वाच्चतुर्थी। रोचतां स्वदताम्। विध्यर्थे लोट्। हितवचने बलादपीच्छां कुर्यादौषधवदिति भावः। तथापि स्त्रैणे वचसि का श्रद्धा तत्राह--नन्विति। गुणानां गृह्या गुणगृह्याः। गुणपक्षपातिन इत्यर्थः। 'यदा स्वैरिवाह्यपक्षेषु च' इति ग्रहेः क्यप्। विपश्चितो विद्वांसः। 'विद्वान्विपश्चिद्बोधकः' इत्यमरः। वचने विषये वक्तृविशेषे स्त्रीपुंसादिलक्षणे निःस्पृहा ननु निरास्थाः खलु। 'बालादपि सुभाषितं ग्राह्यम्' इति न्यायादिति भावः॥

सुबो०—रुचिरार्था ( मम रुचिकरार्थसम्पन्ना ) इयं भारती ( द्रौपद्या उक्तिः ) इष्टगुणाय ( गुणग्राहिणे ) भवते ( तुभ्यम् ) अपि रोचताम् ( स्वदताम् तवापि रुचिकरी भवतु ) गुणगृह्याः ( गुणपक्षपातिनः ) विपश्चितः ( विद्वांसः ) वचने (वाक्यविषये) वक्तृविशेषनिःस्पृहाः ( वक्तॄणां विशेषे स्त्रीपुंसादिलक्षणे भेदे निःस्पृहाः निरास्थाः ) ननु ( खलु भवन्ति ) ॥ ५ ॥

समासः—इष्टगुणाय=इष्टः गुणः यस्य तस्मै। रुचिरार्था=रुचिरः अर्थो यस्याः सा। गुणगृह्याः=गुणानां गृह्याः, विपश्चितः=विप्रकृष्टं चिन्वन्तीति ॥ ५ ॥

व्या०—भवते='रुच्यर्थानां प्रीयमाणः' इति संप्रदानत्वात् चतुर्थी गुणगृह्याः=ग्रह+क्यप्। विपश्चितः=क्विप्, पृषोदरादित्वात् सिद्धम्।

वाच्य०—....रुच्यतां रुचिरार्थया...भारत्या।....वक्तृविशेषनिःस्पृहैः गुणगृह्यैः भूयते...विपश्चिद्भिः ॥ ५ ॥

सरलार्थः—द्रौपद्या इदं वचनं मह्यं रोचते, गुणपक्षपातिने तुभ्यमपि रोचताम्। यतः पण्डिताः, स्त्री इयं पुमानयमिति कृत्वा वक्तृविशेषं न लक्षयन्ति, तदीयवचनस्य गुणमेव गृह्णन्ति ॥५॥

सम्प्रति स्वयमेव नृपमुपालभते—

चतसृष्वपि ते विवेकिनी
नृप विद्यासु निरूढिमागता।
कथमेत्य मतिर्विपर्ययं
करिणी पङ्कमिवावसीदति ॥ ६ ॥

अन्वयः—नृप चतसृषु अपि विद्यासु निरूढिम् आगता विवेकिनी ते मतिः कथं करिणी पङ्कम् इव विपर्य्ययम् एत्य अवसीदति ॥ ६ ॥

चतसृष्विति ॥ नृप, चतसृष्वपि विद्यास्वान्वीक्षिक्यादिषु। 'आन्वीक्षिकी त्रयी वार्ता दण्डनीतिश्च शाश्वती। विद्याश्च ताश्चतस्रस्तु लोकसंस्थितिहेतवः' इति कामन्दकः। निरूढिमागता प्रसिद्धिं गता। अत एव विवेकिनी सदसद्विवेकवती। यथाह मनुः—'आन्वीक्षिक्यां तु विज्ञानं धर्माधर्मौ त्रयीस्थितौ। अर्थानर्थौ तु वार्तायां दण्डनीत्यां नयानयौ ॥' इति ते मतिः कथं करिणी पङ्कमिव विपर्ययं वैपरीत्यमविवेकरूपमेत्यावसीदति नश्यति। तन्न युक्तमिति भावः ॥

सुबो०—नृप (हे राजन्) चतसृषु (आन्वीक्षिकी त्रयी वार्त्ता दण्डनीतिश्चेति चतुःसंख्याकासु) अपि विद्यासु निरूढिं (प्रसिद्धिम्) आगता (प्राप्ता) अतएव विवेकिनी (सदसद्विवेकवती) ते (तव) मतिः (बुद्धिः) कथं करिणी (हस्तिनी) पङ्कम् इव (पङ्कं प्राप्य यथा अवसीदति तथा) विपर्य्ययं (वैपरीत्यम्, अविवेकित्वम्) एत्य (प्राप्य) अवसीदति (नश्यति) ॥ ६ ॥

व्या० —निरूढिम् = नि-रुह + क्ति । अवसीदति = अव-सद + लट् तिप् ॥ ६ ॥

वाच्य—.. विवेकिन्या...आगतया...मत्या...करिष्यया...अवसद्यते ॥

सरलार्थः—विदुषोऽपि तथा विवेकवतोऽपि तव कथमेवं बुद्धिभ्रंशः साम्प्रतं संवृत्तः, येनेदृक् अवसन्नोऽसि ॥ ६ ॥

किमस्माकं कष्टं जातं येनैवं मामुपालभते इति चेत्तत्राह—

विधुरं किमतःपरं परै-
रवगीतां गमिते दशामिमाम् ।
अवसीदति यत्सुरैरपि
त्वयि संभावितवृत्ति पौरुषम् ॥ ७ ॥

अन्वयः—त्वयि परैः इमाम् अवगीतां दशां गमिते ( सति ) सुरैः अपि सम्भावितवृत्ति पौरुषम् अवसीदति यत् अतः परं किं विधुरम् ॥ ७ ॥

विधुरमिति ॥ त्वयि परैः शत्रुभिरिमामीदृशीमवगीतां गर्हिताम् । 'अवगीतं तु निर्वादे सुदुर्दृष्टे च गर्हिते' इति विश्वः । दशां गमिते प्रापिते सति । सुरैरपि संभावितवृत्ति बहुकृतप्रसारम् । अथवा निश्चितसद्भावम् पौरुषं पुरुषकारः । युवादित्वादणप्रत्ययः । अवसीदति नश्यतीति यत् । अतःपरम् अतोऽन्यदधिकं किं विधुरं किं कष्टम् । न किञ्चिदित्यर्थः । 'विधुरं प्रत्यवाये स्यात्कष्टविश्लेषयोरपि' इति वैजयन्ती । अस्तीति शेषः । 'अस्तिर्भवन्तीपरः प्रथमपुरुषोऽप्रयुज्यमानोऽप्यस्ति' इति भाष्यकारः । भवतीति लटः पूर्वाचार्याणां संज्ञा । यद्वा पुरुषाधिकारस्य दुर्दशा सा च शत्रुकृता । तदुपरि महत्कष्टं तच्च त्वदुपेक्षयेत्युपालभ्यस इत्यर्थः ॥

सुबो०—त्वयि परैः ( शत्रुभिः ) इमाम् ( ईदृशीम् ) अवगीतां ( निन्दितां ) दशाम् ( अवस्थां ) गमिते ( प्रापिते सति ) सुरैः ( देवैः ) अपि सम्भावितवृत्ति ( बहुमतप्रसारं ) पौरुषं ( पुरुषकारः ) अवसीदति ( नश्यति इति ) यत्, अतः परम् ( इतोऽधिकं ) किं विधुरं ( कष्टम् ) अस्ति, न किंचिदित्यर्थः ॥ ७ ॥

समासः—सम्भावितवृत्ति = सम्भाविता वृत्तिर्यस्य तत् ॥ ७ ॥

व्या०—अवगीताम् = अव–गै + क्त ॥ ७ ॥

वाच्य—विधुरेण भूयते केन...परेण...। अवसद्यते....सम्भावितवृत्तिना पौरुषेण ॥ ७ ॥

सरलार्थः—शत्रुभिरीदृशीं दुर्दशां प्रापितस्य तव देवैरपि बहुमतं पौरुषं यत् नष्टमतोऽधिकं कष्टं किमन्यदस्ति, इदमेव महाकष्टम् ॥ ७ ॥

उपेक्षाकालोऽयमिति मत्वा उपेक्षे इति चेत् नायमुपेक्षाकाल इति श्लोकद्वयेन विविनक्ति—

द्विषतामुदयः सुमेधसा
गुरुरस्वन्ततरः सुमर्षणः ।
न महानपि भूतिमिच्छता
फलसंपत्प्रवणः परिक्षयः ॥ ८ ॥

अन्वयः—भूतिम् इच्छता सुमेधसा गुरुः अस्वन्ततरः द्विषताम् उदयः सुमर्षणः । महान् अपि फलसम्पत्प्रवणः परिक्षयः न ( सुमर्षणः ) ॥ ८ ॥

द्विषतामिति ॥ भूतिमुदयमिच्छता । शोभना मेधा यस्य तेन सुमेधसा सुधिया । 'नित्यमसिच्प्रजामेधयोः' इत्यसिच्प्रत्ययः । गुरुर्महानप्यस्वन्ततरोऽत्यन्तदुरन्तः । क्षयोन्मुख इत्यर्थः । द्विषतामुदयो वृद्धिः । सुखेन मृष्यत इति सुमर्षणः सुसहः । उपेक्ष्य इत्यर्थः । स्वन्तश्चेद् दुर्मर्षण इति भावः । 'भाषायां शासि—' इत्यादिना खलर्थे युच्प्रत्ययः । महानपि फलसंपत्प्रवणः फलसंपदुन्मुखः । 'प्रनिरन्तर्–' इत्यादिना णत्वम् । परिक्षयो न सुमर्षणः । नोपेक्ष्य इत्यर्थः । अन्यथा तूपेक्ष्य इति भावः । नह्युदय एव प्रतीकार्यो न च क्षय इत्येवोपेक्ष्यः । किन्तु स्वन्तत्वास्वन्तत्वाभ्यामुभावपि प्रतीकार्यावुपेक्ष्यौ च भवत इत्यर्थः ॥

सुबो०—भूतिम् ( उदयम् ) इच्छता ( अभिलषता ) सुमेधसा ( सुबुद्धिना पुरुषेण ) गुरुः ( महान् अपि ) अस्वन्ततरः

( क्षयोन्मुखः ) द्विषतां ( शत्रूणाम् ) उदयः ( वृद्धिः ) सुमर्षणः ( सुसहः, उपेक्ष्यः ) । ( परन्तु ) महान् ( प्रभूतः ) अपि फलसम्पत्प्रवणः ( महाफलोन्मुखः ) परिक्षयः ( द्विषतां ह्रासः ) न ( न सुमर्षणः, न उपेक्ष्यः ) ॥ ८ ॥

समासः—सुमेधसा = शोभना मेधा यस्य तेन, अस्वन्ततरः = शोभनः अन्तो यस्य स स्वन्तः, न स्वन्तः अस्वन्तः, अतिशयेन अस्वन्तः अस्वन्ततरः । फलसम्पत्प्रवणः = फलस्य सम्पत् (समृद्धिः) तस्यां प्रवणः ।

व्या० —फलसम्पत्प्रवणः समासान्तः असिच् प्रत्ययः । सुमर्षणः = सु–मृष + कर्म्मणि खलर्थे युच् ( अन् ) 'तु मृष्यते' इति पाठान्तरम् ॥८॥

वाच्य—...उदयेन गुरुणा अस्वन्ततरेण सुमर्षणेन भूयते ।... महता....फलसम्पत्प्रवणेन परिक्षयेण ॥ ८ ॥

सरलार्थः—परिणामे क्षयो भविष्यतीति निश्चितं चेत् बुध्यते तदा शत्रूणां महानपि अभ्युदयः कालप्रतीक्षया उपेक्ष्यः । परिणामे महाफलं भविष्यतीति चेत् बुध्यते तदा शत्रूणां परिक्षयेऽपि उपेक्षा न कार्य्येति नीतिशास्त्रोपदेशः । दुर्य्योधनस्याभ्युदयः परिणामे महाफलजनको भविष्यतीति यतो बुध्यते ततस्तत्र भवता उपेक्षा न कर्त्तव्या, आशु प्रतीकार एव कर्त्तव्यः ॥ ८ ॥

अचिरेण परस्य भूयसीं
विपरीतां विगणय्य चात्मनः ।
क्षययुक्तिमुपेक्षते कृती
कुरुते तत्प्रतिकारमन्यथा ॥ ९ ॥

अन्वयः—कृती परस्य क्षययुक्तिम् अचिरेण भूयसीम्, आत्मनः विपरीतां च विगणय्य उपेक्षते, अन्यथा तत्प्रतिकारं कुरुते ॥ ९ ॥

अचिरेणेति ॥ कृतमनेनेति कृती । कुशल इत्यर्थः । 'इष्टादिभ्यश्च, इतीनिप्रत्ययः । परस्य शत्रोः क्षययुक्तिं क्षययोगमचिरेणाशुभाविनीं भूयसीं दुरन्तां च, तथात्मनः क्षययुक्तिं विपरीतां चिरभाविनीमल्पीयसीं च विगणय्य विचार्य । 'ल्यपि लघुपूर्वात्' इत्ययादेशः । उपेक्षते । अन्यथोक्तवैपरीत्ये । परस्य क्षययुक्तावल्पीयस्याम्, स्वस्य भूयस्यां च सत्यामित्यर्थः । तत्प्रतिकारं तस्याः क्षययुक्तेः प्रतिकारमचिरेणाशुकुरुते । एवं सति यदा शत्रोरभ्युदयः स्वस्य चातिपरिक्षयो यथास्माकं तदा किं वक्तव्यम् । सद्यः । प्रतिकुरुत इत्यर्थात्सिद्धमनुसन्धेयम् ॥

सुबो०—कृती ( निपुणो जनः ) परस्य ( शत्रोः ) क्षययुक्तिं ( क्षययोगम् ) अचिरेण ( आशु भाविनीं, तथा ) भूयसीम् ( प्रभूततराम् ) आत्मनः ( स्वस्य ) विपरीतां ( विपर्य्यस्तां-चिरेण भाविनीं तथा अल्पीयसीं ) च विगणय्य ( विचार्य्य ) उपेक्षते ( प्रतिकारपराङ्मुखो वर्त्तते ) । अन्यथा ( तद्वैपरीत्ये सति—परस्य क्षययुक्तौ चिरेण अल्पीयस्याम् आत्मनश्च अचिरेण भूयस्यां सत्यां ) तत्प्रतिकारं ( तस्याः क्षययुक्तेः चिकित्सां ) कुरुते ( विदधाति ) ॥ ९ ॥

समास—क्षययुक्तिम्—क्षयस्य युक्तिः ताम् । तत्प्रतिकारं = तस्याः प्रतिकारम् ।

व्या०—भूयसीम् = बहु + ईयसु + ङीप् । विगणय्य = वि-गण + स्वार्थे णिच् + ल्यप् ॥ ९ ॥

वाच्य०—...क्षययुक्तिः उपेक्ष्यते कृतिना । क्रियते तत्प्रतिकारः...॥९॥

सरलार्थः—शत्रोः क्षयः आशु भूयान् भविष्यति आत्मनस्तु विलम्बेन अल्पीयान् भविष्यतीति बुद्ध्वा उपेक्षणीयः । परंतु आत्मनः क्षयः आशु भूयान् भविष्यति परस्य तु विलम्बेन अल्पीयान् भविष्यतीति बुद्ध्वा क्षयस्य प्रतिकारः कर्त्तव्यः । प्रस्तुते विषये दुर्य्योधनस्य क्षयो यदि भवेत् तदा विलम्बेनाल्पी-

यान् भविष्यति, भवतस्तु शीघ्रं भूयान् भविष्यतीत्यतः क्षयस्यास्य प्रतिकारस्त्वया कर्त्तव्यः ॥ ९ ॥

उपेक्षायामनिष्टमाचष्टे—

अनुपालयतामुदेष्यतीं
प्रभुशक्तिं द्विषतामनीहया।
अपयान्त्यचिरान्महीभुजां
जननिर्वादभयादिव श्रियः ॥ १० ॥

अन्वयः—उदेष्यतीं द्विषतां प्रभुशक्तिम् अनीहया अनुपालयतां महीभुजां श्रियः जननिर्वादभयात् इव अचिरात् अपयान्ति ॥ १० ॥

अनुपालयतामिति ॥ उदेष्यतीं वर्धिष्यमाणाम्। 'आच्छीनद्योर्नुम्' इति विकल्पान्नुमभावः। द्विषतां प्रभुशक्तिं कोशदण्डजं तेजः। 'स प्रभावः प्रतापश्च यत्तेजः कोशदण्डजम्' इत्यमरः। अनीहयानुत्साहेनानुपालयतामुपेक्षमाणानां महीभुजां श्रियः सम्पदो जननिर्वादभयान्निकृष्टपुरुषानुरागोत्थलोकापवादभयादिवेति हेतूत्प्रेक्षा। अचिरादपयान्त्यपसरन्ति। यथाह कामन्दकः—'स्त्रीभिः षण्ढ इव श्रीभिरलसः परिभूयते' इति। अतः पराक्रमितव्यमित्यर्थः ॥

सुबो०—उदेष्यतीं ( वर्द्धिष्यमाणां ) द्विषतां ( शत्रूणां ) प्रभुशक्तिं ( कोशदण्डजं तेजः ) अनीहया ( अनुत्साहेन ) अनुपालयताम् ( उपेक्षमाणानां ) महीभुजां ( राज्ञां ) श्रियः ( सम्पदः ) जननिर्वादभयात् ( कापुरुषानुरागजन्यलोकापवादभयात् ) इव अचिरात् ( शीघ्रम् ) अपयान्ति (अपगच्छन्ति॥१०॥

समास—जननिर्वादभयात्=जनानां निर्वादः, तस्मात् भयं तस्मात्, हेतौ पञ्चमी महीभुजां=महीं भुञ्जन्तीति तेषाम् ॥ १० ॥

व्या०—उदेष्यतीम्=उद्-इ+लृटः शतृ+ङीप् ॥ १० ॥

वाच्य—...अपयायते...श्रीभिः ॥ १० ॥

सरलार्थः—ये राजानः विना चेष्टया शत्रूणाम् अभ्युदयम् उपेक्षते, ते सम्पदं कदापि न लभन्ते ॥ १० ॥

परिक्षीणोऽहं कथं प्रबलेन स्पर्द्धे इति चेत् तत्राह—

क्षययुक्तमपि स्वभावजं
दधतं धाम शिवं समृद्धये ।
प्रणमन्त्यनपायमुत्थितं
प्रतिपच्चन्द्रमिव प्रजा नृपम् ॥ ११ ॥

अन्वयः—क्षययुक्तम् अपि स्वभावजं शिवं धाम दधतं समृद्धये अनपायम् उत्थितं नृपं प्रजाः प्रतिपच्चन्द्रम् इव प्रणमन्ति॥

क्षयेति ॥ क्षययुक्तमपि तथा क्षीणमपि सन्तं स्वभावजं सहजं शिवं सर्वलोकाह्लादकं धाम क्षात्रं तेजः प्रकाशं च दधतं समृद्धये वृद्ध्यर्थमुत्थितमुद्युक्तम् । वर्धिष्णुमित्यर्थः । नृपं प्रजाः । प्रतिपच्चन्द्रं द्वितीयाचन्द्रमिवेत्यर्थः । प्रतिपच्छब्देन द्वितीयाग्रहणम् । प्रतिपदि तस्यादृश्यत्वादिति । प्रणमन्ति । प्रह्वीभावेन वर्तन्त इति भावः । चन्द्रं तु नमस्कुर्वन्ति । क्षीणस्याप्युत्साहः कार्यसिद्धेर्निदानमित्यर्थः । 'जयं हि सततोत्साही दुर्बलोऽपि समश्नुते' इति कामन्दकः ॥

सुबो०—क्षययुक्तम् ( परिक्षीणं सन्तम् ) अपि स्वभावजं ( सहजं ) शिवं ( सर्वलोकं सुखकरं ) धाम ( तेजः ) दधतं ( धारयन्तं ) समृद्धये ( वृद्ध्यर्थम् ) अनपायम् ( आलस्यादि-दोषरहितं यथा स्यात् तथा, चन्द्रपक्षे मेघाद्यन्तरायशून्यं यथा स्यात् तथा ) उत्थितम् ( उद्युक्तं, पक्षे उदितं ) नृपं ( राजानं ) प्रजाः ( लोकाः ) प्रतिपच्चन्द्रं ( शुक्लपक्षे प्रथमोदितं चन्द्रम् ) इव प्रणमन्ति ( नम्रभावेन अनुगच्छन्ति, पक्षे नमस्कुर्वन्ति॥ ११॥

समास—क्षययुक्तम् = क्षयेण युक्तः तम् । स्वभावजं = स्वभावात् जातम् । प्रतिपच्चन्द्रम् = प्रतिपदश्चन्द्रः तम् ।

व्या०—दधतम् = धा + शतृ ॥ ११ ॥

वाच्य—....दधत्....प्रणम्यते....उत्थितः प्रतिपच्चन्द्रः....प्रजाभिः नृपः ॥ ११ ॥

सरलार्थः—परिक्षीणोऽपि प्रजारञ्जनो राजा यदि राज्यलाभार्थं प्रयतते, तदा सर्वाः प्रजास्तस्य सहाया भवन्ति ॥ ११ ॥

ननु प्रभुशक्तिशून्यस्योत्साहः कुत्रोपयुज्यते इत्यत्राह—

प्रभवः खलु कोशदण्डयोः
कृतपञ्चाङ्गविनिर्णयो नयः।
स विधेयपदेषु दक्षतां
नियतिं लोक इवानुरुध्यते ॥ १२ ॥

अन्वयः—कृतपञ्चाङ्गविनिर्णयः नयः कोशदण्डयोः प्रभवः सः विधेयपदेषु लोकः नियतिम् इव दक्षताम् अनुरुध्यते ॥ १२॥

प्रभव इति ॥ कर्मणामारम्भोपायः पुरुषद्रव्यसम्पद्देशकालविभागो विनिपातप्रतीकारः कार्यसिद्धिश्चेति पञ्चाङ्गानि। यथाह कामन्दकः—'सहायाः साधनोपाया विभागो देशकालयोः। विनिपातप्रतीकारः सिद्धिः पञ्चाङ्गमिष्यते ॥' इति पञ्चानामङ्गानां विनिर्णयः पञ्चाङ्गविनिर्णयः। 'तद्धितार्थ-' इत्यादिनोत्तरपदसमासः। कृतः पञ्चाङ्गविनिर्णयो यस्य येन वा स तथोक्तः। नयो नीतिः। मन्त्र इति यावत्। कोशोऽर्थराशिः। 'कोशोऽस्त्री कुड्मले खड्गपिधानेऽर्थौघदिव्ययोः' इत्यमरः। दण्डश्चतुरङ्गसैन्यम्। 'दण्डोऽस्त्री शासने राज्ञां हिंसायां लगुडे यमे। यात्राज्ञायां सैन्यभेदे' इति वैजयन्ती। तयोः कोशदण्डयोः। प्रभुशक्तेरित्यर्थः। प्रभवत्यस्मादिति प्रभवः कारणम्। 'ऋदोरप्' स नयो विधेयपदेषु कार्यवस्तुषु 'पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुषु' इत्यमरः। दक्षतां क्षिप्रकारित्वम्। उत्साहमित्यर्थः। लोकः कृष्यादिप्रवृत्तो जनः। नियतिं दैवमिव। 'नियतिर्नियमे दैवे' इति विश्वः। अनुरुध्यतेऽनुसरति। रुधेर्दैवादिकात्कर्तरि लट्। मन्त्रस्यापि मूलमुत्साहस्तन्मूलायाः प्रभुशक्तेर्मूलमिति किमु वक्तव्यम्। अतः स एवाश्रयणीयः यतो नक्तन्दिवं मन्त्रयतस्तस्यापि प्रभोर्निरुत्साहस्य न किञ्चित्सिद्ध्यतीति ॥

सुबो०—कृतपञ्चाङ्गविनिर्णयः ( "सहायाः साधनोपाया विभागो देशकालयोः। विनिपातप्रतीकारः सिद्धिः पञ्चाङ्गमिष्यते" इत्युक्तानां पञ्चानाम् अङ्गानां विनिर्णयः पञ्चाङ्गविनिर्णयः, कृतः पञ्चाङ्गविनिर्णयः यस्य सः ) नयः ( नीतिः ) कोशदण्डयोः ( कोशस्य अर्थराशेः दण्डस्य चतुरङ्गसैन्यस्य च ) प्रभवः ( कारणं भवति )। सः ( तादृशो नयः ) विधेयपदेषु ( कार्य्यवस्तुषु ) लोकः ( कृष्यादिप्रवृत्तो जनः ) नियतिं ( दैवम् ) इव दक्षतां ( निपुणताम्, उत्साहम् ) अनुरुध्यते ( अनुसरति ) ॥ १२ ॥

समासः—कोशदण्डयोः = कोशश्च दण्डश्च तयोः। 'पदं व्यवसितत्राण-स्थानलक्ष्माङ्घ्रिवस्तुषु' इत्यमरः। विधेयपदेषु = विधेयान्येव पदानि तेषु।

व्या०—अनुरुध्यते = अनु-रुध + कर्त्तरि लट् त ( ते ) ॥ १२ ॥

वाच्य—प्रभवेन भूयते...कृतपञ्चाङ्गविनिर्णयेन नयेन। तेन....दक्षता नियतिः लोकेन...॥ १२ ॥

सरलार्थः—पञ्चाङ्गविनिर्णयं कृत्वा प्रवर्त्तितायां नीतौ अर्थराशेः सैन्यसङ्ग्रहस्य अभावो न भवति। सा तु नीतिः कर्त्तव्यकर्म्मसु दक्षतामपेक्षते। एवं बुद्धा भवता पराक्रमितव्यम् ॥

पुरुषकार एव सर्वथा प्रधानमित्याह—

अभिमानवतो मनस्विनः
प्रियमुच्चैः पदमारुरुक्षतः।
विनिपातनिवर्तनक्षमं
मतमालम्बनमात्मपौरुषम् ॥ १३ ॥

अन्वयः—अभिमानवतः प्रियम् उच्चैः पदम् आरुरुक्षतः मनस्विनः आत्मपौरुषं विनिपातनिवर्त्तनक्षमम् आलम्बनं मतम् ॥

अभिमानवत इति ॥ अभिमानवतो मानधनस्य प्रियमिष्टमुच्चैरुन्नतं पदं स्थानं राज्यादिकमारुरुक्षत आरोढुमिच्छतः प्राप्तुकामस्य मनस्विनो धीरस्यात्मपौरुषं स्वपुरुषकार एव विनिपात-

निवर्तनक्षममनर्थप्रतीकारसमर्थमालम्बनं सहकारि मतमिष्टम् । यथा कस्यचित्तुङ्गमारोहतः किञ्चित्पतनप्रतिबन्धकमनुचरहस्तादिकमालम्बनं तद्वदिति ध्वनिः । किं पौरुषादन्यैः सहायैः शूराणामिति भावः ॥

सुबो०—अभिमानवतः ( मानधनस्य ) प्रियम् ( अभीष्टम् ) उच्चैः ( उन्नतं ) पदं ( राज्यादिकं स्थानम् ) आरुरुक्षतः ( आरोढुमिच्छतः ) मनस्विनः ( धीरस्य जनस्य ) आत्मपौरुषं ( स्वपुरुषकार एव ) विनिपातनिवर्त्तनक्षमम् ( अनर्थप्रतिकारसमर्थम् ) आलम्बनं ( साहाय्यकारि ) मतम् ( इष्टम् ) ॥ १३ ॥

समासः—अभिमानवतः = अभिमानोऽस्यास्तीति तस्य । विनिपातनिवर्त्तनक्षमम् = विनिपातस्य निवर्त्तनं, तस्मिन् क्षमम् । मनस्विनः = प्रशस्तं मनः अस्ति अस्य तस्य । आत्मपौरुषं = आत्मनः पौरुषम् ।

व्या०—उच्चैरित्यव्ययम् । आरुरुक्षतः = आङ्-रुह + सन् + शतृ । मतम् = मन + वर्त्तमाने कर्म्मणि क्त ॥ १३ ॥

वाच्य—... मन्यन्ते ( पण्डिताः ) ॥ १३ ॥

सरलार्थः—यथा कस्यचित् पुरुषस्य उच्चस्थानम् आरोहतः पतननिवृत्तये अनुचर हस्तादिकम् आलम्बनं भवति, तथा राज्यपदमारोढुमिच्छतः पतननिवारणाय निजपुरुषकार एव आलम्बनमिति नीतिवेदिनां मतम् । पुरुषकारपरायणस्य पतनं न भवतीत्यतः सर्वथा पौरुषमेवावलम्बनीयम् ॥ १३ ॥

पौरुषानङ्गीकारे दोषमाह—

विपदोऽभिभवन्त्यविक्रमं
रहयत्यापदुपेतमायतिः ।
नियता लघुता निरायते-
रगरीयान्न पदं नृपश्रियः ॥ १४ ॥

अन्वयः—अविक्रमं विपदः अभिभवन्ति, आपदुपेतम् आयतिः रहयति, निरायतेः लघुता नियता, अगरीयान् नृपश्रियः पदं न ॥ १४ ॥

विपद इति ॥ अविक्रमं पौरुषहीनं विपदोऽभिभवन्त्याक्रामन्ति । आपदुपेतं विपन्नमायतिरुत्तरकालः । 'उत्तरः काल आयतिः' इत्यमरः । रहयति त्यजति । निरायतेः । आसन्नक्षयस्येत्यर्थः । लघुताऽगौरवं नियताऽवश्यम्भाविनी । न कश्चिदेनमाद्रियत इत्यर्थः । अगरीयाँल्लघीयान्नृपश्रियो राजलक्ष्म्या पदमास्पदं न भवति । यद्वा नृपेति पदच्छेदः । तस्मात्पौरुषं कर्तव्यमेवेत्यर्थः । अत्र पूर्वपूर्वस्याविक्रमत्वादुरुत्तरोत्तरं विपदादिकं प्रति कारणत्वात्कारणमालाख्योऽलङ्कारः । तथा च सूत्रम्—'पूर्वपूर्वस्योत्तरोत्तरहेतुत्वे कारणमाला' इति ॥

सुबो०—अविक्रमं ( पुरुषकारहीनं जनं ) विपदः अभिभवन्ति ( आक्रामन्ति ) । आपदुपेतं ( विपदभिभूतं जनम् ) आयतिः ( प्रभावः ) रहयति ( त्यजति ) । निरायतेः ( निष्प्रभावस्य सतः ) लघुता ( अगौरवं ) नियता ( निश्चिता ) अगरीयान् ( गौरवहीनो जनः ) नृपश्रियः ( राजलक्ष्म्याः ) पदं (स्थानं) न भवति ॥१४॥

समासः—अविक्रमम् = नास्ति विक्रमो यस्य तम् । आपदुपेतम् = आपद्भिः उपेतः तम्; उप–इ + क्त । निरायतेः = नास्ति आयतिर्यस्य तस्य; "आयतिस्तु स्त्रियां दैर्घ्ये प्रभावागामिकालयोः" इति मेदिनी ॥ १४ ॥

व्या०—रहयति = रह + स्वार्थे णिच् + लट्ति ॥ १४ ॥

वाच्य—विपद्भिः अभिभूयते अविक्रमः । रह्यते आपदुपेतः आयत्या । नियतया लघुतया भूयते...। अगरीयसा...पदेन भूयते...॥ १४ ॥

सरलार्थः—पुरुषकारहीनो जनः विपदमाप्नोति । विपदापन्नः प्रभावहीनो भवति । प्रभावहीनो लघुर्भवति । लघुर्हि राज्याधिकारी न भवति ॥ १४ ॥

फलितमाह—

तदलं प्रतिपक्षमुन्नते-
रवलम्ब्य व्यवसायवन्ध्यताम्।
निवसन्ति पराक्रमाश्रया
न विषादेन समं समृद्धयः॥ १५॥

अन्वयः—तत् उन्नतेः प्रतिपक्षं व्यवसायवन्ध्यताम् अवलम्ब्य अलम्। पराक्रमाश्रयाः समृद्धयः विषादेन समं न निवसन्ति॥१५॥

तदिति॥ तत्तस्मात्। उपेक्षायां दोषसम्भवादित्यर्थः। उन्नतेरभ्युदयस्य प्रतिपक्षमन्तरायं व्यवसायवन्ध्यतामुद्योगशून्यतामवलम्ब्यालम्। अवलम्बनेनालमित्यर्थः। 'अलङ्कल्वोः प्रतिषेधयोः प्राचां क्त्वा' इति क्त्वाप्रत्ययः। तस्य ल्यबादेशः। तथाहि। पराक्रम आश्रयः कारणं यासां तास्तथोक्ताः समृद्धयः सम्पदो विषादेन समममुत्साहेन सह न निवसन्ति। पौरुषसाध्याः सम्पदो नानुत्साहसाध्याः उभयोः सहावस्थानविरोधादित्यर्थः। वैधर्म्येण कार्यकारणरूपोऽर्थान्तरन्यासः॥

सुबो०—तत् (तस्माद्धेतोः, पुरुषाकारानालम्बने पूर्वोक्तदोषनिचयसम्भवाद्धेतोः) उन्नतेः (अभ्युदयस्य) प्रतिपक्षं (प्रतिकूलभूतां) व्यवसायवन्ध्यताम् (उद्योगशून्यताम्) अवलम्ब्य अलम् (न अवलम्बय इत्यर्थः)। (तथाहि) पराक्रमाश्रयाः (पुरुषकाराधीनाः) समृद्धयः (सम्पदः) विषादेन (अनुत्साहेन) समं (सह) न निवसन्ति (न तिष्ठन्ति)॥ १५॥

समासः—व्यवसायवन्ध्यताम्=व्यवसाये वन्ध्यः, तस्य भावः तत्ताम्। पराक्रमाश्रयाः=पराक्रमः आश्रयो यासां ताः॥ १५॥

व्या०—अवलम्ब्य=अव-लबि+निषेधार्थालंशब्दयोगे क्त्वा, तस्य ल्यबादेशः॥ १५॥

वाच्य—...न्युष्यते पराक्रमाश्रयाभिः...समृद्धिभिः॥ १५॥

सरलार्थः—तस्मादुत्साहहीनो मा भूः। उत्साहहीनता हि उन्नतेः प्रतिकूला भवति। किंच उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः न त्वनुद्योगिनमिति उद्योगः कार्य्यः॥ १५॥

ननु समयः प्रतीक्ष्यते, किं त्वरयेत्यत्राह—

अथ चेदवधिः प्रतीक्ष्यते
कथमाविष्कृतजिह्मवृत्तिना ।
धृतराष्ट्रसुतेन सुत्यजा-
श्चिरमास्वाद्य नरेन्द्रसम्पदः ॥ १६ ॥

अन्वयः—अथ अवधिः प्रतीक्ष्यते चेत्, आविष्कृतजिह्मवृत्तिना धृतराष्ट्रसुतेन नरेन्द्रसम्पदः चिरम् आस्वाद्य कथं सुत्यजाः ॥ १६ ॥

अथेति ॥ अथावधिः कालः प्रतीक्ष्यते चेत् । 'अवधिस्त्ववधाने स्यात्सीम्नि काले विलेऽपि च' इति विश्वः । आविष्कृतजिह्मवृत्तिना प्रकटितकपटव्यवहारेण धृतराष्ट्रसुतेन दुर्योधनेन नरेन्द्रसम्पदो राज्यसम्पदः । नरेन्द्रेति वा पदच्छेदः । चिरं चतुर्दशवर्षाण्यास्वाद्यानुभूय कथं सुत्यजाः । ज्ञातास्वादेन तेन पश्चादपि सुखेन युद्धक्लेशं विना न त्यक्ष्यन्त एवेत्यवधिप्रतीक्षणं व्यर्थमित्यर्थः ।

सुबो०—अथ ( पक्षान्तरे, परंतु ) अवधिः ( कालः, वनवासे द्वादश वर्षाणि अज्ञातवासे चैकं वर्षमिति त्रयोदशवर्षात्मकः समयः ) प्रतीक्ष्यते ( त्वया पाल्यते ) चेत् ( यदि, तदा ) आविष्कृतजिह्मवृत्तिना ( प्रकटितकपटव्यवहारेण ) धृतराष्ट्रसुतेन ( कपटाचारिणो धृतराष्ट्रस्य पुत्रेण दुर्योधनेन ) नरेन्द्रसम्पदः ( राजश्रियः ) चिरम् ( एतावन्तं सुदीर्घकालम् ) आस्वाद्य ( अनुभूय ) कथं ( केन प्रकारेण ) सुत्यजाः ( अक्लेशेन त्याज्या भवन्ति ॥ १६ ॥

समासः—आविष्कृतजिह्मवृत्तिना = जिह्मा वृत्तिः जिह्मवृत्तिः, आविष्कृता जिह्मवृत्तिः येन तेन ॥ १६ ॥

व्या०—प्रतीक्ष्यते = प्रति-ईक्ष + कर्म्मणि लट् । सुत्यजाः = सु-त्यज + कर्म्मणि खल् । आस्वाद्य = आङ्-स्वाद + ल्यप् ॥ १६ ॥

वाच्य—...अवधि प्रतीक्षसे ( त्वम् )...सुत्यजाभिः भूयते...नरेन्द्र-सम्पद्भिः ॥ १६ ॥

सरलार्थः—वनवासमज्ञातवासं च समाप्य राज्याहरणाय यतिष्ये इति चेन्मन्यसे, तदा राज्याहरणं सुकरं न भविष्यति। यतः कपटाचारिणो धृतराष्ट्रस्य,पुत्रः स्वयमपि कपटाचारी दुर्योधनः त्रयोदश वर्षाण्यविच्छेदेन स्वच्छन्दमुपभुज्य राज्यं सहसा न त्यक्ष्यत्येव। १६।

तदा दैववशात् स्वयमेव दास्यति चेत् तदप्यस्मभ्यं न रोचेतेत्याह—

द्विषता विहितं त्वयाऽथवा
यदि लब्धा पुनरात्मनः पदम्।
जननाथ तवानुजन्मनां
कृतमाविष्कृतपौरुषैर्भुजैः ॥ १७ ॥

अन्वयः—अथवा द्विषता पुनः विहितम् आत्मनः पदं त्वया लब्धा यदि, जननाथ तव अनुजन्मनाम् आविष्कृतपौरुषैः भुजैः कृतम् ॥ १७ ॥

द्विषतेति ॥ अथवा द्विषता विहितं पुनः प्रत्यर्पितमात्मनः पदं राज्यं त्वया लब्धा लप्स्यते यदि। लभेः कर्मणि लुट्। हे जननाथ, तवानुजन्मनामनुजानामाविष्कृतपौरुषैः प्रकटितपराक्रमैर्भुजैः कृतमलम्। अस्मद्भुजैर्न किञ्चित्साध्यमित्यर्थः। राज्यदानादानयोर्द्विषतामेव स्वातन्त्र्येऽस्मद्भुजवैफल्यात्। 'क्षत्रियस्य विजितव्यम्' इति शास्त्रात् क्षात्रेणैव राज्यं ग्राह्यमिति भावः। कृतमिति प्रतिषेधार्थमव्ययं चादिषु पठ्यते 'कृतमिति निवारणनिषेधयोः' इति गणव्याख्याने। भुजैरिति गम्यमानसाधनक्रियापेक्षया करणत्वात्तृतीया। उक्तं च न्यासोद्द्योते—'केवलं श्रूयमाणैव क्रिया निमित्तं कारकभावस्यापि तु गम्यमानस्यापि' इति ॥

सुबो०—अथवा द्विषता ( शत्रुणा ) पुनः विहितं ( प्रत्यर्पितम् ) आत्मनः ( स्वस्य ) पदं ( राज्यं ) त्वया लब्धा

( लप्स्यते ) यदि, ( तदा ) जननाथ ( हे राजन् ) तव अनुजन्मनाम् ( अनुजानाम् अस्माकम् ) आविष्कृतपौरुषैः ( प्रकटितपराक्रमैः ) भुजैः ( बाहुभिः ) कृतम् ( अलम्, किंचित् न साध्यमित्यर्थः ॥ १७ ॥

समासः—जननाथ = जनानां नाथस्तत् सम्बुद्धौ । अनुजन्मनाम् = अनु ( पश्चात् ) जन्म येषां तेषाम् । आविष्कृतपौरुषैः = आविष्कृतं पौरुषं यैः तैः ॥ १७ ॥

व्या०—लब्धा = लभ + कर्म्मणि लुट् । कृतम् = निषेधार्थकम् अव्ययम् । भुजैः = गम्यमानापि क्रिया कारकविभक्तौ प्रयोजिकेति करणे तृतीया ॥ १७ ॥

वाच्य—...त्वम्...लब्धासि...॥ १७ ॥

सरलार्थः—त्रयोदशवर्षावसाने दुर्य्योधनेन कृपया प्रत्यर्पितं राज्यं भोक्ष्यसे चेत् तदा अस्माकं जगत् प्रथितेन बाहुबलेन किं प्रयोजनम् । धिगस्माकं भुजबलं धिक् च त्वां परप्रसादभोजिनम् ॥

ननु साम्नैव कार्य्यसिद्धौ किं पराक्रमेणेत्यत्राह—

मदसिक्तमुखैर्मृगाधिपः
करिभिर्वर्तयते स्वयं हतैः ।
लघयन्खलु तेजसा जग-
न्न महानिच्छति भूतिमन्यतः ॥ १८ ॥

अन्वयः—मृगाधिपः मदसिक्तमुखैः स्वयं हतैः करिभिः वर्तयते । तेजसा जगत् लघयन् महान् अन्यतः भूतिं न इच्छति खलु ॥ १८ ॥

मदेति ॥ मृगाधिपः सिंहो मदसिक्तमुखैः । मदवर्षिभिरित्यर्थः । स्वयं स्वेनैव हतैः करिभिर्वर्तयते वृत्तिं करोति । तैरेव जीवतीत्यर्थः । चौरादिकाद् वृत्तेर्लट् । भौवादिकस्य तु 'अणावकर्मकाच्चित्तवत्कर्तृकात्' इति परस्मैपदनियमादिति । तथाहि । तेजसा प्रभावेण । 'तेजो बले प्रभावे च ज्योतिष्यर्चिषि रेतसि' इति वैजयन्ती ।

घयँल्लघूकुर्वन्महांस्तेजस्व्यन्यतोऽन्यस्मात्पुरुषाद् भूतिं वृद्धिं नेच्छति खलु। नहि तेजस्विनः परायत्तवृत्तित्वं युक्तम्। मनुवचनं त्वशूरविषयमिति भावः। विशेषेण वक्ष्यमाणसामान्यसमर्थनरूपोऽर्थान्तरन्यासः॥

सुबो०—मृगाधिपः (सिंहः) मदसिक्तमुखैः (मदस्राविभिः) स्वयम् (आत्मना) हतैः (व्यापादितैः) करिभिः (गजैः) वर्तयते (जीविकां निर्वाहयति)। (तथाहि) तेजसा (पराक्रमेण) जगत् लघयन् (लघूकुर्वन्) महान् (तेजस्वी जनः) अन्यतः (अन्यस्मात् पुरुषात्) भूतिम् (ऐश्वर्य्यं) न इच्छति (न अभिलषति) खलु (निश्चितम्)॥ १८॥

समासः—मदसिक्तमुखैः=मदेन सिक्तानि मुखानि येषां तैः॥ १८॥

व्या०—वर्तयते=वृत (चुरादि)+स्वार्थे णिच्+लट्। लघयन्=लघु+करोत्यर्थे णिच्+शतृ॥ १८॥

वाच्य—...मृगाधिपेन...वर्त्यते...। लघयता...महता इष्यते भूतिः१८॥

सरलार्थः—पशुरपि सिंहः मदमत्तान् गजान् स्वयं व्यापाद्य भक्षयति, न तु दुर्बलान् न चान्येन व्यापादितान्। तथा तेजस्वी जनः स्वतेजसैव बलवता सह विगृह्य सम्पदमर्जयति, न तु दुर्बलं पीडयित्वा नापि परप्रदत्तामिति॥ १८॥

ननु युद्धे कृते प्राणात्ययो घटेत ततः किं राज्येनेत्यत्राह—

अभिमानधनस्य गत्वरै-
रसुभिः स्यास्तु यशश्चिचीषतः।
अचिरांशुविलासचञ्चला
ननु लक्ष्मीः फलमानुषङ्गिकम्॥ १९॥

अन्वयः—अभिमानधनस्य गत्वरैः असुभिः स्यास्तु यशः चिचीषतः अचिरांशुविलासचञ्चला लक्ष्मीः आनुषङ्गिकं फलं ननु॥ १९॥

अभिमानेति ॥ अभिमानधनस्य वैरिनिर्यातनमात्रनिष्ठस्य । अतएव गत्वरैर्गमनशीलैरस्थिरैः । 'गत्वरश्च' इति क्वरबन्तो निपातः । असुभिः प्राणैः करणैः । पुंसिभूम्न्यसवः प्राणाः' इत्यमरः । स्थास्नु स्थिरम् । 'ग्लाजिस्थश्च ग्स्नुः' इति ग्स्नुप्रत्ययः । यशश्चिचीषतश्चेतुं संग्रहीतुमिच्छतः । चिनोतेः सन्नन्ताच्छतृप्रत्ययः । अचिरमंशवो यस्याः साचिरांशुर्विद्युत्तस्या विलासः स्फुरणं तद्वच्चञ्चला । क्षणिकेत्यर्थः । लक्ष्मीः सम्पदनुषङ्गादागतमानुषङ्गिकमन्वाचयशिष्टमल्पं फलम् । मानत्राणजं यश एव मुख्यफलमभ्युच्चयस्तु लक्ष्मीरिति मानिनामिदमेव श्लाघ्यमित्यर्थः । अत्रास्थिरप्राणत्यागेन स्थिरयशःस्वीकाराभिधानान्न्यूनाधिकविनिमयाख्यः परिवृत्त्यलङ्कारः । तदुक्तं काव्यप्रकाशे—'परिवृत्तिर्विनिमयो योऽर्थानां स्यात्समासमैः' इति ॥

सुबो०—अभिमानधनस्य ( आत्मसम्मानरक्षातत्परस्य, अतएव ) गत्वरैः ( विनश्वरैः ) असुभिः ( प्राणैः ) स्थास्नु ( अविनश्वरं ) यशः ( ख्यातिं ) चिचीषतः ( संग्रहीतुमिच्छतो जनस्य ) अचिरांशुविलासचञ्चला ( विद्युत्स्फुरणमिव चञ्चला, क्षणस्थायिनी ) लक्ष्मीः ( सम्पत् ) आनुषङ्गिकम् ( अवान्तरं ) फलं ननु ( निश्चितम् ) ॥ १९ ॥

समासः—अभिमानधनस्य = अभिमान एव धन यस्य तस्य । चिचीषतः = चेतुमिच्छतः । अचिरांशुविलासचञ्चला = अचिराः ( क्षणस्थायिनः ) अंशवः ( प्रभाः ) यस्याः सा अचिरांशुः, तस्या विलासः, स इव चञ्चला आनुषङ्गिकं = अनुषङ्गादागतम् । ॥ १९ ॥

व्या०—गत्वरैः = गम + क्वरप् । स्थास्नु = स्था + ग्स्नु । चिचीषतः = चि + सन् + शतृ । आनुषङ्गिकम् = अनुषङ्ग + ठक् ॥ १९ ॥

वाच्य —...अचिरांशुविलासचञ्चलया... लक्ष्म्या फलेन आनुषङ्गिकेण भूयते ॥ १९ ॥

सरलार्थः—मानिनो मानरक्षार्थं नश्वरेषु देहेषु ममतां परित्यज्य युद्धं कुर्वन्ति । मानरक्षाजन्यं यश एव ते मुख्यं फलं

मन्यन्ते, न तु युद्धजयजन्यां विनश्वरीं सम्पदम् । युद्धजये तु या सम्पत् लभ्यते, तत् गौणमेव फलम् ॥ १९ ॥

मानिनां प्राणेभ्योऽपि तेजो गरीय इत्यत्राह—

ज्वलितं न हिरण्यरेतसं
चयमास्कन्दति भस्मनां जनः
अभिभूतिभयादसूनतः
सुखमुज्झन्ति न धाम मानिनः ॥ २० ॥

अन्वयः—जनः भस्मनां चयम् आस्कन्दति, ज्वलितं हिरण्यरेतसं न । अतः मानिनः अभिभूतिभयात् असून् सुखम् उज्झन्ति, धाम न ॥ २० ॥

ज्वलितमिति ॥ जनो भस्मनां चयं पुञ्जमास्कन्दति पादादिनाक्रमति । अदाहकत्वादिति भावः । ज्वलितं ज्वलन्तम् । कर्तरि क्तः । 'गतिबुद्धि—' इत्यादिसूत्रे चकाराद्वर्तमानार्थत्वम् । हिरण्यं रेतो यस्य तं हिरण्यरेतसमग्निं नास्कन्दति । दाहकत्वादिति भावः । अतो हेतोर्मानिनोऽभिभूतिभयात्प्राणलोभेन तेजस्त्यागे परिभवो भविष्यतीति भयादसूनेव सुखमक्लिष्टमुज्झन्ति । मानहानिकराज्जीवनात्स्वतेजसा मरणमेव वरमित्यर्थः । पूर्वतरश्लोकवदर्थान्तरन्यासः ।

सुबो०—जनः ( लोकः ) भस्मनां चयं ( राशिम् ) आस्कन्दति ( पादेन आक्रामति ), ज्वलितं ( ज्वलन्तं ) हिरण्यरेतसम् ( अग्निं ) न ( न आस्कन्दति ) । अतः ( अस्माद्धेतोः ) मानिनः ( मानवन्तो जनाः ) अभिभूतिभयात् ( तेजस्त्यागे परिभवशङ्कया ) असून् ( प्राणान् ) सुखम् (अनायासेन) उज्झन्ति ( त्यजन्ति ), धाम ( तेजः ) न (न उज्झन्ति) ॥२०॥

समासः—हिरण्यरेतसम् = हिरण्यं रेतो यस्य तम्; " अग्नेरपत्यं प्रथमं सुवर्णम् " इति स्मृतिः अभिभूतिभयात् = अभिभूतेर्भयं तस्मात् ( ५मी तत् पु० ) ।

व्या०—ज्वलितम् = ज्वल + वर्त्तमाने कर्त्तरि क्तः । आस्कन्दति = आङ्-स्कन्द + लट् + ति । उज्झन्ति = उद्झ + लट् + झि (अन्ति)॥ २० ॥

वाच्य०—ज्वलितः...हिरण्यरेतांः चयः आस्कद्यते...जनेन ।... असवः...उभ्यन्ते....मानिभिः ॥ २० ॥

सरलार्थः—लोको भस्मराशिं पादेनाक्रामति, न तु ज्वलन्तमनलं दाहभयात् । इत्यालोच्य मानिनः परपरिभवभयात् प्राणान् अनायासेन त्यजन्ति, न तु तेजः ॥ २० ॥

तेजस्विनां स्वभावं दर्शयति—

किमपेक्ष्य फलं पयोधरान्
ध्वनतः प्रार्थयते मृगाधिपः ।
प्रकृतिः खलु सा महीयसः
सहते नान्यसमुन्नतिं यया ॥ २१ ॥

अन्वयः—मृगाधिपः किं फलम् अपेक्ष्य ध्वनतः पयोधरान् प्रार्थयते । महीयसः सा प्रकृतिः खलु, यया अन्यसमुन्नतिं न सहते ॥ २१ ॥

किमिति ॥ मृगाधिपः सिंहः किं फलं प्रयोजनमपेक्ष्य ध्वनतो गर्जतः । धरन्तीति धराः पचाद्यच् । पयसां धरास्तान्पयोधरान्मेघान्प्रार्थयतेऽभियाति । 'याच्ञायामभियाने च प्रार्थना कथ्यते बुधैः' इति केशवः । यद्वावरुणद्धीत्यर्थः । प्रा अर्थयते । प्रास्याद्याचञावरोधयोः' इत्यभिधानात्प्रा अवरोधेन । प्रा इति तृतीयान्तम् । आकारान्तस्य प्राशब्दस्य योगविभागात् 'आतो धातो' इत्यालोपः । तथाहि । महीयसो महत्तरस्य सा प्रकृतिः खलु यया प्रकृत्यान्यसमुन्नतिं परवृद्धिं न सहते । महतेः परभञ्जनमेव पुरुषार्थ इत्यर्थः । पूर्ववदलङ्कारः ।

सुबो०—मृगाधिपः ( सिंहः ) किं फलं ( प्रयोजनम् ) अपेक्ष्य ( उद्दिश्य ) ध्वनतः ( गर्जतः ) पयोधरान् ( मेघान् ) प्रार्थयते ( अभियाति न कस्यापि फलस्यापेक्षा तथापि प्रार्थयते

इत्यर्थः ) । महीयसः ( महत्तरस्य, तेजस्विनः ) सा प्रकृतिः ( स एव स्वभावः ) खलु ( प्रसिद्धा ), यया ( प्रकृत्या ) अन्यसमुन्नतिम् ( अपरस्य अभ्युदयं ) न सहते ( स न मर्षयति ) ॥२१॥

समासः—धरन्तीति धराः । पचाद्यच् । पयसां धराः = पयोधराः । "स्त्रीस्तनाब्दौ पयोधरौ" इत्यमरः । अन्यसमुन्नतिम् = अन्यस्य समुन्नतिः ताम् ।

व्या०—ध्वनतः = ध्वन + शतृ । महीयसः = महत् + ईयसु ॥२१॥

वाच्य०—.. पयोधराः ध्वनन्तः प्रार्थ्यन्ते मृगाधिपैः । प्रकृत्या भूयते ...तया, सह्यते (तेन)...अन्यसमुन्नतिः ..॥ २१ ॥

सरलार्थः—सिंहो मेघस्य गर्जितमाकर्ण्य तदाक्रमणासमर्थोऽपि तं प्रति सकोपं कटाक्षं करोति । तथाहि तेजस्विनः स्वभाव एव ईदृक् येनासौ प्रतिद्वन्द्विने ईर्ष्यति ॥ २१ ॥

उक्तार्थमुपसंहरति—

कुरु तन्मतिमेव विक्रमे
नृप निर्धूय तमः प्रमादजम् ।
ध्रुवमेतदवेहि विद्विषां
त्वदनुत्साहहता विपत्तयः ॥ २२ ॥

अन्वयः—नृप तत् प्रमादजं तमः निर्धूय विक्रमे एव मतिं कुरु । विद्विषां विपत्तयः त्वदनुत्साहहताः एतत् ध्रुवम् अवेहि२२॥

कुरु तदिति । हे नृप, तत्तस्मादुक्तरीत्या पराक्रमोत्साहयोर्हेतुत्वाद्धेतोः 'यत्तद्यतस्ततो हेतौ' इत्यमरः । प्रमादजं तमो मोहं निर्धूय निरस्य विक्रमे पौरुष एव मतिं कुरु । विक्रममेवाङ्गीकुरु, न तूपायान्तरमित्यर्थः । न च विक्रमवैफल्यशङ्का कार्येत्याह—ध्रुवमिति । विद्विषां विपत्तयस्त्वदनुत्साहहतास्तवानुत्साहेनाव्यवसायेन हताः प्रतिबद्धाः । अन्यथा प्रागेव विपद्येरन्निति भावः । इत्येतद् ध्रुवं निश्चितमवेहि विद्धि । 'ध्रुवं नित्ये निश्चिते च' इति शाश्वतः ।

सुबो०—नृप ( हे राजन् ) तत् ( तस्माद्धेतोः ) प्रमादजं ( प्रमादात् अनवधानतया जातं ) तमः ( मोहं ) निर्धूय (इदानीं परित्यज्य ) विक्रमे ( तेजःप्रकाशे ) एव मतिं ( बुद्धिं ) कुरु । विद्विषां ( शत्रूणां ) विपत्तयः ( विपदः ) त्वदनुत्साहहताः ( तवैव अनुत्साहेन अनुद्यमेन हताः प्रतिबद्धाः ) एतत् ( इति ) ध्रुवं ( निश्चितम् ) अवेहि ( जानीहि ) ॥ २२ ॥

व्या०—निर्धूय = निर्-धु + ल्यप् । अवेहि = अव + इ + लोट् ।

वाच्य०—क्रियतां ( त्वया )....मतिम् ..।...अवेयतां ( त्वया ) । ...त्वदनुत्साहहताभिः भूयते विपत्तिभिः ॥ २२ ॥

सरलार्थः—हे महाराज अधुना अवसादं परित्यज्य शत्रुजये उत्साहं कुरु । एतावता कालेनापि शत्रूणां परिभवो यन्न भवति, तत् तव अनुत्साहस्यैव फलमित्यवगच्छ ॥ २२ ॥

अस्माकं पराजयाशङ्का न कार्य्येत्याह—

द्विरदानिव दिग्विभावितां-
श्चतुरस्तोयनिधीनिवायतः ।
प्रसहेत रणे तवानुजान्
द्विषतां कः शतमन्युतेजसः ॥ २३ ॥

अन्वयः—दिग्विभावितान् चतुरः द्विरदान् इव, तोयनिधीन् इव रणे आयतः शतमन्युतेजसः तव अनुजान् द्विषतां कः प्रसहेत ॥ २३ ॥

द्विरदानिति । दिग्विभावितान्दिक्षु प्रसिद्धांस्तानायत आगच्छतः । आङ्पूर्वादिणधातोः शतृप्रत्ययः । चतुरो द्विरदान्दिग्गजानिव, तथोक्तविशेषणांश्चतुरस्तोयनिधीनिव, रण आयतो दिग्विभावि-ताञ्छतमन्युतेजस इन्द्रविक्रमांश्चतुरस्तवानुजान्द्विषतां मध्ये कः प्रसहेत । सोढुं शक्नुयादित्यर्थः । 'शकि लिङ् च' इति शक्यार्थे लिङ् । अतो निःशङ्कं प्रवर्तस्वेति भावः ॥

सुबो०—दिग्विभावितान् ( दिक्षु प्रसिद्धान् ) चतुरः (चतुः-संख्यकान् ) द्विरदान् ( गजान्, दिग्हस्तिनः ) इव ( तथा ) तोयनिधीन् ( चतुरः समुद्रान् ) इव रणे ( युद्धे ) आयतः ( आगच्छतः ) शतमन्युतेजसः ( इन्द्रतुल्यपराक्रमशालिनः ) तव अनुजान् ( चतुरः भ्रातॄन् अस्मान् ) द्विषतां (शत्रूणां मध्ये) कः प्रसहेत ( सोढुं शक्नुयात् न कोऽपीत्यर्थः ॥ २३ ॥

समासः—दिग्विभावितान् = दिक्षु विभावितास्तान् । द्विरदान् = द्वौ रदौ ( दन्तौ ) येषां तान् । दन्ती दन्तावलो हस्ती द्विरदोऽनेकपो द्विपः' इत्याद्यमरः । शतमन्युतेजसः = शतं मन्यवः ( यज्ञाः ) यस्य स शतमन्युः, शतमन्योरिव तेजो यस्य तस्य ॥ २३ ॥

व्या० — आयतः = आङ्-ई + शतृ । प्रसहेत = प्र-सह + विधिलिङ् । द्विषताम् = द्विष + शतृ, निर्धारणे षष्ठी ।

वाच्य०—द्विरदाः...दिग्विभाविताः चत्वारः तोयनिधयः...आयन्तः प्रसह्येरन्...अनुजाः...केन... ॥ २३ ॥

सुबो०—त्वं स्वयमिन्द्रतुल्यपराक्रमशाली, तव भ्रातरो वयमपि दिग्गजा इव बलशालिनः सागरा इव अधृष्याश्च । वयं पञ्च मिलित्वा यदा रणं करिष्यामः, तदा द्विषतां मध्ये ईदृशः कश्चिन्नास्ति योऽस्मान् पराजेष्यते ॥ २३ ॥

आशीर्वादव्याजेन फलितमाह—

ज्वलतस्तव जातवेदसः
सततं वैरिकृतस्य चेतसि ।
विदधातु शमं शिवेतरा
रिपुनारीनयनाम्बुसन्ततिः ॥ २४ ॥

अन्वयः—शिवेतरा रिपुनारीनयनाम्बुसन्ततिः तव चेतसि सततं ज्वलतः वैरिकृतस्य जातवेदसः शमं विदधातु ॥ २४ ॥

ज्वलत इति ॥ तव चेतसि सततं ज्वलतो वैरिकृतस्य जातवेदसः । क्रोधाग्नेरित्यर्थः । शिवेतराशिवामङ्गला । वैधव्यदुःखजनकत्वादिति भावः । रिपुनारीनयनाम्बुसन्ततिर्वैरिवनिताश्रुप्रवाहः शमं विदधातु । वैरिकृतस्य क्रोधस्य वैरिवधमन्तरेण शान्त्यसम्भवादवश्यं तद्वधस्त्वया कर्तव्य इत्यर्थः । क्रोधस्य विषयनिगरणेन विषयिणो जातवेदस एवोपनिबन्धादतिशयोक्तिरलङ्कारः। तदुक्तम्—'विषयस्यानुपादानाद्विषय्युपनिबध्यते । यत्र सातिशयोक्तिः स्यात्कवेः प्रौढोक्तिजीविता ॥' इति । तत्रापि क्रोधस्य जातवेदसो भेदेऽप्यभेदाध्यवसायाद्भेदेऽभेदरूपा । तत एवाम्बुनिर्वाप्यत्वोक्तिश्च घटते । तथा च यथाम्बुसेकेनाग्निः शाम्यति तथा शत्रुवधेन क्रोध इत्यौपम्यं गम्यते ।

सुबो०—शिवेतरा ( वैधव्यदुःखजनकत्वात् अमङ्गला ) रिपुनारीनयनाम्बुसन्ततिः ( शत्रुरमणीनाम् अश्रुधारा ) तव चेतसि ( मनसि ) सततं ( निरन्तरं ) ज्वलतः ( दीप्यमानस्य ) वैरिकृतस्य ( शत्रुभिरुत्पादितस्य ) जातवेदसः ( अवमाननाजनितस्य दुःखरूपस्य अनलस्य ) शमं ( शान्तिं ) विदधातु ( करोतु ) ॥ २४ ॥

समासः—जातवेदसः=जातान् (प्राणिनः) विन्दते ( लभते जठरानलत्वेन ) इति जातवेदास्तस्य । शिवेतरा=शिवायाः इतरा । रिपु०=रिपूणां नार्य्यः रिपुनार्य्यः, नयनानाम् अम्बूनि नयनाम्बूनि, रिपुनारीणां नयनाम्बूनि, तेषां सन्ततिः ।

व्या०—ज्वलतः=ज्वल+शतृ जातवेदसः+असुन् ।

वाच्य०—....विधीयतां शमः शिवेतरया रिपुनारीनयनाम्बुसन्तत्या२४।

सरलार्थः—शत्रवः सभामध्ये तव यादृशीम् अवमाननां कृतवन्तः, तेषां विनाशनेनैव तस्याः प्रतीकारो भवेत्, नान्यथा२४।

इति दर्शितविक्रियं सुतं
मरुतः कोपपरीतमानसम् ।
उपसान्त्वयितुं महीपति-
र्द्विरदं दुष्टमिवोपचक्रमे ॥ २५ ॥

अन्वयः—इति दर्शितविक्रियं कोपपरीतमानसं मरुतः सुतं महीपतिः दुष्टं द्विरदम् इव उपसान्त्वयितुम् उपचक्रमे ॥२५॥

इतीति ॥ इत्युक्तरीत्या दर्शिता विक्रिया विकारो वागारम्भात्मको येन तं कोपपरीतमानसं कोपाक्रान्तचित्तम्। इदं विशेषणद्वयं द्विरदेऽपि योज्यम्। मरुतः सुतं भीमं महीपतिर्युधिष्ठिरो दुष्टं द्विरदमिव। एतेन भीमस्य शौर्यमेव, न बुद्धिरस्तीति गम्यते। उपसान्त्वयितुमनुनेतुमुपचक्रमे प्रवृत्तः। 'प्रोपाभ्यां समर्थाभ्याम्' इत्यात्मनेपदम्। राज्ञा तावदुपकारविशेषापेक्षया कथञ्चिदवश्यो जनः शनैः शनैर्द्विरदवद्वशीकरणीयः, न तु त्याज्य इति भावः॥

सुबो०—इति ( उक्तरीत्या ) दर्शितविक्रियं ( दर्शिता प्रकाशिता विक्रिया शारीरोमानसश्च विकारो येन तं ) कोपपरीतमानसं ( क्रोधाक्रान्तचित्तं ) मरुतः सुतं ( वायुपुत्रं भीमं ) महीपतिः ( राजा युधिष्ठिरः ) दुष्टं ( मदकलुषितं ) द्विरदं (गजम्) इव उपसान्त्वयितुं ( कोपं त्याजयितुं, विनेतुम् ) उपचक्रमे ( आरब्धवान् ) ॥ २५ ॥

समासः—कोपपरीतमानसम् = कोपेन परीतं मानसं यस्य तम्।

व्या०—उपसान्त्वयितुम् = उप-सान्त्व + तुमुन्। उपचक्रमे = उप-क्रम + लिट् ॥ २५ ॥

वाच्य०—...महीपतिना...॥ २५ ॥

सरलार्थः—क्रुद्धं गजं यथा अङ्कुशेन प्रकृतिस्थं करोति, तथा राजा कुपितं भीमसेनम् सान्त्वनावाक्येन प्रकृतिस्थं कर्तुं प्रवृत्तः ॥ २५ ॥

प्रथमं तावत् श्लोकत्रयेण प्रशंसावादेन प्रसादयति—

अपवर्जितविप्लवे शुचौ
हृदयग्राहिणि मङ्गलास्पदे।
विमला तव विस्तरे गिरां
मतिरादर्श इवाभिदृश्यते ॥ २६ ॥

अन्वयः—अपवर्जितविप्लवे शुचौ हृदयग्राहिणि मङ्गलास्पदे तव गिरां विस्तरे मतिः आदर्शे इव विमला अभिदृश्यते ॥२६॥

अपवर्जितेति ॥ विप्लवः प्रमाणबाधः । अन्यत्र बाह्यमल-संक्रमः । सोऽपवर्जितो यस्य तस्मिन्नपवर्जितविप्लवे । शुचौ । सौशब्द्यं लोहशुद्धिश्च शुचित्वम् । तद्वतीत्यर्थः । अत एव हृदय-ग्राहिणि मनोरमे मङ्गलास्पदे । एकत्र हितार्थप्रतिपादकत्वादन्यत्र मङ्गलवस्तुत्वाच्च श्रेयस्करे । 'रोचनं चन्दनं हेम मृदङ्गं दर्पणं मणिम् । गुरूनग्निं तथा सूर्यं प्रात पश्येत्सदा बुधः' । इति पुराणवचनात् । तव गिरां विस्तरे वाक्प्रपञ्चे ।' प्रथने वावशब्दे' इति घञ्प्रतिषेधात् 'ऋदोरप्' इत्यप् । अतएव 'विस्तारो विग्रहो व्यासः स तु शब्दस्य विस्तरः' इत्यमरः । मतिस्त्वद्बुद्धिरादर्शे दर्पण इव । 'दर्पणे मुकुरादर्शौ' इत्यमरः । विमला विशदाभिदृश्यते । वाग्वशद्यादेव मतिवैशद्यमनुमीयते । तत्पूर्वकत्वात्तस्येत्यर्थः ।

सुबो०—अपवर्जितविप्लवे (प्रमाणबाधपरिशून्ये, सप्रमाणे) शुचौ (विशुद्धे) हृदयग्राहिणि ( मनोहरे ) मंगलास्पदे (श्रेयस्करे) तव गिरां विस्तरे ( वाक्प्रपञ्चे ) मतिः ( तव बुद्धिः ) आदर्शे ( दर्पणे ) इव विमला ( विशदा, परिष्कृता ) अभिदृश्यते ( मया लक्ष्यते ) ॥ २६ ॥

समासः—अपवर्जितविप्लवे = अपवर्जितो विप्लवो यस्य तस्मिन् । हृदयग्राहिणि = हृदयं गृह्णातीति तस्मिन् णिनिः ।

व्या०—विस्तरे = वि--स्तृ + अप् । अभिदृश्यते = अभि--दृश + कर्म्मणि लट् ॥ २६ ॥

वाच्य०—...विमलां....मतिम्....अभिपश्यामि ॥ २६ ॥

सरलार्थः—यथा परिमार्जिते दर्पणे विशदा प्रतिकृतिर्दृश्यते, तथा त्वदीये विशुद्धे वचसि विमला बुद्धिः प्रकाशते ॥ २६ ॥

स्फुटता न पदैरपाकृता
न च न स्वीकृतमर्थगौरवम् ।

रचिता पृथगर्थता गिरां
न च सामर्थ्यमपोहितं क्वचित् ॥ २७ ॥

अन्वयः—पदैः स्फुटता न अपाकृता, अर्थगौरवं च न स्वीकृतं न। गिरां पृथगर्थता रचिता, क्वचित् सामर्थ्यं च न अपोहितम् ॥ २७ ॥

स्फुटतेति। उपपत्तिरिति च। पदैः सुप्तिङन्तशब्दैः स्फुटता विशदार्थता नापाकृता न त्यक्ता। अर्थगौरवमर्थभूयस्त्वं वा न च न स्वीकृतम्। स्वीकृतमेवेत्यर्थः। वैशद्यप्रसक्तार्थगौरवाभावनिवर्तनार्थं नञ्द्वयम्। 'सम्भाव्यनिषेधनिवर्तने द्वौ प्रतिषेधौ' इति वामनः। गिरां पदानामवान्तरवाक्यानां च पृथगर्थता भिन्नार्थता। अपुनरुक्तार्थतेति यावत्। रचिता कृता। तथा क्वचिदपि सामर्थ्यं गिरामन्योन्यसाकाङ्क्षत्वं नापोहितं न वर्जितम्। अन्यथा दशदाडिमादिशब्दवदेकवाक्यता न स्यात्। यथाहुः—'अर्थैकत्वादेकं वाक्यं सापेक्षा चेद्विभागे स्यात्' इति नन्वर्थगौरवमित्यत्र कथं षष्ठीसमासः। 'पूरणगुण-' इत्यादिना प्रतिषेधात्। नैष दोषः। ये शुक्लादयः शब्दा गुणे गुणिनि च वर्तन्ते यथा पटस्य शौक्ल्यं शुक्लः पट इति च। तेषामेवात्र निषेधाद्ये च सदा गुणमात्रवचनाः। गौरवं प्राधान्यं रसोगन्धः स्पर्श इत्येवमादयः। तेषामनिषेधात्। तथा 'तत्स्थैश्च गुणैः षष्ठी समस्यते' इति वचनाद्बहुलमभियुक्तप्रयोगदर्शनाच्च। बलाकायाः शौक्ल्यमित्यादौ तु भाष्यकारवचनादसमासः। अत एवाह वामनः—"अत्र पीतिमादिषु गुणवचनसमासोवली स्यात्"—इति ॥

सुबो०—पदैः (सुप्तिङन्तशब्दैः) स्फुटता (स्पष्टता, सरलता) न अपाकृता (न त्यक्ता) अर्थगौरवम् (अर्थभूयस्त्वं) च न स्वीकृतं न (स्वीकृतमेवेत्यर्थः)। गिरां (वाक्यस्थानां पदानां) पृथगर्थता (भिन्नार्थता, अपुनरुक्तार्थता) रचिता (त्वया कृता), क्वचित् (कुत्रापि) सामर्थ्यं (परस्परान्वयित्वं) च न अपोहितं (न त्यक्तम्) ॥ २७ ॥

समासः—अर्थगौरवं = अर्थस्य गौरवम् । पृथगर्थता = पृथक् अर्थाः यासां ताः पृथगर्थाः, तासां भावः तत्ताम् ।

व्या०—अपाकृता = अप-आङ्-कृ + कर्म्मणि क्तः । अपोहितम् = अप-ऊह + कर्मणि क्तः ॥ २७ ॥

वाच्य०—स्फुटतां...पदानि अपाकृतवन्ति...स्वीकृतवन्ति....। रचितवान् ( त्वं ) पृथगर्थतां....अपोहितवान् . ॥ २७ ॥

सरलार्थः—सरलशब्दविन्यासस्त्वया कृतः, तत्रापि अर्थगौरवमस्ति । आपाततः पुनरुक्तवद्भासमानानां पदानां भिन्नार्थतया वस्तुतः पुनरुक्तिदोषो न विद्यते । निराकाङ्क्षं किमपि पदं वाक्यं च न प्रयुक्तम् ॥ २७ ॥

उपपत्तिरुदाहृता बला-
दनुमानेन न चागमः क्षतः ।
इदमीदृगनीदृगाशयः
प्रसभं वक्तुमुपक्रमेत कः ॥ २८ ॥

अन्वयः—बलात् उपपत्तिः उदाहृता, अनुमानेन आगमः च न क्षतः । अनीदृगाशयः कः ईदृक् इदं प्रसभं वक्तुम् उपक्रमेत २८॥

उपपत्तिरिति । किञ्च बलाद् बलमाश्रित्य । कर्मणि ल्यब्लोपे पञ्चमी वक्तव्या । उपपत्तिर्युक्तिरुदाहृता । पराक्रमपक्ष एव श्रेयानिति युक्तिरुक्तेत्यर्थः । उचितं चैतन्महावीरस्येति भावः । तथानुमानेन युक्त्यागमः शास्त्रं च न क्षतो न हतः । किन्त्वागमाविरुद्धमेवोक्तम् । अन्यथा तद्विरोधादनुमानस्यैव प्रामाण्यभङ्गप्रसङ्गादिति भावः । ईदृगित्थं क्षात्रयुक्तमिदं वचनमविद्यमान ईदृगाशय इत्थं क्षात्रयुक्ताभिप्रायो यस्य सोऽनीदृगाशयः । 'अभिप्रायश्छन्द आशयः' इत्यमरः । कः प्रसभं हठाद्वक्तुमुपक्रमेत । न कोऽपीत्यर्थः इत्थं वक्तुमुपक्रमितैव नास्ति । वक्ता तु दूरापास्त एवेति भावः । केचिदेतच्छ्लोकत्रयं निन्दापरत्वेनापि योजयन्ति । तदसत् । हितोपदेशमात्रतत्परस्यातिवत्सलस्य राज्ञो मत्सरिण इव महावीरे भ्रातरि विधेये सर्वानर्थमूलभूतनिन्दातात्पर्यकल्पनानौचित्यादिति ।

सुबो०—बलात् ( क्षात्रं तेजः आश्रित्य ) उपपत्तिः (युक्तिः) उदाहृता ( त्वया उक्ता, तथापि ) अनुमानेन ( युक्त्या ) आगमः ( शास्त्रं ) च न क्षतः (न हतः, नाप्रमाणीकृतः) । अनीदृगाशयः ( त्वादृशाभिप्रायरहितः ) कः ( को जनः ) ईदृक् ( इत्थं क्षात्र-शास्त्रोभयानुरूपम् ) इदं ( पूर्वोक्तं वचनं ) प्रसभं ( हठात् ) वक्तुं ( कथयितुम् ) उपक्रमेत ( आरभेत—न कोऽपीत्यर्थः ) ॥ २८ ॥

समासः—अनुमानेन = अनुमीयत इत्यनुमानम् । अनीदृगाशयः = ईदृक् आशयो यस्य स ईदृगाशयः, न ईदृगाशयः अनीदृगाशयः ।

व्या०—उदाहृता = उद्-आङ्-हृ + क्त । बलात् = ल्यब्लोपे ५मी । क्षतः = क्षण + क्त । इदृक् = इदम्-दृश + क्विप् । उपक्रमेत = उप-क्रम + विधिलिङ् ॥ २८ ॥

वाच्य०—उपपत्तिम् उदाहृतवान् ( त्वम् )...आगमं क्षतवान् ।... अनीदृगाशयेन....केन ॥ २८ ॥

सरलार्थः—त्वया क्षात्रधर्म्मानुरूपा युक्तिः प्रदर्शिता, तथापि सा युक्तिः शास्त्रानुसारिण्येव । त्वां विना अन्यः कश्चित् एवं वचनं वक्तुम् प्रवर्त्तकोऽपि नास्ति, वक्ता तु सुदूर-पराहत एव ॥ २८ ॥

यदि साधूक्तं तर्हि तथैव क्रियतामित्याशङ्क्याह—

अवितृप्तितया तथापि मे
हृदये निर्णयमेव धावति ।
अवसाययितुं क्षमाः सुखं
न विधेयेषु विशेषसम्पदः ॥ २९ ॥

अन्वयः—तथापि मे हृदयम् अवितृप्ततया निर्णयम् एव धावति । विधेयेषु विशेषसम्पदः सुखम् अवसाययितुं न क्षमाः २९ ।

अवितृप्ततयेति । तथापि त्वया सम्यङ्निर्णीतेऽपि मे हृदयम-वितृप्ततयासन्तुष्टतया । अद्यापि संशयगतत्वेनेत्यर्थः । निर्णयमेव

धावत्यनुसरति । अपेक्षत इति धावत् । अद्यापि निर्णयस्यानुदयादिति भावः निर्णयानुदये हेतुमाह—अवेति । विधेयेषु सन्धिविग्रहादिकर्तव्यार्थेषु या विशेषसम्पदोऽवान्तरभेदभूमानस्ताः सुखमक्लेशेनावसाययितुम् पुरुषान्प्रत्यानुकूल्येन स्वस्वरूपं स्वयमेव शीघ्रं प्रत्याययितुमित्यर्थः । स्यतेरर्यन्तादणि कर्मकर्तृकात्तुमुन् । णेरनादिसूत्रस्थायं विषयः । क्षमन्त इति क्षमाः । पचाद्यच् । शक्ता न भवन्ति । 'क्षमं शक्ते हिते त्रिषु' इत्यमरः । विधेयमात्रस्य सुगमत्वेऽपि तद्विशेषाणां सौक्ष्म्याद्बाहुल्याच्च दुर्ज्ञेयत्वादद्यापि निर्णयाकाङ्क्षेति तात्पर्यार्थः । अत्र निर्णयधावनं प्रत्युत्तरवाक्यार्थस्य हेतुत्वाभिधानाद्वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः । तदुक्तम्-'हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गमुदाहृतम्' इति ॥

सुबो०—तथापि ( त्वया सम्यगुक्तेऽपि ) मे ( मम ) हृदयं ( मनः ) अवितृप्ततया ( असन्तुष्टतया हेतुना ) निर्णयं सिद्धान्तम् ) एव धावति ( अनुसरति, अपेक्षते ) ( यतः ) विधेयेषु ( कर्त्तव्येषु सन्धिविग्रहादिषु ) विशेषसम्पदः ( भेदोत्कर्षाः, उत्कृष्टाः अवान्तरभेदाः ) सुखम् ( अक्लेशेन ) अवसाययितुं ( स्वस्वरूपं पुरुषान् प्रत्याययितुं ) न क्षमाः ( न समर्था भवन्ति ) ॥ २९ ॥

समासः—अवितृप्ततया = न विशेषेण तृप्तः अवितृप्तस्तस्य भावस्तत्तया । विशेषसम्पदः = विशेषाणां सम्पदः ॥ २९ ॥

व्या०—अवसाययितुम् = अव-सो + णिच् + तुमुन् ।

वाच्य०—....हृदयेन निर्णयः...धाव्यते ।...क्षमाभिः भूयते विशेषसम्पद्भिः ॥ २९ ॥

सरलार्थः—यद्यपि तव उक्तिः समीचीनैव, तथापि मे मनस्तत्र सन्तोषमलब्ध्वा कर्त्तव्यनिर्णयमपेक्षते । यतस्त्वं सामान्याकारेणैव सन्धिविग्रहादिकर्त्तव्यार्थान् निर्दिष्टवानसि, तत्र ये विशेषास्तेऽप्यवश्यं पर्य्यालोचनीयाः ॥ २९ ॥

विशेषावधारणं विना कर्म्मणि न प्रवर्त्तितव्यमित्याह--

सहसा विदधीत न क्रिया-
मविवेकः परमापदां पदम्।
वृणते हि विमृष्यकारिणं
गुणलुब्धाः स्वयमेव सम्पदः॥ ३०॥

अन्वयः--क्रियां सहसा न विदधीत। अविवेकः परमापदां पदम्। गुणलुब्धाः सम्पदः विमृष्यकारिणं स्वयम् एव वृणते हि॥ ३०॥

सहसेति। क्रियते इति क्रिया कार्यं तां सहसा अविमृष्येत्यर्थः। 'सहसेत्याकस्मिकाविमर्षयोः' इति गणव्याख्याने स्वरादिपाठादव्ययम्। न विदधीत न कुर्वीत। कुतः। अविवेकोऽविमृष्यकारित्वं परमत्यन्तमापदां पदं स्थानम्। कारणमित्यर्थः। व्यतिरेकेणोक्तमर्थमन्वयेनाह—वृणत इति। गुणलुब्धा गुणगृध्नव इति स्वयंवरहेतूक्तिः। सम्पदः श्रियः। विमृष्यकरोतीति विमृष्यकारी। 'उपपदमतिङ्' इति समासः ते स्वयमेव वृणते भजन्ते हि। 'वृङ् सम्भक्तौ' इति धातुः। तस्माद्विमृष्यैव प्रवर्तितव्यमित्यर्थः। अत्र सहसा विधाननिषेधलब्धविमृष्यकारित्वरूपकारणस्यापद्रूपव्यतिरेककार्येण समर्थनाद्वैधर्म्येणार्थान्तरन्यासः। द्वितीयार्धेन च स एव साधर्म्येणेति ज्ञेयम्।

सुबो०--क्रियां (किमपि कार्य्यं) सहसा (हठात्,) अविचार्य्येत्यर्थः, न विदधीत (न कुर्वीत)। अविवेकः (अविमृष्यकारी जनः) परमापदां (महाविपदां) पदम् (आस्पदं, पात्रं-भवति)। गुणलुब्धाः (गुणपक्षपातिन्यः) सम्पदः (श्रियः) विमृष्यकारिणं (विचारपूर्वककर्म्मकर्त्तारं) स्वयमेव वृणते (भजन्ते) हि (निश्चितम्)॥ ३०॥

सनासः—गुणलुब्धाः-गुणैः लुब्धाः। अविवेकः=नास्ति विवेको यस्य सः। विमृष्यकारिणं=विमृष्यकरोतीति तं।

व्या०—विदधीत = वि-धा + विधिलिङ् । वृणते = वृ + लट् झ ( अते ) ॥ ३० ॥

वाच्य०—.. विधीयेत ( जनेन )...क्रिया । अविवेकेन...पदेन भूयते । व्रियते विमृष्यकारी गुणलुब्धाभिः....सम्पद्भिः ॥ ३० ॥

सरलार्थः—अविमृष्य किमपि कार्य्यं न कर्त्तव्यम् । अविमृष्यकारी वपद आप्नोति । विमृष्यकारी तु अक्लेशेन सम्पदो लभते ॥ ३० ॥

विमृष्यकारितायाः फलान्तरं दर्शयति—

अभिवर्षति योऽनुपालय-
न्विधिबीजानि विवेकवारिणा ।
स सदा फलशालिनीं क्रियां
शरदं लोक इवाधितिष्ठति ॥ ३१ ॥

अन्वयः—यः विधिबीजानि अनुपालयन् विवेकवारिणा अभिवर्षति, सः फलशालिनीं क्रियां लोकः शरदम् इव सदा अधितिष्ठति ॥ ३१ ॥

अभीति । यः पुमान् । विधीयन्ते इति विधयः कृत्यवस्तूनि बीजानीवेत्युपमितसमासः । शरदं लोक इवेति वाक्यगतोपमानुसारात् । तानि विधिबीजानि । विवेकः वारीव तेन विवेकवारिणा । पूर्ववत्समासः । अनुपालयन्प्रतीक्षमाणः संरक्षन्नभिवर्षति सिञ्चति । स पुमान् । फलं साधननिष्पाद्योऽर्थः, सस्यं च 'सस्ये हेतुकृते फलम्' इत्युभयत्राप्यमरः । तच्छालिनीं क्रियां कर्म लोको जनः । 'लोकस्तु भुवने जने' इत्यमरः । शरदमिव सदा नित्यमधितिष्ठति । सदा क्रियाफलं प्राप्नोत्येव । न कदाचिद्व्यभिचरतीत्यर्थः । साहसिकस्य काकतालीयन्यायेन फलसिद्धिर्विवेकिनस्तु नियतेतिभावः । अत्र फलशब्देन सस्यहेतुकृतयोरर्थयोरभेदाध्यवसायाच्छ्लेषमूलातिशयोक्तिस्तदनुगृहीता चोपमेत्यनुसन्धेयम् ।

सुबो०—यः विधिबीजानि ( कर्त्तव्यरूपबीजानि ) अनुपालयन् ( संरक्षन् ) विवेकवारिणा ( विवेकरूपेण जलेन ) अभिवर्षति ( सिञ्चति ), सः फलशालिनीं क्रियां ( फलोपधायकं कर्म्म ) लोकः शरदं ( शरत्कालम् ) इव सदा ( नित्यम् ) अधितिष्ठति ( प्राप्नोति ) ॥ ३१ ॥

समासः—विधिबीजानि = विधय एव बीजानि तानि। अनुपालयन् = अनुपालयतीति। विवेकवारिणा = विवेक एव वारि तेन। फलशालिनीम् = फलेन शालते या ताम्।

व्या०—अभिवर्षति = अभि-वृष + लट्। अधितिष्ठति = अधिस्था + लट् ॥ ३१ ॥

वाच्य०—अभिवृष्यन्ते येनैं अनुपालयता....। तेन....फलशालिनी क्रिया शरत् लोकेन....अधिष्ठीयते ॥ ३१ ॥

सरलार्थः—यथा कृषकः धान्यादिबीजानि क्षेत्रे उप्त्वा क्षेत्रियतृणादिनिरसनेन संरक्षन् अन्तराऽन्तरा वारिणा च सिञ्चन् शरत्काले प्रचुराणि शस्यानि लभते, तथैव यः सन्धिविग्रहादीनि कर्माणि कर्त्तव्यतया निश्चित्य सुगुप्तं रक्षन् विवेकपूर्वकं यथाकालम् अनुतिष्ठति स निश्चितमेव फलं प्राप्नोति ॥ ३१ ॥

विवेकिनः फलसिद्धिर्निश्चितं भवतीत्युक्तं, संप्रति तामेव स्तौति—

शुचि भूषयति श्रुतं वपुः
प्रशमस्तस्य भवत्यलङ्क्रिया।
प्रशमाभरणं पराक्रमः
स नयापादितसिद्धिभूषणः ॥ ३२ ॥

अन्वयः—शुचि श्रुतं वपुः भूषयति, प्रशमः तस्य अलङ्क्रिया भवति, पराक्रमः प्रशमाभरणं ( भवति ), सः नयापादितसिद्धिभूषणः ( भवति ) ॥ ३२ ॥

शुचीति॥ शुचि सम्प्रदायशुद्धं श्रुतं शास्त्रश्रवणं कर्तृवपुर्भूषयति। अन्यथाविद्वान्पुरुषः शोच्य इति भावः। तस्य श्रुतस्य प्रशमः क्रोधोपशान्तिरलंक्रिया भूषणं भवति। अन्यथा श्रुतवैफल्यादिति भावः। पराक्रमः सत्यवसरे शौर्यं प्रशमस्याभरणं भवति। अन्यथा सर्वैः परिभूयत इति भावः। स पराक्रमः। नयापादिता नीतिसम्पादिता। विवेकपूर्विकेति यावत्। सा चासौ सिद्धिश्च सैव भूषणं यस्य स तथोक्तः। अन्यथा साहसिकस्य सिद्धेः काकतालीयत्वेन पक्षे पराक्रमवैयर्थ्यं स्यादिति भावः। 'वपुषो भूष्यतैवात्र सिद्धेर्भूषणतैव तु उभयं मध्यमानां तु तेषां पूर्वोत्तरेच्छया॥' इति विवेकः। एवं विशिष्टसिद्धेरनन्यभूषिताया एव भूषणत्वोक्त्या सर्वाभरणतया स्तुतिर्गम्यते। अत्रोत्तरोत्तरस्य पूर्वपूर्वविशेषणत्वादेकावल्यलङ्कारः। तदुक्तम्-'यत्र विशेषणभावं पूर्वं पूर्वं प्रति क्रमेणैव। भजति परं परमेवालंकृतिरेकावली कथिता इति॥'

सुबो०—शुचि (शुद्धं, गुरुमुखात् यथाविधि अधिगतं) श्रुतं (शास्त्रज्ञानं) वपुः (शरीरं) भूषयति (अलङ्करोति)। प्रशमः (क्रोधोपशान्तिः) तस्य (श्रुतस्य) अलंक्रिया (भूषणं) भवति। पराक्रमः (यथावसरं शौर्य्यं) प्रशमाभरणं (प्रशमस्य शान्तेः आभरणम् अलंकारो भवति)। सः (पराक्रमः) नयापादितसिद्धिभूषणः (नयेन नीत्या आपादिता सम्पादिता या सिद्धिः सैव भूषणं यस्य स तथाभूतो भवति)॥ ३२॥

व्या०—आपादित=आङ्-पद+णिच्+क्त॥ ३२॥

वाच्य०—शुचिना भूष्यते श्रुतेन....। प्रशमेन....भूयते अलंक्रियया प्रशमाभरणेन भूयते पराक्रमेण। तेन नयापादितसिद्धिभूषणेन भूयते।३२॥

सरलार्थः—शरीरस्य भूषणं विद्या, विद्याया भूषणं क्रोधहीनता, क्रोधहीनताया भूषणं सति अवसरे शौर्य्यप्रकाशः, शौर्य्यस्य भूषणं विवेकपूर्विकया नीत्या सिद्धिलाभः॥ ३२॥

शास्त्रमेव विवेकोपाय इत्याह—

मतिभेदतमस्तिरोहिते
गहने कृत्यविधौ विवेकिनाम् ।
सुकृतः परिशुद्ध आगमः
कुरुते दीप इवार्थदर्शनम् ॥ ३३ ॥

अन्वयः—मतिभेदतमस्तिरोहिते गहने कृत्यविधौ विवेकिनां सुकृतः परिशुद्धः आगमः दीपः इव अर्थदर्शनं कुरुते ॥ ३३ ॥

मतीति ॥ मतिभेदः कार्यविप्रतिपत्तिः । मतिभेदस्तम इवेत्युपमितसमासः । दीप इवेत्युपमानुसारात् । तेन तिरोहित आच्छन्नेऽतएव गहने दुरवगाहे कृत्यविधौ कार्यानुष्ठाने विवेकिनां सुकृतः सदभ्यस्तोऽतएव परिशुद्धो निश्चितोऽन्यत्र सुविहितः प्रवातादिदोषरहितश्च आगमः शास्त्रम् । 'आगमः शास्त्र आयाते' इति विश्वः । दीप इवार्थदर्शनं कार्यज्ञानं वस्तुप्रतिभासनं च कुरुते ॥

सुबो०—मतिभेदतमस्तिरोहिते ( मतिभेदः मन्त्रणागतमतभेदः, स तमः अन्धकार इव, तेन तिरोहिते आच्छन्ने ) अतएव गहने ( दुर्बोधे ) कृत्यविधौ ( कार्य्यानुष्ठाने ) विवेकिनां ( बुद्धिमतां ) सुकृतः ( सम्यगभ्यस्तः, दीपपक्षे सुष्ठु निर्मितः ) अत एव परिशुद्धः ( निश्चितः, पक्षे प्रवातादिदोषरहितः ) आगमः ( शास्त्रं ) दीप इव अर्थदर्शनं ( कार्य्यज्ञानं, पक्षे वस्तुप्रतिभासनं ) कुरुते ( जनयति ) ॥ ३३ ॥

समासः—अर्थदर्शनम् = अर्थस्य दर्शनम् । "अर्थोऽभिधेयरैवस्तु प्रयोजननिवृत्तिषु" इत्यमरः ।

वाच्य०—....सुकृतेन परिशुद्धेन आगमेन क्रियते दीपेन इव....॥३३॥

सरलार्थः—मन्त्रिणां मतभेदेन कर्त्तव्यानुष्ठाने महान् संशयो जायते । बुद्धिमतां तु सुशिक्षितं सुतरामसन्दिग्धं नीतिशास्त्रं कर्त्तव्यनिर्णये बाधां न जनयति ॥ ३३ ॥

एवं विमृष्यकारिणो दैवादर्थापातेऽपि न कश्चिदपराध इत्याह—

स्पृहणीयगुणैर्महात्मभि-
श्चरिते वर्त्मनि यच्छतां मनः ।
विधिहेतुरहेतुरागसां
विनिपातोऽपि समः समुन्नतेः ॥ ३४ ॥

अन्वयः—स्पृहणीयगुणैः महात्मभिः चरिते वर्त्मनि मनः यच्छतां विधिहेतुः अहेतुः विनिपातः अपि समुन्नतेः समः ॥३४॥

स्पृहणीयेति ॥ स्पृहणीयगुणैर्लोकश्लाघ्यगुणैर्महात्मभिः सज्जनैश्चरितेऽनुष्ठिते वर्त्मन्याचारे मनो यच्छतां निदधताम् । सन्मार्गेण व्यवहरतामित्यर्थः । विधिहेतुर्दैवनिमित्तकः । 'विधिर्विधाने दैवे च' इत्यमरः । अत एवागसामपराधानामहेतुर्विनिपातो दैविकानर्थोऽपि । 'विनिपातोऽवपाते स्याद्दैवादिव्यसनेऽपि च' इति विश्वः । समुन्नतेरतिवृद्धेः समस्तुल्यः । दैविकेषु पुरुषस्यानुपालभ्यत्वादिति भावः । यथाह कामन्दकः—'यत्तु सम्यगुपक्रान्तं कार्यमेति विपर्ययम् । पुरुषस्त्वनुपालभ्यो दैवान्तरितपौरुषः ॥' इति ॥

सुबो०—स्पृहणीयगुणैः ( लोकेप्सितगुणैः ) महात्मभिः ( सज्जनैः ) चरिते ( अनुष्ठिते ) वर्त्मनि ( कर्ममार्गे, आचारे ) मनः यच्छतां ( ददतां—सन्मार्गेण गच्छतामित्यर्थः ) विधिहेतुः ( दैवकारणकः ) अतएव आगसाम् ( अपराधानाम् ) अहेतुः (अकारणम्—आत्मदोषरहित इत्यर्थः) विनिपातः ( अधःपतनम् ) अपि समुन्नतेः ( अभ्युदयस्य ) समः ( तुल्योभवति ॥ ३४ ॥

समा०—स्पृहणीयगुणैः = स्पृहणीयाः गुणाः येषां तैः । विधिहेतुः = विधिः ( दैवं ) हेतुः ( कारणं ) यस्य सः ।

व्या०—यच्छताम् = दा ( दाने ) + शतृ ।

वाच्य०—...विनिपातेन... समेन ( भूयेत )...।

सरलार्थः—सद्भिराचरितं शास्त्रविहितं पुरुषकारं कुर्वतां पुरुषाणां दैववशात् यदि पराजयो भवति, तदा ते निन्दाभाजो न भवन्ति । तेषां पराजयोऽपि जयसमानतया गण्यते ॥ ३४ ॥

जिगीषूणां कर्त्तव्यमाह—

शिवमौपयिकं गरीयसीं
फलनिष्पत्तिमदूषितायतीम् ।
विगणय्य नयन्ति पौरुषं
विजितक्रोधरया जिगीषवः ॥ ३५ ॥

अन्वयः—जिगीषवः विजितक्रोधरयाः ( सन्तः ) गरीयसीम् अदूषितायतिं फलनिष्पत्तिं विगणय्य पौरुषं शिवम् औपयिकं नयन्ति ॥ ३५ ॥

शिवमिति ॥ जिगीषवो विजयेच्छवो नृपा विजितक्रोधरया जितक्रोधवेगाः सन्तो गरीयसीं प्रभूतामदूषितायतिमक्षतोत्तरकालाम् । स्वन्तामित्यर्थः । फलनिष्पत्तिं फलसिद्धिं विगणय्य । फलवत्त्वं निश्चित्येत्यर्थः । पौरुषं पुरुषकारं शिवमनुकूलमौपयिकमुपायम् । विनयादित्वात्स्वार्थे ठक् । उपायादूह्रस्वत्वं च । नयन्ति प्रापयन्ति । पौरुषमुपायेन योजयन्तीत्यर्थः । नानिश्चितफलं कर्म कुर्वीत इति भावः । यथाह कामन्दकः—'निष्फलं क्लेशबहुलं सन्दिग्धफलमेव च । न कर्म कुर्यान्मतिमान्सदा वैरानुबन्धि च ॥' इति । नयतिः प्रापणार्थे द्विकर्मकः । अत्र पौरुषस्य कर्तृस्थकर्मत्वेऽप्युपायस्यातथात्वात्क्रोधं विनयत इत्यादिवत् 'कर्तृस्थे चाशरीरे कर्मणि' इत्यात्मनेपदं न भवति ॥

सुबो०—जिगीषवः (जेतुमिच्छवो नृपाः) विजितक्रोधरयाः ( जितक्रोधवेगाः सन्तः ) गरीयसीं ( प्रभूताम् ) अदूषितायतिं ( शुभोत्तरकालां ) फलनिष्पत्तिं ( फलसिद्धिं ) विगणय्य ( निश्चित्य ) पौरुषं ( पुरुषकारं ) शिवम् ( अनुकूलम् ) औपयिकम् ( उपायं ) नयन्ति ( प्रापयन्ति ) ।

समासः—जिगीषवः=जेतुमिच्छवः । गरीयसीं=अतिशयेन गुर्वीं तां । फलनिष्पत्तिं फलस्य निष्पत्तिस्तां । विजितक्रोधरयाः=क्रोधस्य रयः

( वेगः ) क्रोधरयः, विजितः क्रोधरयो येः ते । अदूषितायतिम्—अदूषिता आयतिर्यस्याः ताम् । "उत्तरः काल आयतिः" इत्यमरः ।

व्या०—औपयिकम् = उपाय एवेति उपाय + स्वार्थे ठक् ह्रस्वश्च । नयन्तीत्यस्य गौणकर्म्म । फलनिष्पत्तिम् = विगणय्येत्यस्य कर्म्म । विगणय्य = वि-गण + स्वार्थे णिच् + ल्यप् । पौरुषम् = नयन्तीत्यस्य मुख्य कर्म्म । जिगीषवः = जि + सन् + उ ।

वाच्य—...नीयते पौरुषं विजितक्रोधरयैः जिगीषुभिः ।

सरलार्थः—जयमिच्छन्तो नृपाः महाफललाभे निश्चिते सति अनुकूलेनोपायेन पुरुषकारं कुर्वन्ति । निष्फले अनिश्चितफले वा कर्म्मणि ते न यतन्ते ।

विजितक्रोधरयत्वमावश्यकमित्याह—

अपनेयमुदेतुमिच्छता
तिमिरं रोषमयं धिया पुरः ।
अविभिद्य निशाकृतं तमः
प्रभया नांशुमताप्युदीयते ॥ ३६ ॥

अन्वयः—उदेतुम् इच्छता पुरः रोषमयं तिमिरं धिया अपनेयम् । अंशुमता अपि प्रभया निशाकृतं तमः अविभिद्य न उदीयते ॥ ३६ ॥

अपनेयमिति ॥ उदेतुमभ्युदेतुमिच्छता राज्ञा पुरः प्रथमं रोषमयं रोषादागतम् । 'मयट् च' इति मयट् । तिमिरमज्ञानं धिया विवेकबुद्ध्या करणेनापनेयमपनोद्यम् । तथाहि । अंशुमतापि कर्त्रा प्रभया तेजसा करणेन निशाकृतं तमो ध्वान्तमविभिद्य नोदीयते । किन्तु विभिद्यैवेत्यर्थः । सूर्यस्याप्येवं किमुतान्येषामित्यपिशब्दार्थः । इणो भावे लट् ॥

सुबो०—उदेतुम् ( अभ्युदयं प्राप्तुम् ) इच्छता (अभिलषता राज्ञा) पुरः ( प्रथमं ) रोषमयं ( रोषादागतं, रोषप्रभवं ) तिमिरम्

( अज्ञानम् ) धिया (विवेकबुद्ध्या) अपनेयम् ( निराकर्त्तव्यम् )। तथाहि अंशुमता ( किरणशालिना सूर्येण ) अपि निशाकृतं ( रात्रिजनितं ) तमः ( अन्धकारम् ) अविभिद्य ( अनिराकृत्य ) न उदीयते ( न उदयः प्राप्यते ) ॥ ३६ ॥

समासः—अपनेयं = अपनेतुं योग्यम्। निशाकृतम् = निशया कृतम्।

व्या०—अपनेयम्—अप—नी + कर्म्मणि यत्। उदेतुम्—उद्—ई + तुमुन्। रोषमयम्—रोष + तत आगतमित्यर्थे मयट्। उदीयते—उद्—इ + भावे लट् ॥ ३६ ॥

वाच्य—अपनीयेत...इच्छन् तिमिरं रोषमयं...।...अंशुमान्...उदेति॥

सरलार्थः—क्रोधो हि उन्नतेरन्तरायः। अत उन्नतिमिच्छता सर्वथा क्रोधजनितो मोहान्धकारस्त्याज्यः। तथाहि महाप्रतापशाली सूर्य्योऽपि रात्रेरन्धकारम् आदौ विनाश्य पश्चादेवोदेति ॥ ३६ ॥

ननु दुर्बलस्यैवमस्तु। बलीयसस्तु क्रोधादेव कार्य्यसिद्धिरित्यत आह—

बलवानपि कोपजन्मन-
स्तमसो नाभिभवं रुणद्धि यः।
क्षयपक्ष इवैन्दवीः कलाः
सकला हन्ति स शक्तिसम्पदः ॥ ३७ ॥

अन्वयः—बलवान् अपि यः कोपजन्मनः तमसः अभिभवं न रुणद्धि, सः क्षयपक्षे ऐन्दवीः कलाः इव सकलाः शक्तिसम्पदः हन्ति ॥ ३७ ॥

बलवानिति ॥ बलवाञ्छूरोऽपि यः। कोपाज्जन्म यस्य तस्य कोपजन्मनः 'अवर्ज्यो बहुव्रीहिर्व्यधिकरणो जन्माद्युत्तरपदः'। इति वामनः। तमसो मोहस्य। कृद्योगात्कर्तरि षष्ठी। अभिभवमाक्रान्तिं न रुणद्धि। न निवारयति। स नृपः। क्षयस्य पक्षः क्षयपक्षः कृष्णपक्ष ऐन्दवीरिन्दुसम्बन्धिनीः कला इव। 'कला तु षोडशो

भागः' इत्यमरः । सकलाः समग्राः शक्तिसम्पदः प्रभुमन्त्रोत्साहशक्तीस्तिस्रोऽपि हन्ति नाशयति । अन्धस्य जंघाबलमिव क्रोधान्धस्य लोकोत्तरमपि सामर्थ्यं व्यर्थमेवेत्यर्थः । अत्र कालस्य सर्वकारणत्वात्क्षयपक्षस्य कलाक्षयकारित्वमस्त्येव । तमसस्तु तत्कालविजृम्भणात्तथा व्यपदेशः ॥

अन्वयः—बलवान् ( विक्रमशाली ) अपि यः ( नृपः ) कोपजन्मनः ( कोपप्रभवस्य ) तमसः ( मोहस्य ) अभिभवम् ( आक्रमणं ) न रुणद्धि ( न निवारयति ) सः क्षयपक्षे ( कृष्णपक्षे ) ऐन्दवीः (चन्द्रसम्बन्धिनीः) कलाः इव सकलाः (समग्राः) शक्तिसम्पदः ( प्रभावोत्साहमन्त्रजन्य-त्रिविधशक्तिरूपविभवान् ) हन्ति ( नाशयति ) ॥ ३७ ॥

समासः— कोपजन्मनः = कोपात् जन्म यस्य तस्य । क्षयपक्षे = क्षयस्य पक्षः तस्मिन् । ऐन्दवीः = इन्दोरिमा ऐन्दवीः । शक्तिसम्पदः = शक्तय एव सम्पदः ताः ।

व्या०—तमसः = कर्त्तरि षष्ठी । रुणद्धि = रुध + लट् । ऐन्दवीः = इन्दु + तस्येदमित्यण् । हन्ति = हन + लट् + ति ।

वाच्य०—बलवता....अभिभवः रुध्यते येन । ....हन्यन्ते तेन शक्तिसम्पदः ॥ ३७ ॥

सरलार्थः—बलवान् सन्नपि बलदर्पात् यः क्रोधं न शमयति, कृष्णपक्षे चान्द्रमस्यः कला इव तस्य सर्वाः शक्तयो नश्यन्ति।३७।

विमृष्यकारिणः क्रियाप्रकारमाह—

समवृत्तिरुपैति मार्दवं
समये यश्च तनोति तिग्मताम् ।
अधितिष्ठति लोकमोजसा
स विवस्वानिव मेदिनीपतिः ॥ ३८ ॥

अन्वयः—यः समवृत्तिः (सन्) समये मार्दवम् उपैति, तिग्मतां च तनोति, सः मेदिनीपतिः विवस्वान् इव ओजसा लोकम् अधितिष्ठति ॥ ३८ ॥

समेति ॥ यः समा नातिमृदुर्नातितिग्मा वृत्तिर्यस्य स समवृत्तिः सन्समये सत्यवसरे मार्दवं मृदुवृत्तित्वमुपैति तिग्मतां तीक्ष्णवृत्तित्वं च तनोति । स मेदिनीपतिर्विवस्वानिव ओजसा तेजसा लोकमधितिष्ठत्याक्रामति । सूर्योऽपि ऋतुभेदेन समवृत्तिरित्यादि योज्यम् ॥

सुबो०—यः समवृत्तिः (समा नातिमृदुः नातितिग्मा च वृत्तिर्यस्य तथाभूतः सन्) मार्दवं (मृदुताम्) उपैति (प्राप्नोति) तिग्मतां (तीक्ष्णत्वं) च तनोति (विस्तारयति), सः मेदिनीपतिः (राजा) विवस्वान् (सूर्य्यः) इव ओजसा (तेजसा) लोकं (भुवनम्) अधितिष्ठति (आक्रामति) ॥ ३८ ॥

समासः—समवृत्तिः = समा वृत्तिर्यस्य सः। मेदिनीपतिः = मेदिन्याः पतिः।

व्या०— उपैति = उप–इ + लट्+ति । तनोति = तन + लट् + ति । अधितिष्ठति = अधि–स्था + लट् + ति । लोकम् = "अधिशीङ्स्थासां कर्म्म" इति अधिकरणस्य कर्म्म संज्ञा ॥ ३८ ॥

वाच्य—समवृत्तिना उपेयते मार्दवं....येन....तन्यते (तायते) तिग्मताम्। अधिष्ठीयते लोकः....तेन विवस्वता इव मेदिनीपतिना ॥३८॥

सरलार्थः—यो नृपः रविरिव समये मृदुतां, समये तीक्ष्णतां च प्रकाशयति, स सर्वलोकम् अभिभवति ॥ ३८ ॥

उक्तान्यथाकरणेऽनिष्टमाह—

क्व चिराय परिग्रहः श्रियां
क्व च दुष्टेन्द्रियवाजिवश्यता।
शरदभ्रचलाश्चलेन्द्रियै-
रसुरक्षा हि बहुच्छलाः श्रियः ॥ ३९ ॥

अन्वयः—श्रियां चिराय परिग्रहः क्व, दुष्टेन्द्रियवाजिवश्यता च क्व। हि शरदभ्रचलाः बहुच्छलाः श्रियः चलेन्द्रियैः असुरक्षाः॥ ३९॥

क्वेति॥ श्रियां संपदां चिराय बहुकालं परिग्रहः स्वायत्तीकरणं क्व। इन्द्रियाणि वाजिन इवेति समासः। दुष्टानाममार्गधाविनामिन्द्रियवाजिनां 'वश्यो वशंगतस्तस्य भावस्तत्ता क्व। नोभयमेकत्र तिष्ठतीत्यर्थः। कुतः। हि यस्माच्छरदभ्रवच्चलाश्चञ्चलाः। किञ्च बहुच्छला बहुव्याजाः। बहुरन्ध्रा इति यावत्। 'छलं तु स्खलिते व्याजे' इति विश्वः। श्रियः संपदः। चलेन्द्रियैरजितेन्द्रियैरसुरक्षा रक्षितुमशक्याः। कथञ्चित्प्राप्ता अपि श्रियो नाविनीतेषु तिष्ठन्तीत्यर्थः। वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः॥

सुबो०—श्रियां (सम्पदां) चिराय (बहुकालं) परिग्रहः (स्वीकरणं) क्व (कुत्र) दुष्टेन्द्रियवाजिवश्यता (दुष्टानाम् इन्द्रियरूपाश्वानां वश्यता वशीभूतता) च क्व (कुत्र उभयोर्महदन्तरमित्यर्थः)। हि (यतः) शरदब्भ्रचलाः (शरद्घनवत् चञ्चलाः) बहुच्छलाः (बहुव्याजाः, नानाछिद्रसमन्विताः) श्रियः (सम्पदः) चलेन्द्रियैः (अजितेन्द्रियैः पुरुषैः) असुरक्षाः (रक्षितुमशक्या भवन्ति)॥ ३९॥

समासः—वशं गताः इति वश्याः तेषां भावः वश्यता। दुष्टेन्द्रियवाजिवश्यता=इन्द्रियाण्येव वाजिनः, दुष्टा इन्द्रियवाजिनः, तेषां वश्यता। शरदब्भ्रचलाः=शरदा अब्भ्राणि, तानीव चलाः। 'अब्भ्रं मेघो वारिवाहः' इत्याद्यमरः। चलेन्द्रियैः=चलानि इन्द्रियाणि येषां तैः। बहुच्छलाः=बहूनि छलानि यासां ताः॥ ३९॥

व्या०—(वश+यत्), असुरक्षाः=सु-रक्ष+कर्म्मणि खल्। न सुरक्षाः असुरक्षाः।

वाच्य—क्व परिग्रहेण भूयते, क्व दुष्टेन्द्रिय वाजिवश्यतया भूयते। शरदभ्रचलाभिः बहुच्छलाभिः श्रीभिः असुरक्षाभिः भूयते।

सरलार्थः—स्वभावतोऽतिचञ्चला बहुच्छिद्रा च लक्ष्मीः जितेन्द्रियानपि पुरुषान् चिरं न भजते, किमुत अजितेन्द्रियान्। अतोजितेन्द्रियैः सद्भिर्नृपैः सर्वविधेषु छिद्रेषु सर्वदा सावधानैर्भवितव्यम् ॥ ३९ ॥

क्रोधस्य दुष्टतामुक्त्वा तस्य त्यागमुपदिशति—

किमसामयिकं वितन्वता
मनसः क्षोभमुपात्तरंहसः।
क्रियते पतिरुच्चकैरपां
भवता धीरतयाधरीकृतः ॥ ४० ॥

अन्वयः—उपात्तरंहसः मनसः असामयिकं क्षोभं वितन्वता भवता धीरतया अधरीकृतः अपां पतिः किम् उच्चकैः क्रियते॥४०॥

किमिति ॥ उपात्तरंहसः प्राप्तत्वरस्य मनसः। समयोऽस्य प्राप्तः सामयिकः। 'समयस्तदस्य प्राप्तम्' इति ठञ्। स न भवतीत्यसामयिकस्तमप्राप्तकालं क्षोभं वितन्वता भवता धीरतया धैर्यगुणेन। 'मनसो निर्विकारत्वं धैर्यं सत्स्वपि हेतुषु' इति रसिकाः। अधरीकृतस्तिरस्कृतः। प्रागिति शेषः। अपां पतिः समुद्रः किं किमर्थमुच्चकैरधिकः क्रियते। न पराजितं पुनरुच्चकैः कुर्यादिति भावः। अत्र वितन्वतेति भीमविशेषणत्वेन अपाम्पतिपदार्थस्योच्चैःकरणे हेतुत्वोक्त्या काव्यलिङ्गमलङ्कारः॥

सुबो०—उपात्तरंहसः (प्राप्तवेगस्य, शत्रुशासनाय त्वरान्वितस्य) मनसः (चित्तस्य) असामयिकम् (अप्राप्तकालं) क्षोभं (चाञ्चल्यं) वितन्वता (प्रकाशयता) भवता (त्वया) धीरतया (धैर्य्येण) अधरीकृतः (नीचैः कृतः, पराभूतः) अपां पतिः (समुद्रः) किं (कथम्) उच्चकैः (अधिकः) क्रियते ॥ ४० ॥

समासः—उपात्तरंहसः=उपात्तं रंहः येन तस्य। 'रहस्तरसी तु रयः स्यदः जवः' इत्यमरः ('वेगः प्रवाहजवयोरपि' इत्यमरः) धीरतया=धीरस्य भावः धीरता, तया ॥ ४० ॥

व्या०—असामयिकम् = समयः प्राप्तोऽस्येति समय + ठञ् । वितन्वता = वि-तन + शतृ । उपात्त = उप-आङ्-दा + क्त 'अच उपसर्गात्तः' इति तादेशः । क्रियते = कृ + कर्म्मणि लट् । उच्चैरित्यव्ययम् 'अव्ययसर्वनाम्नामकच् प्राक्टः' इति स्वार्थे अकच् । अधरीकृतः = अनधरः अधरः कृत इति च्विप्रत्ययः ॥ ४० ॥

वाच्य—मनसः क्षोभं वितन्वन् भवान् धीरतया अधरीकृतम् अयां पतिं किम् उच्चकैः करोति ॥ ४० ॥

सरलार्थः—यस्त्वं पूर्वं समुद्रादप्यधिकतरधैर्य्यशाली आसीः । स कथमिदानीम् असमये चित्तचाञ्चल्यं प्रकटयन् अधीरो भवसि ॥ ४० ॥

श्रुतमप्यधिगम्य ये रिपून्
विनयन्ते न शरीरजन्मनः ।
जनयन्त्यचिराय सम्पदा-
मयशस्ते खलु चापलाश्रयम् ॥ ४१ ॥

अन्वयः—ये श्रुतम् अधिगम्य अपि शरीरजन्मनः रिपून् न विनयन्ते, ते खलु अचिराय सम्पदां चापलाश्रयम् अयशः जनयन्ति ॥ ४१ ॥

श्रुतमिति ॥ किञ्च । ये श्रुतं शास्त्रमधिगम्यापि शरीरजन्मनः शरीरप्रभवान्रिपून्कामक्रोधादीन्न विनयन्ते न नियच्छन्ति । 'कर्तृस्थे चाशरीरे कर्मणि' इत्यात्मनेपदम् । ते खल्वचिराय सम्पदां चापलाश्रयमस्थैर्यनिबन्धनमयशो दुष्कीर्तिं जनयन्ति । आश्रयदोषादस्थैर्यं सम्पदां न स्वदोषादित्यर्थः । अजितारिषड्वर्गस्य कुतः सम्पद इति भावः ॥

सुबो०—ये श्रुतं ( शास्त्रम् ) अधिगम्य (प्राप्य, शिक्षित्वा) अपि शरीरजन्मनः ( देहप्रभवान् ) रिपून् ( कामक्रोधादीन् षट् शत्रून् ) न विनयन्ते ( न वशीकुर्वन्ति ), ते खलु ( ते एव )

अचिराय ( शीघ्रं ) सम्पदां ( श्रियां ) चापलाश्रयम् ( चाञ्चल्यनिबन्धनम् ) अयशः ( अख्यातिं ) जनयन्ति (उत्पादयन्ति) ॥

समासः—शरीरजन्मनः = शरीरात् जन्म येषां तान् । चापलाश्रयम् = ( चपलस्य भावः चापलम् ) चापलम् आश्रयो यस्य तत् ॥ ४१ ॥

व्या०—श्रुतम् = श्रु + क्त । 'श्रुतं शास्त्रावधूतयोः' इत्यमरः । विनयन्ते = वि–नी + लट् 'कर्तृस्थे चाशरीरे कर्मणि' इत्यात्मनेपदम् । जनयन्ति = जन् + णिच् + लट् + झि ॥ ४१ ॥

वाच्य—यैः शरीरजन्मानः रिपवः न विनीयन्ते, तैः सम्पदां चापलाश्रयम् अयशः जन्यते ॥ ४१ ॥

सरलार्थः—लक्ष्मीः स्वदोषात् न चञ्चला, किन्तु आश्रयदोषादेव चञ्चला भवति । ये कामादिरिपून् न जयन्ति, ते एव तादृशेन स्वदोषेण लक्ष्म्याः चाञ्चल्यदोषमुत्पादयन्ति । अतः अजितक्रोधः सम्पदं न प्राप्नोति ॥ ४१ ॥

क्रोधात् कार्य्यहानिरित्याशयेनाह—

अतिपातितकालसाधना
स्वशरीरेन्द्रियवर्गतापनी ।
जनवन्न भवन्तमक्षमा
नयसिद्धेरपनेतुमर्हति ॥ ४२ ॥

अन्वयः—अतिपातितकालसाधना स्वशरीरेन्द्रियवर्गतापनी अक्षमा भवन्तं जनवत् नयसिद्धेः अपनेतुं न अर्हति ।

अतिपातितेति ॥ अतिपातितान्यतिक्रान्तानि कालः समयोऽनुरूपः साधनानि सहायादीनि यया सा तथोक्ता । तापयतीति तापनी । कर्तरि ल्युट् । टित्वान्ङीप् । स्वस्य यच्छरीरमिन्द्रियवर्गश्च तयोस्तापन्यक्षमा क्रोधो भवन्तं जनवत्पृथग्जनमिव । 'तेन तुल्यं—' इति वतिप्रत्ययः । तेनैवार्थो लक्ष्यते । 'तद्धितश्चासर्वविभक्तिः' इत्यव्ययम् । नयसिद्धेर्नयसाध्यफलादपनेतुं पृथक्कर्तुं नार्हति । असमयक्रोधस्यात्मसन्तापातिरिक्तं फलं नास्तीत्यर्थः ।

सुबो०—अतिपातितकालसाधना ( अतिपातितानि अतिक्रान्तानि कालः अनुरूपसमयः साधनानि सहायादीनि च यया तथाभूता, असमये असहायावस्थायां चोत्पन्ना इत्यर्थः ) स्वशरीरेन्द्रियवर्गतापनी ( स्वस्य शरीरस्य इन्द्रियगणस्य च सन्तापजनिका ) अक्षमा ( क्रोधः ) भवन्तं ( त्वां ) जनवत् ( पामरमिव, इतरलोकम् इव ) नयसिद्धेः ( नीतिसाध्यफलात् ) अपनेतुं (भ्रंशयितुं ) न अर्हति ( न युज्यते ) ।

समासः—अतिपातितकालसाधना=कालश्च साधनानि च कालसाधनानि, अतिपातितानि कालसाधनानि यया सा ( अति-पत+णिच्+क्त ) । स्वशरीरेन्द्रियवर्गतापनी=( तापयतीति तापनी, तप+णिच्+कर्त्तरि ल्युट् ) शरीरं च इन्द्रियवर्गश्च, शरीरेन्द्रियवर्गौ, स्वस्य शरीरेन्द्रियवर्गौ, तयोः तापनी । नयसिद्धेः=नयस्य सिद्धिः तस्याः ( अपादाने पञ्चमी ) ।

व्या०—जनवत्=जन+तुल्यार्थे वति । 'जनो लोके महर्लोकात् परलोके च पामरे' इति मेदिनी । अपनेतुम्=अप-नी+तुमुन् ।

वाच्य०—अतिपातितकालसाधनया स्वशरीरेन्द्रियवर्गतापन्या अक्षमया न अर्ह्यते ।

सरलार्थः—इतरलोक इव भवान् असमये असहायावस्थायां च क्रोधवशोभूत्वा देहेन्द्रियेषु संतापं माऽनुभूः विफलोद्यमश्च मा भूः ॥ ४२ ॥

क्रोधस्य दोषं प्रदर्श्य क्षमाया गुणानाह—

उपकारकमायतेर्भृशं
प्रसवः कर्मफलस्य भूरिणः ।
अनपायि निबर्हणं द्विषां
न तितिक्षासममस्ति साधनम् ॥ ४३ ॥

अन्वयः—आयतेः भृशम् उपकारकं भूरिणः कर्म्मफलस्य प्रसवः अनपायि द्विषां निबर्हणं साधनं तितिक्षासमं न अस्ति ।

उपकारकमिति॥ आयतेरुत्तरकालस्य भृशमत्यन्तमुपकारकम्। स्थिरफलहेतुरित्यर्थः। भूरिणः प्रभूतस्य कर्मफलस्य। प्रसूयतेऽनेनेति प्रसवः कारणम्। अपायि न भवतीत्यनपायिस्वयमविनश्यदेव द्विषां निवर्हणं विनाशकमेवंगुणकं साधनं तितिक्षासमं क्षमातुल्यं नास्ति। 'क्षान्तिः क्षमा तितिक्षा च' इत्यमरः। 'तिज निशाने' इति धातोः। 'गुप्तिज्किद्भ्यः सन्' इति क्षमार्थे सन्प्रत्ययः। तितिक्षासममित्यनुक्तोपमेया समास आर्थी लुप्तोपमा, भृशमित्यनपायिशब्दैः साधनान्तरवैलक्षण्याद्यतिरेकश्च व्यज्यते। भेदप्राधान्य उपमानादुपमेयस्याधिक्ये विपर्यये च व्यतिरेकः॥

सुबो०—आयतेः (उत्तरकालस्य) भृशम् (अत्यन्तम्) उपकारकं (हितकरम्-उत्तरकाले शुभजनकमित्यर्थः) भूरिणः (प्रभूतस्य) कर्म्मफलस्य प्रसवः (उत्पादकम्) अनपायि (अविनाशि, स्वयमविनष्टं सत्) द्विषां (शत्रूणां) निवर्हणं (नाशकं) साधनम् (उपायः) तितिक्षासमं (क्षमातुल्यं) नास्ति॥ ४३॥

समासः—कर्म्मफलस्य=कर्म्मणः फलं तस्य। (अपायोऽस्यस्य अपायि) न अपायि अनपायि। तितिक्षासमम्=तितिक्षया समम्।

व्या०—प्रसवः=प्रसूयतेऽनेनेति प्र-सू+करणे अप्। निवर्हणम्=नि-बृह+णिच्+ल्यु। द्विषाम्=द्विष+शतृ। तितिक्षा=तिज+स्वार्थे सन्+अ। साधनम्=साध+करणे ल्युट्।

वाच्य०—उपकारकेण प्रसवेन अनपायिना निवर्हणेन साधनेन तितिक्षासमेन न भूयते।

सरलार्थः—क्षमासदृशः अन्यो उपायो नास्ति येन शत्रून् निपात्य प्रभूतं कर्म्मफलं प्राप्यते॥ ४३॥

ननु तितिक्षया कालक्षेपे दुर्य्योधनः सर्वान् राज्ञो वशीकुर्य्यादित्यत्राह—

प्रणतिप्रवणान्विहाय नः
सहजस्नेहनिबद्धचेतसः।

प्रणमन्ति सदा सुयोधनं
प्रथमे मानभृतां न वृष्णयः ॥ ४४ ॥

अन्वयः—सहजस्नेहनिबद्धचेतसः मानभृतां प्रथमे वृष्णयः प्रणतिप्रवणान् नः विहाय सुयोधनं सदा न प्रणमन्ति ।

प्रणतीति ॥ सहजस्नेहेनाकृत्रिमप्रेम्णा निबद्धचेतसोऽस्मासु गाढं लग्नचित्ताः । सुयोधने तु न तथेति भावः । किं च मानभृतामहङ्कारिणां प्रथमेऽग्रेसराः । सुयोधनस्तु ततोऽपीति भावः । वृष्णयो यादवाः प्रणतिप्रवणान्प्रणामपरान् । सुयोधनस्तु न तथेति भावः । नोऽस्मान्विहाय सुयोधनं सदा न प्रणमन्ति न नमन्ति नानुसरन्ति । किन्तु कार्यकाले त्यक्ष्यन्त्येवेत्यर्थः । सति यादवविग्रहे न किञ्चिदस्माकमसाध्यं भवेदिति भावः । अनेकपदार्थहेतुकं काव्यलिङ्गमलङ्कारः ॥

सुबो०—सहजस्नेहनिबद्धचेतसः ( स्वाभाविकेन स्नेहेन अस्मासु नितरामासक्तचित्ताः ) मानभृताम् ( वीर्य्यशौर्य्याभिजात्यादिभिः अहंकारवतां ) प्रथमे ( अग्रगण्याः ) वृष्णयः ( यादवाः ) प्रणतिप्रवणान् ( प्रणामपरान्, अनुगतानित्यर्थः ) नः ( अस्मान् ) विहाय ( त्यक्त्वा ) सुयोधनं ( दुर्य्योधनं ) सदा (सर्वदा) न प्रणमन्ति ( न नमन्ति, नानुगच्छन्ति, कार्य्यानुरोधेन कदाचित् अनुगच्छन्तीत्यर्थः ) ।

समासः—प्रणतिप्रवणान् = प्रणत्या प्रवणाः तान् । सहजस्नेहनिबद्धचेतसः = सहजः स्नेहः, तेन निबद्धानि चेतांसि येषां ते । मानभृताम् = मानं बिभ्रति ये तेषाम् ।

व्या०—विहाय = वि–हा + ल्यप् । प्रणमन्ति = प्र–नम + लट् + झि । प्रथमे इति जसि रूपम् । वृष्णयः = वृष्णिशब्दस्य तदपत्ये लक्षणया वृष्णिवंशीया इत्यर्थः । वृष्णिर्नाम यदुवंशीय एकः ।

वाच्य—सहजस्नेहनिबद्धचेतोभिः मानभृतां प्रथमैः वृष्णिभिः सुयोधनः सदा न प्रणम्यते ।

सरलार्थः—यदुकुलकन्यायाः कुन्त्या गर्भजाता वयमिति कृत्वा यादवानामस्मान् प्रति अकृत्रिमः स्नेहः, दुर्य्योधने तथा। अपि च वयं तेषामनुगताः, दुर्य्योधनस्तु न। ते च दुर्य्योधनादपि अधिकतरमानिनः। अतस्ते कार्य्यानुरोधेन कदाचित् दुर्योधनमनुसरन्तोऽपि युद्धकाले तं परित्यज्य अस्मत्पक्षमेवाश्रयिष्यन्ति॥४४॥

सुहृदः सहजास्तथेतरे
मतमेषां न विलङ्घयन्ति ये।
विनयादिव यापयन्ति ते
धृतराष्ट्रात्मजमात्मसिद्धये॥ ४५॥

अन्वयः—एषां ये सहजाः सुहृदः, तथा इतरे मतं न विलङ्घयन्ति, ते आत्मसिद्धये धृतराष्ट्रात्मजं विनयात् इव यापयन्ति।

सुहृद इति॥ किंचैषां वृष्णीनां ये सहजाः सहजाताः। मातृपितृपक्षा इत्यर्थः। 'अन्येष्वपि दृश्यते' इति डप्रत्ययः। सुहृदो मित्राणि तथेतरे कृत्रिमसुहृदश्च मतं वृष्णिपक्षं न विलङ्घयन्ति नातिक्रामन्ति। ते द्वयेऽपि नृपाः। दुर्योधनोपजीविनोऽपीति भावः। आत्मजीवनार्थं धृतराष्ट्रात्मजं दुर्योधनं विनयादानुकूल्यादिव यापयन्ति कालं गमयन्ति। कार्यकाले तु वृष्णिपक्षप्रवेशिन एवेत्यर्थः। यातेर्ण्यन्ताल्लङ्। 'अर्तिह्री-' इत्यादिना पुगागमः॥

सुबो०—एषां (वृष्णीनां) ये सहजाः (अकृत्रिमाः) सुहृदः (मित्राणि मातापितृबान्धवः इत्यर्थः) तथा इतरे (ये कृत्रिमाः सुहृदः) मतम् (एषां वृष्णीनाम् अभिप्रायं) न विलङ्घयन्ति (न अतिक्रामन्ति), ते (उभये राजानः) आत्मसिद्धये (स्वकार्य्यसाधनाय) धृतराष्ट्रात्मजं (दुर्य्योधनं) विनयात् इव (कपटविनयं प्रकाश्येत्यर्थः) यापयन्ति (वर्त्तयन्ति, उपजीवन्तीत्यर्थः)।

समासः—आत्मसिद्धये = आत्मनः सिद्धिः तस्यै।

व्या०—विलङ्घयन्ति = वि–लघि + णिच् + लट् + झि । विनयात् = ल्यब्लोपे पञ्चमी । यापयन्ति = या + णिच् + लट् + झि । 'यापनं वर्त्तने कालक्षेपे निरसनेऽपि च' इति मेदिनी ।

वाच्य—एषां सहजैः तथा इतरैः यैः सुहृद्भिः मतं न विलङ्घ्यते, तैः आत्मसिद्धये धृतराष्ट्रात्मजः याप्यते ।

सरलार्थः—यादवानां ये कृत्रिमा अकृत्रिमाश्च सुहृदः तेऽपि स्वार्थसाधनाय साम्प्रतं दुर्य्योधनमनुवर्त्तमाना अपि यादवानां मतानुवर्तित्वात् कालेऽस्मत्पक्षमेवाश्रयिष्यन्ति ।

नायमभियोगकाल इत्याशयेनाह—

अभियोग इमान्महीभुजो
भवता तस्य कृतः कृतावधेः ।
प्रविघाटयिता समुत्पतन्
हरिदश्वः कमलाकरानिव ॥ ४६ ॥

अन्वयः—कृतावधेः तस्य भवता कृतः अभियोगः इमान् महीभुजः हरिदश्वः कमलाकरान् इव समुत्पतन् प्रविघाटयिता ।

अभियोग इति ॥ कृतावधेः परिभाषितकालस्य । 'अवधिस्त्ववधाने स्यात्सीम्नि काले विलेऽपि च' इति विश्वः । तस्य सुयोधनस्य । कर्मणि षष्ठी । भवता कृतः । अवधिमनपेक्ष्येति शेषः । अभियोगः । आर्द्राभिभव इति यावत् । 'अभियोगस्तु शपथे स्यादार्द्रे च पराभवे' इति विश्वः । इमान्पूर्वोक्तान्महीभुजो राज्ञो हरिदश्व उष्णरश्मिः कमलाकरानिव समुत्पतन्नुद्यन्नेव प्रविघाटयिता भेत्स्यति । घाटयतेर्भौवादिकाल्लुट् । चौरादिकस्य तु 'मितां ह्रस्वः' इति ह्रस्वत्वं स्यात् ॥

सुबो०—कृतावधेः ( निर्धारितसमयस्य, त्रयोदश वर्षान् व्याप्य वनवासं समाप्य प्रत्यागतेभ्यो युष्मभ्यं राज्यं दास्यामीति कृतनियमस्य ) तस्य ( दुर्योधनस्य ) भवता ( त्वया ) कृतः

अभियोगः ( युद्धार्थमाक्रमणं ) इमान् ( पूर्वोक्तान् ) महीभुजः ( राज्ञः ) हरिदश्वः ( सूर्य्यः ) कमलाकरान् ( पद्मनिवहान् ) इव समुत्पतन् ( उद्यन् ) प्रविघाटयिता ( भेत्स्यति ) ।

समासः—कृतावधेः = कृतः अवधिः येन तस्य । हरिदश्वः = हरितः ( हरिद्वर्णाः ) अश्वा यस्य सः । 'भास्वद्विवस्वत्सप्ताश्वहरिदश्वोष्णरश्मयः' इत्यमरः । कमलाकरान् = कमलानाम् आकराः तान् । 'आकरो निवहोत्पत्तिस्थानश्रेष्ठेषु कथ्यते' इति मेदिनी ।

व्या०—तस्य = अभियोग इति कृदन्तपदस्य कर्मणि षष्ठी । प्रविघाटयिता = प्र-विघट ( भ्वादि ) + णिच् + लुट् ।

वाच्य—भवता कृतेन तस्य अभियोगेन हरिदश्वेन कमलाकरा इव समुत्पतता इमे महीभुजः प्रविघाटयितारः ।

सरलार्थः—समयपरिरक्षणात् प्राक् यदि भवान् दुर्योधनमाक्रमिष्यति तदा सर्वे राजानो विरक्ताः सन्तः अस्मान् परित्यक्ष्यन्ति । ४६

वृष्णिपक्षेतरान् उद्दिश्याह—

उपजापसहान्विलङ्घयन्
स विधाता नृपतीन्मदोद्धतः ।
सहते न जनोऽप्यधःक्रियां
किमु लोकाधिकधाम राजकम् ॥ ४७ ॥

अन्वयः—मदोद्धतः सः नृपतीन् विलंघयन् उपजापसहान् विधाता । जनः अपि अधःक्रियां न सहते, लोकाधिकधाम राजकं किमु ।

उपजापेति ॥ मदोद्धतः स दुर्योधनो नृपतीनन्यान्नृपान्विलङ्घयन्मदादवमानयन् । सहन्त इति सहाः । पचाद्यच् । उपजापस्य सहान्भेदयोग्यान् । समौ भेदोपजापौ इत्यमरः । विधाता विधास्यति । दधातेर्लुट् । अवमानितो जनः सुभेद्य इति भावः । न च ते सहिष्णव-

इत्याह—जनः प्राकृतोऽप्यधःक्रियामपमानं न सहते । लोकाधिकधाम लोकोत्तरप्रतापं राजकं राजसमूहः । 'गोत्रोक्षोष्ट्र-' इत्यादिना वुञ्प्रत्ययः । किमु । न सहत इति किं वक्तव्यमित्यर्थः । तथा सति कृत्स्नमेव राजमण्डलमस्मानेवावलम्बिष्यत इति भावः ॥

सुबो०—मदोद्धतः ( गर्वितः ) सः ( दुर्य्योधनः ) नृपतीन् ( अन्यान् नृपान् ) विलंघयन् ( गर्वात् अवमानयन् ) उपजापसहान् ( अस्माकं भेदयोग्यान् ) विधाता ( करिष्यति ) । जनः ( पामरः, इतरजनः ) अपि अधःक्रियाम् ( अवमाननां ) न सहते ( न क्षमते ), लोकाधिकधाम ( असाधारणप्रतापं ) राजकं ( राजसमूहः ) किमु ( न सहते इति किं वक्तव्यमित्यर्थः ) ।

समासः—उपजापसहान् = (सहन्ते इति सहाः—पचाद्यच् ) उपजापस्य सहाः तान् । 'समौ भेदोपजापौ' इत्यमरः । मदोद्धतः = मदेन उद्धतः । लोकाधिकधाम = लोकेभ्यः अधिकं धाम यस्य तत् । 'गृहदेहत्विट्प्रभावा धामानि' इत्यमरः ।

व्या०—विधाता = वि–धा + लुट् । सहते = सह + लट् । राजकम् = राज्ञां समूहः इति राजन् + वुञ् ।

वाच्य—मदोद्धतेन नृपतयः उपजापसहाः विधातारः । जनेनापि अधःक्रिया न सह्यते, किमु लोकाधिकधाम्ना राजकेन ।

सरलार्थः—गर्वितस्वभावः दुर्य्योधनः अन्यानपि स्वपक्षान् राज्ञः कदाचित् अवमानयिष्यत्येव । ते चापि महाप्रभावास्तत्कृतामवमाननां न सहिष्यन्ते । सुतरां स्वल्पायासेनैव अस्माभिर्भेदमुपागता अस्मत्पक्षा भविष्यन्ति । ४७

ननु सखीनिवेत्यादि वनेचरोक्त्या तस्य मदसम्भावना कथमित्यत्राह—

असमापितकृत्यसम्पदां
हतवेगं विनयेन तावता ।

प्रभवन्त्यभिमानशालिनां
मदमुत्तम्भयितुं विभूतयः ॥ ४८ ॥

अन्वयः—असमापितकृत्यसम्पदाम् अभिमानशालिनां विभूतयः तावता विनयेन हतवेगं मदम् उत्तम्भयितुं प्रभवन्ति।

असमापितेति ॥ असमापितकृत्यसम्पदामकृतकृत्यानामतोऽभिमानशालिनामहङ्कारिणां विभूतयः सम्पद एव तावता स्वल्पेन विनयेन। कार्यवशादारोपितेनेति शेषः। हतवेगं प्रतिबद्धवेगं नतु स्वरूपतो हतं मदमुत्तम्भयितुं वर्धयितुं प्रभवन्ति। सर्वथा दुर्जनं सम्पदो विकारयन्तीति भावः॥

सुबो०—असमापितकृत्यसम्पदाम् ( अकृतकृत्यानाम् ) अभिमानशालिनाम् ( अहङ्कारिणां ) विभूतयः ( सम्पद एव ) तावता ( कार्य्यवशात् तादृशेन कपटपूर्णेन ) विनयेन हतवेगम् ( उपशान्तवेगं न तु स्वरूपतो नष्टं ) मदं ( गर्वम् ) उत्तम्भयितुं ( वर्द्धयितुं ) प्रभवन्ति ( समर्था भवन्ति )।

समासः—असमापितकृत्यसम्पदाम् = कृत्यानि सम्पद इव कृत्यसम्पदः; असमापिताः कृत्यसम्पदः यैः तेषाम्। हतवेगम् = हतो वेगः यस्य तम्। अभिमानशालिनाम् = अभिमानेन शालन्ते ( शोभन्ते ) ये तेषाम् ( णिनिः )।

व्या०—उत्तम्भयितुम् = उद्-स्तम्भ + णिच् + तुमुन्।

वाच्य—विभूतिभिः प्रभूयते।

सरलार्थः—ये गर्विताः तेषां कपटविनयेन प्रतिरुद्धवेगमपि मदं सम्पद एव वर्द्धयन्ति। ४८

अथ मदस्यानर्थहेतुतां युग्मकेनाह—

मदमानसमुद्धतं नृपं
न वियुङ्क्ते नियमेन मूढता।
अतिमूढ उदस्यते नया-
न्नयहीनादपरज्यते जनः ॥ ४९ ॥

अन्वयः—मदमानसमुद्धतं नृपं मूढ़ता नियमेन न वियुङ्क्ते । अतिमूढ़ः नयात् उदस्यते । नयहीनात् जनः अपरज्यते ।

मदेति । अपरागेति च ॥ मदमानाभ्यां दर्पाहङ्काराभ्यां समुद्धतं नृपं मूढता कार्याऽपरिज्ञानं नियमेनावश्यं न वियुङ्क्ते न विमुञ्चति । अतिमूढो नयान्नीतिमार्गादुदस्यत उत्क्षिप्यते । कर्मकर्तरि लट् । नयहीनाज्जनोऽपरज्यतेऽपरक्तो भवति । स्वरितञितः—इत्यादिनात्मनेपदम् ॥

सुबो०—मदमानसमुद्धतं ( मदेन दर्पेण मानेन अहंकारेण च समुद्धतम् उद्रिक्तं ) नृपं ( राजानं ) मूढ़ता ( हतबुद्धिता ) नियमेन ( अवश्यं, निश्चितं ) न वियुङ्क्ते ( न मुञ्चति ) । अतिमूढ़ः ( नितान्तहतबुद्धिः जनः ) नयात् ( नीतेः ) उदस्यते ( उत्क्षिप्यते, हीनोभवति ) । नयहीनात् ( नीतिभ्रष्टात् ) जनः ( प्रजालोकः ) अपरज्यते ( विरक्तोभवति ) ।

समासः—मदमानसमुद्धतम् = मदश्च मानश्च ताभ्यां समुद्धतः तम् । नयहीनात् = नयेन हीनः तस्मात् ।

व्या०—वियुङ्क्ते = विम्युज + लट् । मूढ़ = मुह + क्त । उदस्यते = उद्-अस + कर्मकर्तरि लट् । अपरज्यते = अप-रन्ज + कर्तरि लट् ।

वाच्य—मदमानसमुद्धतः नृपः मूढ़तया न वियुज्यते । अतिमूढ़ेन नयात् उदस्यते । जनेन नयहीनात् अपरज्यते ।

सरलार्थः—अहंकारी जनः मूढ़ोभवति, मूढ़ो नीतिभ्रष्टो भवति । नीतिभ्रष्टः प्रजानां विरागभाजनं भवति ॥ ४९

अपरागसमीरणेरितः
क्रमशीर्णाकुलमूलसन्ततिः ।
सुकरस्तरुवत्सहिष्णुना
रिपुरुन्मूलयितुं महानपि ॥ ५० ॥

अन्वयः—अपरागसमीरणेरितः क्रमशीर्णाकुलमूलसन्ततिः रिपुः महान् अपि तरुवत् सहिष्णुना उन्मूलयितुं सुकरः ।

अपरागोऽप्रीतिः। द्वेष इति यावत्। समीरण इव। तेनेरितश्चोदितः। अत एव क्रमेण शीर्णा शीर्णीभूताकुला चला च मूलसन्ततिः प्रकृत्यादिस्वजनवर्गः शिफासङ्घतश्च यस्य स तथोक्तः। मूलं वशीकृते स्वीये शिफातारान्तिकादिषु' इति वैजयन्ती। रिपुर्महानपि तरुवद् वृक्ष इव सहिष्णुना क्षमावतोन्मूलयितुमुद्धर्तुं सुकरः सुसाध्यः। सुकरोन्मूल इत्यर्थः। अत्र मदादेः पूर्वपूर्वस्योत्तरोत्तरं प्रति कारणत्वात्कारणमाला, तरुवदित्युपमा चेति द्वयोः संसृष्टिः॥

सुबो०—अपरागसमीरणेरितः (प्रजानाम् अपरागः समीरण इव तेन ईरितः कम्पितः) अत एव क्रमशीर्णाकुलमूलसन्ततिः (क्रमेण शीर्णा शिथिलीभूता आकुला चलाच मूलसन्ततिः अमात्यादिस्वजनवर्गः—तरुपक्षे शिफासमूहः—यस्य स तथाभूतः) रिपुः (शत्रुः) महान् (प्रबलः—तरुपक्षे विशालः—सन्) अपि तरुवत् (वृक्ष इव) सहिष्णुना (क्षमावता जनेन) उन्मूलयितुम् (उद्धर्तुं) सुकरः (सुसाध्यः भवति)।

समासः—अपरागसमीरणेरितः=अपरागः समीरण इव, तेन ईरितः। क्रमशीर्णाकुलमूलसन्ततिः=मूलानां सन्ततिः, क्रमेण शीर्णा आकुला च मूलसन्ततिः यस्य सः। उन्मूलयितुम्=उत्पाटितं मूलं यस्य स उन्मूलः, उन्मूलं कर्त्तुमिति।

व्या०—सुकरः=सु-कृ+कर्म्मणि खल्। उन्मूलशब्दात् करोत्यर्थे णिच्+तुमुन्।

वाच्य—अपरागसमीरणेरितेन क्रमशीर्णाकुलमूलसन्ततिना महता उन्मूलयितुं भूयते।

सरलार्थः—प्रजानां विरागात् अमात्यादयोऽपि शिथिलादरः सुतरां प्रकुपिता भवन्ति। तादृश्यामवस्थायां प्रबलोऽपि रिपुः सहिष्णुना सुखेन जेयो भवति। ५०

नन्वन्तर्भेदमात्रेण कथं सुसाध्यस्तत्राह—

अणुरप्युपहन्ति विग्रहः
प्रभुमन्तःप्रकृतिप्रकोपजः।

अखिलं हि हिनस्ति भूधरं
तरुशाखान्तनिघर्षजोऽनलः ॥ ५१ ॥

अन्वयः—अणुः अपि अन्तःप्रकृतिप्रकोपजः विग्रहः प्रभुम् उपहन्ति । (तथाहि) तरुशाखान्तनिघर्षजः अनलः भूधरम् अखिलं हिनस्ति हि ।

अणुरिति ॥ अणुरल्पोऽप्यन्तःप्रकृतिप्रकोपजोऽन्तरङ्गामात्याद्यपरागसमुत्थः । 'प्रकृतिः पञ्चभूतेषु स्वभावे मूलकारणे । छन्दःकारणगुह्येषु जन्त्वमात्यादिकेष्वपि' ॥ इति वैजयन्ती । विग्रहो वैरं प्रभुमुपहन्ति नाशयति । अत्र दृष्टान्तमाह—तरुशाखान्तानां निघर्षो घर्षणंऽतज्जोऽनलोऽग्निः । अत्रोपमानोपमेयसानधर्माणां प्रतिबिम्बतया निदर्शनेन दृष्टान्तालङ्कारः ॥

सुबो०—अणुः ( अल्पः ) अपि अन्तःप्रकृतिप्रकोपजः ( अन्तरङ्गानाम् अमात्यादीनाम् अपरागसमुद्भवः ) विग्रहः ( वैरं ) प्रभुम् उपहन्ति ( नाशयति ) । तथाहि तरुशाखान्तनिघर्षजः ( तरुशाखानां परस्परघर्षणोत्थः ) अनलः ( अग्निः ) भूधरं ( पर्वतम् ) अखिलं समग्रं यथा स्यात् तथा ) हिनस्ति हि नाशयति खलु, दहत्येवेत्यर्थः ) ।

समासः—अन्तःप्रकृतिप्रकोपजः = अन्तः ( मध्यगताः, अन्तरङ्गाः ) प्रकृतयः, तासां प्रकोपः, तस्मात् जातः । "अन्तः स्वीकारमध्ययो" रिति मेदिनी । "प्रकृतिर्गुणसाम्ये स्यादमात्यादिस्वभावयो"रिति मेदिनी । तरुशाखान्तनिघर्षजः = ( अन्तशब्दोऽत्र स्वरूपवचनः, तथा च मेदिनी "अन्तः स्वरूपे नाशेना नन्त्री शेषेऽन्तिके त्रिषु" इति ) शाखानाम् अन्तानि शाखान्तानि ( शाखा एव इत्यर्थः ) तरूणां शाखान्तानि तरुशाखान्तानि, तेषां निघर्षः, तस्मात् जातः ।

व्या०—उपहन्ति = उप-हन + लट् + झि। अखिलम् = क्रियाविशेषणं भूधरविशेषणं वा । हिनस्ति = हिंसि + लट् ।

वाच्य—अन्तःप्रकृतिप्रकोपजेन अणुना विग्रहेण प्रभुः उपहन्यते। तरुशाखान्तनिघर्षजेन अनलेन भूधरः हिंस्यते।

सरलार्थः—अमात्यादीनामन्तरङ्गानां विरागेण महतोऽपि प्रभोर्नाश एव भवति। यथा भूधराङ्गसम्भृतानां भूरुहाणां शाखाघर्षणसमुत्थेन अग्निना समग्रो भूधर एव दह्यते तद्वत् ॥ ५१ ॥

तथापि कथं वर्द्धमानः शत्रुरुपेक्ष्येत इत्याशङ्क्य दुर्विनीतत्वात् उपेक्ष्य इत्याह—

मतिमान्विनयप्रमाथिनः
समुपेक्षेत समुन्नतिं द्विषः।
सुजयः खलु तादृगन्तरे
विपदन्ता ह्यविनीतसम्पदः ॥ ५२ ॥

अन्वयः—मतिमान् विनयप्रमाथिनः द्विषः समुन्नतिं समुपेक्षेत। तादृक् अन्तरे सुजयः खलु। हि अविनीतसम्पदः विपदन्ताः।

मतिमानिति ॥ मतिमान्प्राज्ञः। विनयं प्रमथ्नातीति विनयप्रमाथिनो दुर्विनीतस्य द्विषः समुन्नतिं वृद्धिं समुपेक्षेत। उपेक्षाया फलमाह—तादृगविनीतोऽन्तरे क्वचिद्रन्ध्रे सुजयः सुखेन जेतुं शक्यः खलु। हि यस्मादविनीतसम्पदो विपदन्ता अनर्थोदर्का इत्यर्थः ॥

सुबो०—मतिमान् (बुद्धिमान् जनः) विनयप्रमाथिनः (दुर्विनीतस्य) द्विषः (शत्रोः) समुन्नतिं (वृद्धिं) समुपेक्षेत (न आद्रियेत)। तादृक् (तादृशो दुर्विनीतः) अन्तरे (कस्मिंश्चित् छिद्रे) सुजयः (सुखेन जेतुं शक्योभवति) खलु (निश्चितम्)। हि (यतः) अविनीतसम्पदः (दुर्विनीतानां सम्पत्तयः) विपदन्ताः (विपद्रूपेण परिणता भवन्ति)। मतिमानित्यत्र नयवानिति पाठान्तरम्, नीतिज्ञ इत्यर्थः।

समासः—विनयप्रमाथिनः = विनयं प्रमथ्नाति ( नाशयति ) यः तस्य ( णिनिप्रत्ययः ) । विपदन्ताः = विपत् अन्तः ( शेषः ) यासां ताः । अविनीतसम्पदः = न विनीतः अविनीतः, तस्य सम्पदः ।

व्या०—समुपेक्षेत = सम्-उप-ईक्ष + विधिलिङ् । अन्तरे = "अन्तरमवकाशावधिपरिधानान्तर्द्विभेदतादर्थ्ये । छिद्रात्मीयविना बहिरवसरमध्ये-ऽन्तरात्मनि च ॥" इत्यमरः ।

वाच्य—मतिमता द्विषः समुन्नतिः····समुपेक्ष्येत तादृशा सुजयेन भूयते । अविनीतसम्पद्भिः विपदन्ताभिः भूयते····॥ ५२ ॥

कथं दुर्विनीतस्य शत्रोः सुजयत्वमित्याशङ्क्य भेदजर्जरितत्वादित्याह—

लघुवृत्तितया भिदां गतं
बहिरन्तश्च नृपस्य मण्डलम् ।
अभिभूय हरत्यनन्तरः
शिथिलं कूलमिवापगारयः ॥ ५३ ॥

अन्वयः—लघुवृत्तितया बहिः अन्तः च भिदां गतं नृपस्य मण्डलम्, अनन्तरः आपगारयः शिथिलं कूलम् इव अभिभूय हरति लघ्विति ॥ लघुवृत्तितया स्वस्य दुर्वृत्तरूपतया बहिर्मित्रादिजनपदेष्वन्तरमात्यादिषु च भिदां भेदं गतम् । 'पिद्भिदादिभ्योऽङ्' इत्यङ्प्रत्ययः । नृपस्य मण्डलं राष्ट्रमनन्तरः सन्निहितो जिगीषुरापगारयो नदीवेगः शिथिलमन्तर्भेदजर्जरं कूलमिवाभिभूयाक्रम्य हरति

सुबो०—लघुवृत्ततया ( स्वस्य दुर्वृत्ततया ) बहिः ( जनपदेषु ) अन्तः ( पुरे ) च भिदां गतं ( भेदं प्राप्तं ) नृपस्य ( राज्ञः ) मण्डलम् ( राष्ट्रम् ) अनन्तरः ( सन्निहितः जिगीषुः ) आपगारयः ( नदीवेगः ) शिथिलं ( बहिर्जलाघातेन अन्तर्जलप्रवेशेन च जर्जरं ) कूलं ( तीरम् ) इव अभिभूय ( आक्रम्य ) हरति ( बलात् गृह्णाति ) ।

समासः—लघुवृत्ततया = लघु ( नीचं ) वृत्तं ( चरितं ) यस्य स लघुवृत्तः, तस्य भावः तत्ता तया । लघुवृत्तितयेति पाठो न मनोरमः, वृत्तिशब्दस्य चरितार्थेऽनभिधानात् । आपगारयः = अपां निवासः आपः समुद्रः ( तस्य निवासः, इत्यण् ), तं गच्छतीति आपगा, यद्वा अपां समूहः आपम् ( 'तस्य समूहः, इत्यण्' ) तेन गच्छतीति आपगा नदी, तस्या रयः ( वेगः ) । 'स्रोतस्वती द्वीपवती सुवन्ती निम्नगापगा' इति नदीपर्य्याये अमरः । 'रहस्तरसी तुरयः स्यदः । जवोऽथ' इत्यमरः ( जवो-वेगः ) ।

व्या०—नृपस्येत्यस्य लघुवृत्तितयेति मण्डलमिति चोभयत्रान्वयः ।

वाच्य—आपगारयेण कूलमिव अनन्तरेण भिदां गतं मण्डलं हीयते ।

सरलार्थः—दुर्विनीतस्य नृपस्य जनपदगतं पुरगतं च राष्ट्रं भेदमुपगतं बुद्ध्वा सन्निहितो जिगीषुराक्रम्य हर्त्तुं शक्नोति ॥ ५३ ॥

अनुशासतमित्यनाकुलं
नयवर्त्माकुलमर्जुनाग्रजम् ।
स्वयमर्थ इवाभिवाञ्छित-
स्तमभीयाय पराशरात्मजः ॥ ५४ ॥

अन्वयः—इति आकुलम् अर्जुनाग्रजं नयवर्त्म अनाकुलम् अनुशासतं तं पराशरात्मजः स्वयम् अभिवाञ्छितः अर्थः इव अभीयाय ।

अन्विति ॥ इतीत्थमाकुलमरिनिकारस्मरणात्क्षुभितमर्जुनाग्रजं भीमसेनं नयवर्त्म नीतिमार्गमनाकुलमसङ्कीर्णं यथा तथानुशासत-मुपदिशन्तम् । 'जक्षित्यादयः षट्' इत्यभ्यस्ताच्छतुर्नुमभावः । तं युधिष्ठिरं पराशरात्मजो वेदव्यासः । स्वयमभिवाञ्छितोऽर्थ इव । साक्षान्मनोरथ इवेत्युत्प्रेक्षा अभीयाय प्राप्तः ॥

सुबो०—इति ( उक्तप्रकारेण ) आकुलं ( क्षुभितम् ) अर्जुनाग्रजं ( भीमं ) नयवर्त्म ( नीतिमार्गम् ) अनाकुलं ( विशदरूपेण ) अनुशासतम् ( उपदिशन्तं ) तं ( युधिष्ठिरं )

पराशरात्मजः ( पराशरस्य मुनेः पुत्रः वेदव्यासः ) स्वयम् साक्षात् अभिवाञ्छितः अर्थः ( अभीष्टविषयः ) इव अभीयाय ( अभ्याजगाम ) ।

समासः—नयवर्त्म = नयस्य वर्त्म तत् । अर्जुनाग्रजम् = अग्रे जातः अग्रजः, अर्जुनस्य अग्रजः तम् । पराशरात्मजः = पराशरस्य आत्मजः ।

व्या० —अनुशासतम् = अनु-शास + शतृ । अभीयाय = अभि-इ-लिट् ।

वाच्य—इति अनुशासत् सः अभिवाञ्छितेन अर्थेन इव पराशरात्मजेन अभीये ।

सरलार्थः—यदा युधिष्ठिरो भीमम् एवम् उपदिशतिस्म, तदा युधिष्ठिरस्य मूर्त्तिमान्मनोरथ इव वेदव्यासो यदृच्छया तत्र प्राप्तः ॥ ५४ ॥

मधुरैरवशानि लम्भय-
न्नपि तिर्यञ्चि शमं निरीक्षितैः ।
परितः पटु बिभ्रदेनसां
दहनं धाम विलोकनक्षमम् ॥ ५५ ॥
सहसोपगतः सविस्मयं
तपसां सूतिरसूतिरापदाम् ।
ददृशे जगतीभुजा मुनिः
स वपुष्मानिव पुण्यसञ्चयः ॥ ५६ ॥

अन्वयः—मधुरैः निरीक्षितैः अवशानि तिर्य्यञ्चि शमं लङ्घयन्, परितः पटु एनसां दहनम् अपि विलोकनक्षमं धाम बिभ्रत्, सहसा उपगतः, तपसां सूतिः आपदाम् असूतिः सः मुनिः वपुष्मान् पुण्यसञ्चयः इव जगतीभुजा सविस्मयं ददृशे ।

मधुरैरिति ॥ मधुरैः शान्तैर्निरीक्षितैरवलोकनैः नपुंसके भावे क्तः । न विद्यते वशमायत्तत्वं येषां तान्यवशानि प्रतिकूलानि ।

'वशमायत्ततायां च इति विश्वः । तिर्यञ्चि मृगपक्ष्यादीनि शमं शान्तिं लम्भयन्प्रापयन् । 'लभेश्च' इति नुमागमः । 'गत्यर्थ—' इत्यादिना द्विकर्मकत्वम् । परितः पटूज्ज्वलमेनसाम् । दह्यतेऽनेनेति दहनं निवर्तकं तथापि विलोकनक्षमं दर्शनीयम् । वह्न्यादिविलक्षणमिति भावः । धाम तेजो बिभ्रत् ॥ पुनः सहसोपगतोऽकस्मादागतस्तपसां सूतिः प्रभव आपदामसूतिरप्रभवः निवर्तक इति यावत् । स मुनिर्व्यासो वपुष्मान्देहधारी पुण्यसञ्चयः पुण्यराशिरिवेत्युत्प्रेक्षा । जगतीभुजा राज्ञा सविस्मयं ददृशे दृष्टः ॥

सुबो०—मधुरैः ( शान्तैः ) निरीक्षितैः ( अवलोकनैः ) अवशानि ( प्रतिकूलानि, दुर्दान्तानि तिर्य्यञ्चि ( पशुपक्ष्यादीनि सत्त्वानि ) शमं ( शान्तिं ) लम्भयन् ( प्रापयन्,—दुःस्वभावं त्याजयन् ), परितः ( सर्वतोभावेन ) पटु ( उज्ज्वलम् ) एनसां ( पापानां ) दहनं ( नाशकं सत् ) अपि विलोकनक्षमं ( दर्शनयोग्यं ) धाम ( तेजः ) बिभ्रत् ( धारयन् ), सहसा ( अकस्मात् ) उपगतः ( प्राप्तः ), तपसां सूतिः ( प्रभवः, आकर इत्यर्थः ) आपदाम् असूतिः ( अप्रभवः, निवर्त्तकः ) स मुनिः ( व्यासः ) वपुष्मान् ( मूर्त्तिमान् ) पुण्यसञ्चयः ( पुण्यसमूहः, पुण्यराशिः ) इव जगतीभुजा (राज्ञा युधिष्ठिरेण) सविस्मयं ( साश्चर्य्यं ) ददृशे (दृष्टः) ।—असूतिरापदामित्यत्र असूतिरेनसामिति पाठान्तरम् । एनसां पापानाम् ।

समासः—अवशानि = नास्ति वशम् ( आयत्तता ) येषां तानि । विलोकनक्षमम् = विलोकने क्षमं तत् । सविस्मयम् = विस्मयेन सह वर्तमानं यथा स्यात् तथा । जगतीभुजा = जगतीं ( पृथिवीं ) भुनक्ति ( पालयति ) यः तेन । 'जगती जगतिच्छन्दोविशेषेऽपि क्षितावपि इत्यमरः । पुण्यसञ्चयः = पुण्यानां सञ्चयः । 'समूह निवहव्यूह'''' वार संघातसञ्चयाः, इत्यमरः ।

व्या०—लम्भयन् = लभ + णिच् + शतृ । तिर्य्यञ्चि = तिरोऽञ्चन्ति

इति तिरस्+अञ्च+क्विप् 'तिरसस्तिर्य्यलोपे' इति तिरिरादेशः, तिर्य्यच्-शब्दात् नपुंसके द्वितीयाबहुवचनम्। मनुष्येतरे प्राणिनास्तिर्य्यच् शब्देनोच्यन्ते; अत्र सामान्यत्वात् नपुंसकत्वम्। निरीक्षितैः=निर्-ईक्ष+भावे क्तः। बिभ्रत्=भृ+शतृ। दहनम्=दह्यते अनेन इति दह+करणे ल्युट्। सूतिः=सूयते अस्मिन् इति सू+अधिकरणे क्तिन्। ददर्श=दृश+कर्म्मणि लिट्।

वाच्य—तिर्य्यञ्चि शमं लम्भयन्तं, धाम बिभ्रतं, सहसा उपगतं, तपसां सूतिम्। आपदाम् असूतिं, वपुष्मन्तं पुण्यसञ्चयम् इव तं मुनिं जगतीमुक् ददर्श।

सरलार्थः—तस्मिन् वने ये अशान्ताः पशुपक्षिण आसन् ते यस्य प्रशान्तदृष्टिपातैस्तत्क्षणात् शान्ता बभूवुः, यश्च तेजःपुञ्जकलेवरोऽपि सौम्यमूर्त्तिरासीत्, तं सहसागतं तपोनिधिं विपद्भञ्जनं व्यासं मूर्त्तिमन्तं पुण्यराशिमिव राजा ददर्श। ५५। ५६

अथोच्चकैरासनतः पराध्या-
दुद्यन्स धूतारुणवल्कलाग्रः।
रराज कीर्णाकपिशांशुजालः
शृङ्गात्सुमेरोरिव तिग्मरश्मिः॥ ५७॥

अन्वयः—अथ उच्चकैः पराध्यात् आसनतः उद्यन्, धूतारुणवल्कलाग्रः सः कीर्णाकपिशांशुजालः सुमेरोः शृङ्गात् (उद्यन्) तिग्मरश्मिः इव रराज।

अथेति॥ अथ दर्शनान्तरम्। उच्चकैरुन्नतात्पराध्याच्छ्रेष्ठात्। 'अर्धाद्यत्'। 'परावराधमोत्तमपूर्वाच्च इति यत्प्रत्ययः। आसनतः सिंहासनादुद्यन्नुत्तिष्ठन्नत एव धूतानि कम्पितान्यरुणानि वल्कलाग्राणि यस्य स तथोक्तः। स नृपः कीर्णं विस्तृतमाकपिशमंशुजालं यस्य स तथोक्तः। सुमेरोः शृङ्गादुद्यंस्तिग्मरश्मिरिव। रराज॥

सुबो०—अथ (व्यासस्य दर्शनानन्तरम्) उच्चकैः (उच्चात्) पराध्यात् (श्रेष्ठात्) आसनतः (कुशासनादपि सिंहासनात्

मन्यमानात् ) उद्यन् ( उत्तिष्ठन् ) अतएव धूतारुणवल्कलाग्रः ( धूतानि कम्पितानि अरुणानि रक्तवर्णानि वल्कलाग्राणि यस्य स तथोक्तः ) सः ( नृपः ) कीर्णाकपिलांशुजालः ( कीर्णं विक्षिप्तम् आकपिलम् आपिङ्गलम् अंशुजालं किरणसमूहो यस्य स तथोक्तः ) सुमेरोः ( सुवर्णमयसुमेरुपर्वतस्य ) शृङ्गात् ( शिखरात् ) उद्यन् तिग्मरश्मिः ( सूर्य्यः ) इव रराज ( शुशुभे )।—कीर्णः कपिलांशुजालैरिति पाठान्तरम्। कीर्णः व्याप्तः। श्याबः स्यात् कपिशः, इत्यमरोक्तेः कपिशांशुजाल इति पाठो न मनोरमः उपमाया असङ्गतत्वात्। वने कुशासनासीनोऽपि युधिष्ठिरो व्यासागमनजनितप्रहर्षेण पूर्ववत् स्वपुरे सिंहासनमधिरूढमात्मानं मत्वा तस्मादेवासनादुत्थितोऽहमिति मेने। —तिग्मरश्मिरित्यत्र शीतरश्मिरिति पाठान्तरम्। शीतरश्मिश्चन्द्रः।

समासः—धूतारुणवल्कलाग्रः=वल्कलस्य अग्राणि ( दशाः ), अरुणानि वल्कलाग्राणि, धूतानि अरुणवल्कलाग्राणि यस्य सः। कीर्णाकपिलांशुजालः=अंशूनां जालम् अंशुजालं कापिलम् अंशुजालम्, कपिलांशुजालं कीर्णं कपिलांशुजालं यस्य सः। 'कडारः कापिलः पिङ्गपिशङ्गौ कद्रुपिङ्गलौ' इत्यमरः। 'किरणोऽस्रमयूखांशु गभस्तिधृणिरश्मयः' इत्यमरः। 'जालं समूहआनायो गवाक्षचारकावपि' इत्यमरः। तिग्मरश्मिः=तिग्माः ( प्रखराः ) रश्मयः ( किरणाः ) यस्य सः।

व्या०—उच्चकैरित्यव्ययम्। आसनतः इत्यत्र पञ्चम्यास्तसिल्। परार्ध्यात्=परार्धे भवम् इति परार्ध+यत्। 'परार्ध्याग्रप्राग्रहर····सत्तमश्चातिशोभने' इत्यमरः। उद्यन्=उद्-इ+शतृ। रराज=राज+लिट्। कीर्ण=कृ+क्त।

वाच्य०— आसनात् उद्यतेन धूतारुणवल्कलाग्रेण तेन कीर्णाकपिलांशुजालेन तिग्मरश्मिना इव रेजे।

सरलार्थः—वेदव्यासमागतं दृष्ट्वा युधिष्ठिरः ससम्भ्रमम्

आसनादुत्थितः । तदा तस्य परिहितवल्कलाग्राणां चाञ्चल्यात् उदयकाले विकीर्णांशुजालस्य सूर्य्यस्येव शोभा बभूव ॥ ५७ ॥

अवहितहृदयो विधाय सोऽर्हा-
मृषिवदृषिप्रवरे गुरूपदिष्टाम् ।
तदनुमतमलञ्चकार पश्चात्
प्रशम इव श्रुतमासनं नरेन्द्रः ॥ ५८ ॥

अन्वयः—सः नरेन्द्रः अवहितहृदयः ( सन् ) ऋषिप्रवरे ऋषिवत् गुरूपदिष्टाम् अर्हां विधाय पश्चात् तदनुमतम् आसनम् प्रशमः श्रुतम् इव अलञ्चकार ।

अवहितेति ॥ स नरेन्द्रोऽवहितहृदयोऽप्रमत्तचित्तः सन् । ऋषिप्रवरे मुनिश्रेष्ठे । ऋषिवदृष्यर्हाम् । अर्हार्थे वतिप्रत्ययः । गुरूपदिष्टाम् । शास्त्रीयामित्यर्थः । अर्हां पूजाम् । 'गुरोश्च हलः' इत्यकारप्रत्ययः । विधाय पश्चादनन्तरं तदनुमतं तेनानुज्ञातमासनम् । प्रशमः शान्तिः श्रुतं शास्त्रश्रवणमिव । अलञ्चकार । उक्तं च—'प्रशमस्तस्य भवत्यलंक्रिया' इति । मुन्याज्ञयोपविष्टवानित्यर्थः ॥

सुबो०—सः नरेन्द्रः ( राजा युधिष्ठिरः ) अवहितहृदयः ( अप्रमत्तचित्तः सन् ) ऋषिप्रवरे ( मुनिश्रेष्ठे व्यासे ) ऋषिवत् ( ऋष्यर्हां, मुनिजनोचिताम् ) गुरूपदिष्टां ( पूर्वं गुरुमुखात् श्रुतां शास्त्रीयां, यद्वा गुरुणा तत्रत्येन धौम्येन उपदिष्टाम् तदवस्थायां यथासम्भवं निर्दिष्टाम् ) अर्हां ( पूजां, पाद्यार्घ्यासनाद्युपचारैः सत्क्रियां ) विधाय ( कृत्वा ) पश्चात् ( अनन्तरं ) तदनुमतं ( तेन व्यासेन अनुज्ञातम् ) आसनं, प्रशमः ( शान्तिः ) श्रुतं ( शास्त्रज्ञानम् ) इव अलंचकार ( शोभयामास, परिगृहीतवान् इत्यर्थः ) ।

समासः—अवहितहृदयः = अवहितं हृदयं यस्य सः । ऋषिप्रवरे = ऋषिषु प्रवरः तस्मिन् । गुरूपदिष्टाम् = गुरुणा उपदिष्टा ताम् । तदनुमतम् = तेन अनुमतं तत् ।

व्या०—अवहित = अव-धा + क्त । अर्हाम् = अर्ह ( पूजायाम् ) + अ । ऋषिवत् = ऋषि + अर्हार्थे वति ।

वाच्य—अवहितहृदयेन तेन नरेन्द्रेण तदनुमतम् आसनम् प्रशमेनैव श्रुतमिव अलञ्चक्रे ।

सरलार्थः—अथ युधिष्ठिरो यथाविधि व्यासस्य सत्कारं कृत्वा स्वदत्ते आसने तस्मिन्नुपविष्टे सति, तदनुमतिं प्राप्य स्वासने उपविवेश ॥ ५८ ॥

व्यक्तोदितास्मितमयूखविभासितोष्ठ-
स्तिष्ठन्मुनेरभिमुखं स विकीर्णधाम्नः ।
तन्वन्तमिद्धमभितो गुरुमंशुजालं
लक्ष्मीमुवाह सकलस्य शशाङ्कमूर्तेः ॥ ५९ ॥

अन्वयः—व्यक्तोदितस्मितमयूखविभासितोष्ठः विकीर्णधाम्नः मुनेः अभिमुखं तिष्ठन् सः, इद्धम् अंशुजालं तन्वन्तं गुरुं अभितः सकलस्य शशाङ्कमूर्तेः लक्ष्मीम् उवाह ।

व्यक्तेति ॥ व्यक्तोदितैः स्फुटोद्गतैः स्मितमयूखैर्विभासितावोष्ठौ यस्य स तथोक्तः । विकीर्णधाम्नो विस्तीर्णतेजसो मुनेरभिमुखं तिष्ठन् स नृपः । इद्धं दीप्तमंशुजालं तन्वन्तं गुरुं गीष्पतिम् 'गुरुर्गीष्पतिपित्रादौ' इत्यमरः । ' अभितः परितः इत्यादिना द्वितीया । अभितोऽभिमुखम् । तिष्ठत इति शेषः सकलस्य संपूर्णस्य शशाङ्कमूर्तिर्यस्य तस्येन्दोर्लक्ष्मीमुवाह वहति स्म । अत्रोपमेयस्य राज्ञ उपमानेन्दुधर्मेण लक्ष्म्याः साक्षात्सबन्धासंभवात्तत्सदृशीं लक्ष्मीमिवेति प्रतिबिम्बकरणाक्षेपादसंभवद्वस्तुसंबन्धात्पदार्थवृत्तिर्निदर्शनालंकारः । तदुक्तम्—'प्रतिबिम्बस्याकरणं सम्भवता यत्र वस्तुयोगेन । तत्साम्यमसंभवता निदर्शना सा द्विधाभिमता ॥ ' इति ॥

इति श्रीमहामहोपाध्यायकोलाचमल्लिनाथसूरिविरचितायां किरातार्जुनीयकाव्यव्याख्यायां घण्टापथसमाख्यायां द्वितीयः सर्गः समाप्तः ।

सुबो०—व्यक्तोदितस्मितमयूखविभासितोष्ठः ( व्यक्तं विस्पष्टम् उद्गतैः उत्थितैः स्मितमयूखैः मृदुहास्यकिरणैः विभासितौ दीप्तौ ओष्ठौ यस्य स तथोक्तः सन् ) विकीर्णधाम्नः ( विक्षिप्ततेजसः ) मुनेः ( व्यासस्य ) अभिमुखं, ( सम्मुखे ) तिष्ठन् ( वर्त्तमानः ) सः ( युधिष्ठिरः ) इद्धं ( दीप्तम् ) अंशुजालं ( किरणसमूहं ) वितन्वन्तं ( विस्तारयन्तं ) गुरुं ( बृहस्पतिम् ) अभितः ( सम्मुखे वर्त्तमानस्य ) सकलस्य ( पूर्णस्य ) शशाङ्कमूर्तेः ( चन्द्रस्य ) लक्ष्मीं ( शोभां ) उवाह ( धारयामास ) मृगाङ्कमूर्तेरितिपाठान्तरम् ।

अयं गुरुचन्द्रयोगः कदाचित् पौर्णमास्यामेव घटते । अतः "सकलस्य शशाङ्कमूर्ते" रित्युक्तम् । सा च पूर्णिमा महती-तिसंज्ञां लभते । यथा महाकार्तिक्यादिः ।

तथाच विष्णुः—

"दृश्येते सहितौ यस्यां दिवि चन्द्रबृहस्पती । पौर्णमासी तु महती ज्ञेया संवत्सरे तु सा" ॥ इति । राजमार्तण्डोऽपि माससंज्ञे यदा ऋक्षे चन्द्रः सम्पूर्णमण्डलः । गुरुणा याति संयोगं सा तिथिर्महती स्मृता ॥" इति ॥

समासः—व्यक्तोदितस्मितमयूखविभासितोष्ठः = व्यक्तं उदिता व्यक्तोदिताः, स्मितस्य मयूखाः स्मितमयूखाः, व्यक्तोदिताः स्मितमयूखाः व्यक्तोदितस्मितमयूखाः तैः विभासितौ ओष्ठौ यस्य सः । विकीर्णधाम्नः = विकीर्णं धाम यस्य तस्य । "गृहदेहत्विट् प्रभावाधामानि" -इत्यमरः । अंशुजालं = अंशूनां जालं तत् । शशाङ्कमूर्तेः = शशः ( शशकाकृतिः ) अङ्कः ( चिन्हं ) यस्याः सा शशाङ्का, शशाङ्का मूर्तिर्यस्य तस्य ।

व्या०—अभिमुखं = मुखमभिगतं तत् यथास्यात्तथा । तन्वन्तम् = तन + शतृ । इद्धम् = इन्ध + क्त । गुरुम् = अभितः शब्दयोगे द्वितीया । उवाह = वह + लिट् ।

वाच्य—व्यक्तोदितस्मितमयूखविभासितोष्ठेन मुनेः अभिमुखं तिष्ठता तेन लक्ष्मीः ऊहे ।

सरलार्थः—यथा बृहस्पतिग्रहस्य अभिमुखं तिष्ठतः पूर्णचन्द्रस्य शोभा भवति तथा व्यासस्याभिमुखमुपविष्टस्य युधिष्ठिरस्य शोभा बभूव ॥ ५० ॥

इति श्रीपाठकोपाव्ह गौरीनाथशर्मविरचितसुबोधिन्याख्यया व्याख्यया सरलार्थया च सहिते किरातार्जुनीये महाकाव्ये द्वितीयः सर्गः ॥

# तृतीयः सर्गः ।

अथ त्रिभिर्मुनिं विशिषँश्चतुर्भिः कलापकमाह—

ततः शरच्चन्द्रकराभिरामै-
रुत्सर्पिभिः प्रांशुमिवांशुजालैः ।
बिभ्राणमानीलरुचं पिशङ्गी-
र्जटास्ताडित्वन्तमिवाम्बुवाहम् ॥ १ ॥

प्रसादलक्ष्मीं दधतं समग्रां
वपुःप्रकर्षेण जनातिगेन ।
प्रसह्य चेतःसु समासजन्त-
मसंस्तुतानामपि भावमार्द्रम् ॥ २ ॥

अनुद्धताकारतया विविक्तां
तन्वन्तमन्तःकरणस्य वृत्तिम् ।
माधुर्यविस्रम्भविशेषभाजा
कृतोपसंभाषमिवेक्षितेन ॥ ३ ॥

धर्मात्मजो धर्मनिबन्धिनीनां
प्रसूतिमेनःप्रणुदां श्रुतीनाम् ।
हेतुं तदभ्यागमने परीप्सुः
सुखोपविष्टं मुनिमाबभाषे ॥ ४ ॥

अन्वयः—ततः धर्म्मात्मजः शरच्चन्द्रकराभिरामैः उत्सर्पिभिः अंशुजालैः प्रांशुम् इव, आनीलरुचं, पिशङ्गीः जटाः बिभ्राणं

तड़ित्वन्तम् अम्बुवाहम् इव, समग्रां प्रसादलक्ष्मीं दधतं, जनातिगेन वपुः प्रकर्षेण असंस्तुतानाम् अपि चेतःसु आर्द्रं भावं प्रसह्य समासजन्तम्, अनुद्धताकारतया अन्तःकरणस्य वृत्तिं पूतां तन्वन्तं, माधुर्य्यविस्रम्भविशेषभाजा ईक्षितेन कृतोपसंभाषम् इव, धर्म्मनिबन्धिनीनाम् एनःप्रणुदां श्रुतीनां प्रसूतिं, सुखोपविष्टं मुनिं तदभ्यागमने हेतुं परीप्सुः (सन्) आबभाषे।

तत इति॥ उपवेशानन्तरं धर्मात्मजो युधिष्ठिरः शरच्चन्द्रकराभिरामैः। आह्लादकैरित्यर्थः। उत्सर्पिभिरूर्ध्वं प्रसारिभिरंशुजालैः प्रांशुमुन्नतमिव स्थितमित्युत्प्रेक्षा। पुनरानीलरुचं कृष्णवर्णं पिशङ्गीः पिङ्गलवर्णाः। गौरादित्वान्ङीष्। जटा बिभ्राणं धारयन्तमत एव तड़ित्वन्तं विद्युद्युक्तमम्बुवाहमिव स्थितमित्युत्प्रेक्षा॥

प्रसादेति॥ पुनः समग्रां संपूर्णां प्रसादः सौम्यता तस्य लक्ष्मीं संपदं दधतम्। अत एव जनमतिगच्छतीति जनातिगेन लोकातिशायिना। 'अन्येष्वपि दृश्यते' इति डप्रत्ययः। वपुःप्रकर्षेणाकारसंपदासंस्तुतानामपरिचितानामपि। व्यासोऽयमित्यजानतामपीत्यर्थः। 'संस्तवः स्यात्परिचयः' इत्यमरः। चेतःसु चित्तेष्वार्द्रं स्नेहार्द्रं भावमभिप्रायं प्रसह्य बलात्समासजन्तम्। लगयन्तमिति यावत्। 'दंशसञ्जस्वञ्जां शपि' इत्युपधायालोपः। प्रसन्नाकारेषु सर्वोऽपि स्निह्यतीति भावः॥

अनुद्धतेति॥ पुनरनुद्धताकारतया शान्ताकारत्वेन लिङ्गेनान्तःकरणस्य वृत्तिं विविक्तां पूताम्। शान्तामिति यावत्। 'विविक्तं पूतविजनौ' इत्यमरः। तन्वन्तं प्रकटयन्तम्। आकृतिरेवास्य चित्तशुद्धिं कथयतीत्यर्थः। पुनर्माधुर्यं निसर्गसौम्यता विस्रम्भो विश्वासः। 'समौ विस्रम्भविश्वासौ' इत्यमरः। तयोर्विशेषमतिशयं भजतीति तथोक्तेनेक्षितेन दर्शनेनैव कृतोपसंभाषा येन तमिवेत्युत्प्रेक्षा। दृष्टिविशेषेणैवोपसंभाषमाणमिव स्थितमित्यर्थः। काशिकायां तु 'उपसंभाषणमुमसान्त्वनम्' इति भाषणादिसूत्रे॥

धर्मेति॥ पुनर्धर्मं निबन्धनतीति धर्मनिबन्धिनीनामग्निहोत्रादिधर्मप्रतिपादिकानाम्। क्विप्। श्रुतीनां वेदानाम्। 'श्रुतिः स्त्री वेद

आम्नायः' इत्यमरः, प्रसूतिं प्रभवं सुखेनोपविष्टं मुनिं तदभ्यागमने तस्य मुनेरागमने हेतुं परीप्सुर्जिज्ञासुः । आप्नोतेः सन्नन्तादुप्रत्ययः 'आप्ज्ञप्यृधामीत्' इतीकारः । 'अत्र लोपोऽभ्यासस्य इत्यभ्यास लोपः । आबभाषे उवाच ॥

सुबो—ततः ( उपवेशनान्तरं ) धर्म्मात्मजः ( धर्म्मपुत्रो युधिष्ठिरः ) शरच्चन्द्रकराभिरामैः ( शारदशशधरकरसदृशसुन्दरैः, प्रत्याह्लादकैरित्यर्थः ) उत्सर्पिभिः ( ऊर्द्ध्वं प्रसारिभिः ) अंशुजालैः ( किरणसमूहैः ) प्रांशुम् ( उन्नतम् ) इव, आनीलरुचं (कृष्णवर्णं) पिशङ्गीः (पिङ्गलवर्णाः) जटाः (सटाः) बिभ्राणं (धारयन्तम्) अतएव तड़ित्वन्तं ( विद्युद्विशिष्टम् ) अम्बुवाहं ( मेघम् ) इव, पुनः समग्रां ( संपूर्णां ) प्रसादलक्ष्मीं ( प्रसादः सौम्यता तस्य लक्ष्मीं सम्पदं ) दधतं ( धारयन्तम् ) अतएव जनातिगेन ( लोकातिशायिना, असाधारणेन ) वपुःप्रकर्षेण ( देहश्रिया ) असंस्तुतानाम् ( अपरिचितानाम्, व्यासोऽयमित्यजानतां जनानाम् ) अपि, चेतःसु ( मनःसु ) आर्द्रं ( स्नेहमयं ) भावम् ( अभिप्रायं ) प्रसह्य ( बलात् ) समासजन्तं ( लगयन्तं, प्रवर्त्तयन्तम् ), पुनः अनुद्धताकारतया ( प्रशान्ताकृतितया ) अन्तःकरणस्य वृत्तिं ( मनोभावं ) विविक्तां ( पवित्रं, प्रशान्तां ) तन्वन्तं ( प्रकटयन्तं ), माधुर्य्यविस्रम्भविशेषभाजा ( माधुर्य्यं सौम्यभावः विस्रम्भो विश्वासः तयोः विशेषम् अतिशयं भजतीति तेन, प्रसादविश्वास सूचकेन ) ईक्षितेन ( अवलोकनेन ) कृतोपसंभाषं ( संभाषणं कुर्वन्तम् ) इव, पुनः धर्म्मनिबन्धिनीनां ( धर्म्मप्रतिपादिकानाम् ) एनःप्रणुदां ( पापनाशिनीनां ) श्रुतीनां ( वेदानां ) प्रसूतिं ( प्रभवं, विभागकर्त्तारं ) सुखेन ( स्वच्छन्देन ) उपविष्टम् ( आसीनं ) मुनिं ( व्यासं ) तदभ्यागमने ( तस्य मुनेः आगमने ) हेतुं ( कारणं ) परीप्सुः ( ज्ञातुमिच्छुः सन् ) आबभाषे ( उवाच ) ।

समासः—शरच्चन्द्रकराभिरामैः = शरदः चन्द्रः, तस्य कराः, ते इव अभिरामाः तैः। आनीलरुचम् = आ नीला रुक् यस्य तम्। आनीलरुचिमिति पाठान्तरम्। 'स्युः प्रभा रुक् रुचिस्त्विड्भा भाश्छविद्युतिदीप्तयः' इत्यमरः। अम्बुवाहम् = अम्बु जलं वहतीति अम्बु-वह + कर्म्मण्यण्। 'अब्भ्रं मेघो वारिवाहः स्तनयित्नुर्बलाहकः' इत्यमरः। प्रसादलक्ष्मीम् = प्रसादस्य लक्ष्मीः ताम्। जनातिगेन = जनम् अतिगच्छति यः स तेन। असंस्तुतानाम् = सम्-स्तु + भावे क्तः, नास्ति संस्तुतं (विदःयासस्य परिचयः) येषां तेषाम्। 'संस्तवः स्यात् परिचयः' इत्यमरः। अनुद्धताकारतया = न उद्धतः अनुद्धतः, अनुद्धतः आकारो यस्य सः अनुद्धताकारः, तस्य भावः तत्ता तया। माधुर्य्यविस्रम्भविशेषभाजा = माधुर्य्यं च विस्रम्भश्च. तयोः विशेषः, तं भजति यत् तत् माधुर्य्यविस्रम्भविशेषभाक् तेन (भज् + णिव)। 'समौ विस्रम्भविश्वासौ' इत्यमरः। कृतोपसंभाषम् = कृता उपसंभाषा येन तम्। धर्म्मात्मजः = धर्म्मस्य आत्मजः सः। धर्म्मनिबन्धिनीनाम् = धर्म्मं निबध्नन्ति (प्रतिपादयन्ति) याः ताः धर्म्मनिबन्धिन्यः तासाम्। एनःप्रणुदाम् = एनांसि (पापानि) प्रणुदन्ति याः ताः एनःप्रणुदः तासाम् (प्र-नुद + क्विप्)। तदभ्यागमने = तस्य अभ्यागमनं तस्मिन्। सुखोपविष्टम् = सुखेन उपविष्टः तम्।

व्या०—बिभ्राणम् = भृ + शानच्। दधतम् = धा + शतृ। समासजन्तम् = सम्-आङ्-सञ्ज + शतृ। परीप्सुः = परि-आप + सन् + उ। आबभाषे = आङ्-भाष + लिट्।

वाच्य- धर्म्मात्मजेन तदभ्यागमने हेतुं परीप्सुना अंशुजालैः प्रांशुरिव, आनीलरुक् तडित्वान् अम्बुवाह इव, पिशङ्गीः जटा बिभ्राणः, प्रसादलक्ष्मीं दधत् चेतःसु आर्द्रं भावं समासजन्, विविक्ताम् अन्तःकरणस्य वृत्तिं तन्वन्, ईचितेन कृतोपसंभाष इव श्रुतीनां प्रसूतिः सुखोपविष्टो मुनिः आबभाषे।

**सरलार्थः—युधिष्ठिरः स्निग्धतेजोमयं कृष्णावर्णं पिङ्गलवर्णं जटाधारिणं प्रसन्नमूर्तिं प्रशान्तचित्तं सुखोपविष्टं वेदव्यासं मुनिम् आगमनकारणं पप्रच्छ।**

अनाप्तपुण्योपचयैर्दुरापा
फलस्य निर्धूतरजा सवित्री ।
तुल्या भवद्दर्शनसंपदेषा
वृष्टेर्दिवो वीतबलाहकायाः ॥ ५ ॥

अन्वयः—अनाप्तपुण्योपचयैः दुरापा फलस्य सवित्री निर्धूतरजा एषा भवद्दर्शनसंपत् वीतबलाहकायाः दिवः वृष्टेः तुल्या ।

अनाप्तेति ॥ अनाप्तपुण्योपचयैरकृतपुण्यसंग्रहैर्दुरापा दुर्लभा । फलस्य सवित्री श्रेयस्करी निर्धूतरजा हृतरजोगुणा । अन्यत्र निरस्तधूलिः । रजो रजोगुणे धूलौ परागार्तवयोरपि इति शाश्वतः । एषा भवद्दर्शनसंपत्संपत्तिः । लोभ इति यावत् । संपदादिभ्यः क्विन्नो—भावार्थत्वात् । वीतबलाहकाया गतमेघाया दिव आकाशस्य संबन्धिन्या वृष्टेस्तुल्येत्युपमालंकारः । अनभ्रवृष्टिवदतर्कितोपपन्नं भवद्दर्शनं सर्वथा कस्यचिच्छ्रेयसो निदानमित्यर्थः । वारि वहतीति बलाहकः । पृषोदरादित्वात्साधुः ॥

सुबो०—अनाप्तपुण्योपचयैः ( अकृतपुण्यसंग्रहैः जनैः ) दुरापा ( दुर्लभा ) फलस्य सवित्री ( मङ्गलरूपस्य फलस्य जनयित्री ) निर्धूतरजा ( रजोगुणनाशिनी ) एषा भवद्दर्शनसंपत् ( त्वदीयदर्शनप्राप्तिः ) वीतबलाहकायाः ( मेघशून्यायाः ) दिवः ( आकाशस्य संबन्धिन्याः ) वृष्टेः ( वर्षणस्य ) तुल्या ( सदृशीभवति ) ।—विना मेघेन वृष्टिरिव अतर्कितोपपन्नेयं भवद्दर्शनप्राप्तिरिति भावः । तादृशी वृष्टिरपि अकृतपुण्यैर्दुर्लभा, फलस्य सस्यस्य प्रसवित्री, निर्धूतरजाः ( निरस्तधूलिः ) भवति ।

समासः—दुरापा = दुःखेन आप्यते । अनाप्तपुण्योपचयैः = पुण्यानां उपचयः पुण्योपचयः, न आप्तः पुण्योपचयो यैः तैः । निर्धूतरजा = निर्धूतं रजो यया सा । भवद्दर्शनसंपत् = भवतो दर्शनम्, तस्य सम्पत् (सम्प्राप्तिः) ।

वीतबलाहकायाः = वीतः ( अपगतः ) बलाहकः ( मेघः ) यस्याः तस्याः ।- 'रजः क्लीबं गुणान्तरे । आर्त्तवे च परागे च रेणुमात्रे च दृश्यते' इति मेदिनी । 'अब्भ्रं मेघो वारिवाहः स्तनयित्नुर्बलाहकः' इत्यमरः ।

व्या०—दुरापा = दुर्–आप् + कर्म्मणि खल् । सवित्री = सू + तृच् । वीत = वि–ई + क्त । बलाहकः = वारिवाहक इत्यर्थे पृषोदरादिः ।

वाच्य—दुरापया निर्धूतरजसा फलस्य सवित्र्या भवद्दर्शनसंपदा वृष्टेः तुल्यया भूयते ।

सरलार्थः—मेघोदयं विना यथाकालं सुवृष्टिरिव अभावनीयं भवद्दर्शनं मदीयं पुण्यसञ्चयं सौभाग्योदयं च सूचयति ॥ ५ ॥

अद्य क्रियाः कामदुघाः क्रतूनां
सत्याशिषः संप्रति भूमिदेवाः ।
आसंसृतेरस्मि जगत्सु जात-
स्त्वय्यागते यद्बहुमानपात्रम् ॥ ६ ॥

अन्वयः—अद्य क्रतूनां क्रियाः कामदुघाः, संप्रति भूमिदेवाः सत्याशिषः, यत् त्वयि आगते ( सति ) अस्मि आ संसृतेः जगत्सु बहुमानपात्रं जातः ।

अद्येति ॥ अद्य क्रतूनां क्रिया अनुष्ठानानि । कामान् दुहन्तीति कामदुघाः । फलदा इत्यर्थः । 'दुहः कब्घश्च' इति कप्प्रत्ययो घादेशश्च संप्रत्यद्य भूमिदेवा ब्राह्मणाः । द्विजात्यग्रजन्मभूदेववाडवाः । विप्रश्च ब्राह्मणः' इत्यमरः । सत्याशिषो जाताः । ब्राह्मणाशिषोऽद्य फलिता इत्यर्थः । यद्यतः कारणात्त्वय्यागते सति । त्वदागमनेन निमित्तेनेत्यर्थः । अस्मीत्यहमर्थेऽव्ययम् । 'अस्मीत्यस्मदर्थानुवादेऽहमर्थेऽपि इति' गणव्याख्याने । 'दासे कृतागसि भवत्युचितः प्रभूणां पादप्रहार इति सुन्दरि नास्मि दूये' इति प्रयोगाच्च । आससृतेरासंसारात् । यावत्संसारमित्यर्थः । अभिविधावाङ्विकल्पादसमासः । जगत्सु बहुमानपात्रं बहुयोग्यताभाजनं जातः सकलसत्कर्मफलभूतं त्वदागमनं येन मे जगन्मान्यतेति भावः ॥

सुबो०—अद्य क्रतूनां ( यज्ञानां ) क्रियाः ( अनुष्ठानानि ) कामदुघाः ( अभीष्टफलप्रदाः जाता इति शेषः । संप्रति ( अद्य ) भूमिदेवाः ( ब्राह्मणाः ) सत्याशिषः ( अमोघाशीर्वादाः जाताः इति शेषः ) । यत् ( यतः ) त्वयि आगते ( अत्र उपस्थिते सति ) अस्मि ( अहं ) आ संसृतेः ( यावत् संसारं ) जगत्सु ( भुवनेषु ) बहुमानपात्रं ( समधिकसम्मानभाजनं ) जातः ( अभवम् ) ।—आ संहृतेरिति पाठान्तरम् । संहृतिः प्रलयः ।

समासः—कामदुघाः = कामान् दुहन्ति ( प्रपूरयन्ति ) याः ताः ( दुह + कप् घकारादेशश्च ) सत्याशिषः = सत्याः आशिषः येषां ते । भूमिदेवा = भूमेः देवाः । बहुमानपात्रम् = बहुः मानः, तस्य पात्रम् । 'योग्यभाजनयोः पात्रम्' इत्यमरः ।

व्या०—आ संसृतेः = 'पञ्चम्यपाङ्परिभिः' इति आङ्योगे पञ्चमी । 'आङ् मर्य्यादाभिविध्योः' इति वैकल्पिकः समासाभावः, समासे तु आ संसृति । आ संसृतेरित्यत्र अभिविधौ आङ्, यावत् संसारस्तिष्ठति तावत्; आ संहृतेरिति पाठे तु मर्य्यादायाम् आङ्-प्रलयात् पूर्वपर्य्यन्तमित्यर्थः ।

वाच्य—क्रियाभिः कामदुघाभिः जातम् । भूमिदेवैः सत्याशीर्भिः जातम् । मया बहुमानपात्रेण जातम् ।

सरलार्थः—अत्र भवदागमनात् अद्य मे सर्वाः यज्ञक्रियाः सफलाः, अद्य मां प्रति ब्राह्मणप्रयुक्ता आशिषश्च सफलाः । यतोऽहम् साधुसम्मतो युधिष्ठिर इति कृत्वा आप्रलयं जगतां बहुमानास्पदं संवृत्तः ॥ ६ ॥

श्रियं विकर्षत्यपहन्त्यघानि
श्रेयः परिस्तौति तनोति कीर्तिम् ।
संदर्शनं लोकगुरोरमोघं
तवात्मयोनेरिव किं न धत्ते ॥ ७ ॥

अन्वयः—आत्मयोनेः इव लोकगुरोः तव अमोघं सन्दर्शनं श्रियं विकर्षति, अघानि अपहन्ति, श्रेयः परिस्तौति, कीर्त्तिं तनोति, किं न धत्ते।

श्रियमिति॥ आत्मयोनेर्ब्रह्मण इव लोकगुरोस्तवामोघमविफलं संदर्शनं श्रियं विकर्षत्याकर्षति। अघानि दुःखान्यपहन्ति। 'अंहोदुःखव्यसनेष्वघम्' इत्यमरः। श्रेयः पुरुषार्थं परिस्तौति स्तवति। कीर्तिं च तनोति। किं बहुना किं न धत्ते किं किं न करोति। सर्वं करोतीत्यर्थः॥

सुबो०—आत्मयोनेः (ब्रह्मणः) इव लोकगुरोः (सर्वलोकपूज्यस्य), तव अमोघम् (अव्यर्थम्, अविफलं) सन्दर्शनम् (अवलोकनम्, त्वदीयदर्शनलाभ इत्यर्थः) श्रियं (सम्पदं) विकर्षति (आकृष्य आनयति), अघानि (पापानि) अपहन्ति (नाशयति), श्रेयः (मङ्गलं) परिस्तौति (स्तरति, ददातीत्यर्थः), कीर्तिं (यशः) तनोति (विस्तारयति), (किं बहुनोक्तेन) किं न धत्ते (किं प्रार्थितं वस्तु न ददाति? अपि तु सर्वमेव ददाति इत्यर्थः)।

समासः—लोकगुरोः—लोकानां गुरुः तस्य। आत्मयोनेः=आत्मा एव योनिर्यस्य तस्य।

व्या०—विकर्षति=वि-कृष+लट्। अपहन्ति=अप-हन+लट्। परिस्तौति=परि-स्तु+लट्। तनोति=तन+लट्। तव=कर्म्मणि षष्ठी। धत्ते=धा+लट्। 'डु धाञ् धारणपोषणयोः दानेऽप्येके'।

वाच्य०—तव अमोघेन दर्शनेन श्रीः विकृष्यते, अपहन्यन्ते अघानि, श्रेयः परिस्तूयते, कीर्त्तिः तन्यते, किं न धीयते।

सरलार्थः—अव्यर्थं खलु भवतो दर्शनम्। तेन यशोमङ्गलसम्पत्पापक्षयादीनि सर्वाण्येवाभीष्टानि सम्पत्स्यन्ते॥ ७॥

श्च्योतन्मयूखेऽपि हिमद्युतौ मे
ननिर्वृतं निर्वृतिमेति चक्षुः ।
समुज्झितज्ञातिवियोगखेदं
त्वत्सन्निधावुच्छ्वसतीव चेतः ॥ ८ ॥

अन्वयः—श्च्योतन्मयूखे हिमद्युतौ अपि न निर्वृतं मे चक्षुः त्वत्सन्निधौ निर्वृतिम् एति । चेतः समुज्झितज्ञातिवियोगखेदं ( सत् ) उच्छ्वसति इव ।

श्च्योतदिति ॥ हे भगवन्, श्च्योतन्मयूखे सुधास्राविकरे हिमद्युताविन्दावपि विषये ननिर्वृतम् । नञर्थस्य नशब्दस्य सुप्सुपेति समासः । मे चक्षुस्त्वत्सन्निधौ निर्वृतिं सुखमेति । तथा चेतश्च समुज्झितज्ञातिवियोगखेदं त्यक्तबन्धुविरहदुःखं समुच्छ्वसतीव प्राणपरोधेन प्राणितीवेत्युत्प्रेक्षा । पूर्वार्धे तु निर्वृतिकारणे सत्यपीन्दावनिर्वृतिकथनाद्विशेषोक्तिः । तदुक्तम्—'तत्सामग्र्यामनिर्वृत्तिर्विशेषोक्तिर्निगद्यते' इति ॥

सुबो०—श्च्योतन्मयूखे ( अमृतस्राविकिरणे ) हिमद्युतौ ( चन्द्रे ) अपि ननिर्वृतं ( न सुखितं ) मे ( मम ) चक्षुः (नेत्रं) त्वत्सन्निधौ ( तव सकाशे ) निर्वृतिं ( सुखम् ) एति (प्राप्नोति) चेतः ( मदीयं मनश्च ) समुज्झितज्ञातिवियोगखेदं ( सन्त्यक्तज्ञातिविरहजनितदुःखं सत्, ज्ञातिविरहदुःखं परित्यज्य इत्यर्थः ) उच्छ्वसति ( उज्जीवति ) इव ।

समासः—श्च्योतन्मयूखे = श्च्योतन्तः ( अमृतं चरन्तः ) मयूखाः ( किरणाः ) यस्य तस्मिन् ( श्च्युतिर् चरणे शतृ ) । हिमद्युतौ = हिमा ( शीतला ) द्युतिर्यस्य तस्मिन् । समुज्झितज्ञातिवियोगखेदम् = ज्ञातीनां वियोगः, तेन खेदः; समुज्झितः ज्ञातिवियोगखेदः येन तत् ( सम्-उद्झ + क्त ) । त्वत्सन्निधौ = तव सन्निधिः तस्मिन् ।

व्या०—एति = इ + लट् । उच्छ्वसति = उद्-श्वस + लट् ।

वाच्य०—मम नर्निर्वृतेन चक्षुषा निर्वृतिः ईयते, चेतसा समुज्झित-ज्ञातिवियोगखेदेन उच्छ्वस्यते।

सरलार्थः—सर्वजनाह्लादकरं चन्द्रं दृष्ट्वापि मे तादृश आनन्दो न जायते यथा भवन्तं दृष्ट्वा भवति। मदीयं मनश्च ज्ञातिगणविरहेण म्रियमाणं सदपि इदानीं तद्विरहदुःखं परित्यज्य उज्जीवतीव ॥ ८ ॥

निरास्पदं प्रश्नकुतूहलित्व-
मस्मास्वधीनं किमु निःस्पृहाणाम्।
तथापि कल्याणकरीं गिरं ते
मां श्रोतुमिच्छा मुखरीकरोति ॥ ९ ॥

अन्वयः—प्रश्नकुतूहलित्वं निरास्पदम्। निःस्पृहाणाम् अस्मासु अधीनं किमु। तथापि कल्याणकरीं ते गिरं श्रोतुम् इच्छा मां मुखरीकरोति।

निरास्पदमिति ॥ प्रश्नकुतूहलित्वं निरास्पदम्। त्वदागमनप्रयोजनप्रश्नो निरास्पद इत्यर्थः। 'आस्पदं प्रतिष्ठायाम्' इति निपातः। प्रश्नानवकाशे हेतुमाह- निःस्पृहाणाम्। युष्मादृशामित्यर्थः। अस्मास्वधीनमायत्तं किमु। न किञ्चिदस्मत्तो लभ्यमित्यर्थः। आधारत्वविवक्षायां सप्तमी। तथापि कल्याणकरीम्। अस्मद्धितैकहेतुमित्यर्थः। निःस्पृहवृत्तेः कार्यार्थ्यादितिभावः। 'कृञो हेतु-' इति टप्रत्यये ङीप्। अतस्ते गिरं श्रोतुमिच्छा माम्। मुखं वागस्यास्तीति मुखरो निरन्तरभाषी। 'रप्रकरणे मुखकुञ्जेभ्योर उपसंख्यानम्' इति रः। 'दुर्मुखे मुखराबद्धमुखौ' इत्यमरः। ततश्चिप्रत्ययः। मुखरीकरोति। व्याहरयतीत्यर्थः। निःस्पृहस्यापि ते वाक्यमस्मद्धितकरत्वाच्छ्रोतव्यमिति भावः॥

सुबो०—प्रश्नकुतूहलित्वं ( प्रश्नस्य त्वदागमनकारणजिज्ञासायाः कुतूहलित्वम् इच्छा ) निरास्पदं ( प्रतिष्ठाशून्यम्, तवागमनकारणप्रश्नो निरर्थक इत्यर्थः )। यतः निःस्पृहाणाम् ( धना-

द्याकांक्षारहितानां युष्मादृशानाम् ) अस्मासु अधीनं ( अस्मदायत्तं ) किमु ( किम् अस्ति भोः, अस्मत्तो लभ्यं किमपि न विद्यते इत्यर्थः—तपः प्रभावेणैव सर्वं स्वप्रयोजनं साधयन्ति अन्यनिरपेक्षा भवादृशा इति भावः ) । तथापि (प्रश्नविषयाभावेऽपि) कल्याणकरीम् ( अस्माकमेव मङ्गलकारिणीं ) ते ( तव ) गिरं ( वाचं ) श्रोतुम् इच्छा मां मुखरीकरोति ( वाचालीकरोति, प्रश्नकर्म्मणि नियोजयतीत्यर्थः ।

समासः—निरास्पदम् = नास्ति आस्पदं यस्य तत् । प्रश्नकुतूहलित्वम् = कुतूहलमस्यास्तीति कुतूहली, तस्य भावः तत्त्वम्, प्रश्नस्य कुतूहलित्वम् । 'कौतूहलं कौतुकं च कुतुकं च कुतूहलम्' इत्यमरः । निःस्पृहाणाम् = नास्ति स्पृहा येषां तेषाम् ।

व्या०—अस्मासु = अधिकरणविवक्षायां सप्तमी । मुखरीकरोति = अमुखरं मुखरं करोतीति च्वि प्रत्ययः ।

वाच्य०—प्रश्नकुतूहलित्वेन निरास्पदेन भूयते । अस्मत्स्वधीनेन केन भूयते । श्रोतुमिच्छया अहं मुखरीक्रिये ।

सरलार्थः—भवादृशा महात्मानः केनापि प्रयोजनेन अस्मद्विधानां समीपं नागच्छन्ति । अतस्तवागमनकारणप्रश्नो निरर्थक एव । तथापि निजमङ्गलकरीं वाचं श्रोतुमिच्छया प्रश्नं कर्त्तुं प्रवृत्तोऽस्मि ॥ ९ ॥

इत्युक्तवानुक्तिविशेषरम्यं
मनः समाधाय जयोपपत्तौ ।
उदारचेता गिरमित्युदारां
द्वैपायनेनाभिदधे नरेन्द्रः ॥ १० ॥

अन्वयः—इति उक्तिविशेषरम्यम् उक्तवान् उदारचेताः नरेन्द्रः द्वैपायनेन जयोपपत्तौ मनः समाधाय इति उदारां गिरम् अभिदधे ॥ १० ॥

इतीति ॥ इतीत्थमुक्तिविशेषरम्यमुक्तिवैचित्र्यचारु यथा तथोक्तवान्। उदारचेता महामना नरेन्द्रो द्वैपायनेन व्यासेन। द्वीपमयनं स्थानं जन्मभूमिर्यस्य स द्वीपायनः। 'स एव द्वैपायनस्तेन। 'प्रज्ञादिभ्यश्च' इति स्वार्थेऽणप्रत्ययः। नापत्यार्थे। 'नडादिभ्यः फक्'। तेष्वेव पाठाद्वाधितार्थत्वाच्च। जयोपपत्तौ मनः समाधाय। जयसिद्धिमपेक्ष्येत्यर्थः। इति वक्ष्यमाणप्रकारामुदारामर्थवतीं गिरमभिदध उक्तः। दुहादित्वादप्रधाने कर्मणि लिट्। 'प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणाम्। अप्रधाने दुहादीनां ण्यन्ते कर्तुश्च कर्मणः॥' इति वचनात्।

सुबो०—इति (उक्तरूपम्) उक्तिविशेषरम्यं (वचनवैचित्र्येण सुन्दरं यथा स्यात् तथा) उक्तवान् (कथितवान्) उदारचेताः (महामनाः) नरेन्द्रः (राजा युधिष्ठिरः) द्वैपायनेन (व्यासेन) जयोपपत्तौ (नरेन्द्रस्य जयलाभाय) मनः समाधाय (स्थिरीकृत्य) इति (वक्ष्यमाणप्रकाराम्) उदाराम् (महार्थसम्पन्नां) गिरं (वाचम्) अभिदधे (उक्तः)।

समासः—उक्तिविशेषरम्यम् = उक्तीनां विशेषः, तेन रम्यम्। जयोपपत्तौ = जयस्य उपपत्तिः तस्याम्। उदारचेताः = उदारं चेतो यस्य सः

व्या०—द्वैपायनेन = द्वीपम् अयनम् (आश्रयः, जन्मस्थानं) यस्य स द्वीपायनः स एव द्वैपायनः (स्वार्थे अण्)। अभिदधे = अभि–धा + कर्मणि लिट्, द्विकर्मकत्वात् अस्य गौणकर्मण उक्तत्वम्॥

वाच्य—इत्युक्तवन्तम् उदारचेतसं नरेन्द्रं द्वैपायनः इति गिरम् अभिदधौ।

सरलार्थः—पूर्वोक्तरूपम् उक्तवन्तं युधिष्ठिरं, येन तस्य जयलाभो भवेत् तन् मनसा निश्चित्य वेदव्यास उवाच ॥ १० ॥

आदौ तावत् स्वस्य माध्यस्थभङ्गदोषं युग्मेन परिहरति—

चिचीषतां जन्मवतामलघ्वीं
यशोवतंसामुभयत्र भूतिम् ॥

अभ्यर्हिता बन्धुषु तुल्यरूपा
वृत्तिर्विशेषेण तपोधनानाम् ॥ ११ ॥

अन्वयः—अलघ्वीं यशोवतंसाम् उभयत्र भूतिं चिचीषतां जन्मवतां बन्धुषु तुल्यरूपा वृत्तिः अभ्यर्हिता, तपोधनानां तु विशेषेण ( अभ्यर्हिता ) ।

चिचीषतामिति ॥ अलघ्वीं गुर्वीम् । 'वोतो गुणवचनात्' इति ङीष् । यशोवतंसां कीर्तिभूषणाम् । उभयत्रेह चामुत्र च भूतिं श्रेयश्चिचीषतां चेतुं सङ्ग्रहीतुमिच्छताम् । चिनोतेः सन्नन्ताच्छतृप्रत्ययः । जन्मवतां शरीरिणां बन्धुषु विषये तुल्यरूपैकविधा वृत्तिर्व्यवहारोऽभ्यर्हितोचिता तपोधनानां त्वस्मत्सदृशां विशेषेण नियमेनाभ्यर्हिता ॥

सुबो०—अलघ्वीं ( महतीं ) यशोवतंसां ( कीर्त्तिभूषणाम् ) उभयत्र ( इहलोके परलोके च ) भूतिं ( श्रेयः ) चिचीषतां ( संग्रहीतुमिच्छतां ) जन्मवतां ( शरीरिणां ) बन्धुषु (बान्धवेषु) तुल्यरूपा ( एकविधा ) वृत्तिः ( व्यवहारः ) अभ्यर्हिता (उचिता), तपोधनानाम् ( अस्मद्विधानां तपस्विनां ) तु विशेषेण ( नियमेन ) अभ्यर्हिता ।

समासः—यशोवतंसाम् = यशः अवतंसः ( शिरोभूषणं ) यस्याः ताम् । 'पुस्युत्तंसावतंसौ द्वौ कर्णपूरेऽपि शेखरे, इत्यमरः । तुल्यरूपा = तुल्यं रूपं यस्याः सा । तपोधनानाम् = तप एव धनं येषां तेषाम् ।

व्या०—चिचीषताम् = चि-सन् + शतृ ।

वाच्य—तुल्यरूपया वृत्त्या अभ्यर्हितया भूयते ।

सरलार्थः—ये पुरुषा इहलोके परलोके च यशस्करं महत् श्रेयः प्राप्तुमिच्छन्ति तेषां बन्धुजनेषु एक रूपो व्यवहार उचितः, विशेषतो मादृशानां तपस्विनाम् । अतो धार्त्तराष्ट्रेषु पाण्डवेषु च मे समदर्शित्वमुचितमेव ॥ ११ ॥

तथापि निघ्नं नृप तावकीनैः
प्रह्वीकृतं मे हृदयं गुणौघैः।
वीतस्पृहाणामपि मुक्तिभाजां
भवन्ति भव्येषु हि पक्षपाताः॥ १२॥

अन्वयः—तथापि नृप तावकीनैः गुणौघैः प्रह्वीकृतं मे हृदयं निघ्नम्। वीतस्पृहाणां मुक्तिभाजां भव्येषु पक्षपाताः भवन्ति।

तथापीति॥ तथापि तुल्यवृत्तौ चित्तेऽपि। हे नृप, तावकीनैस्त्वदीयैः। 'युष्मदस्मदोरन्यतरस्यां खञ्च' इति खञ्प्रत्ययः। 'तवकममकावेकवचने' इति तवकादेशः। गुणौघैः प्रह्वीकृतमावर्जितं मे हृदयं निघ्नं त्वदायत्तम्। 'अधीनो निघ्न आयत्तः' इत्यमरः ननु निःस्पृहस्थे क्रोऽयं पक्षपात इत्यत्राह वीतेति। वीतस्पृहाणां मुक्तिभाजाम्। मुमुक्षूणामपीत्यर्थः। भवन्तीति भव्याः साधवः। 'भव्यगेय-' इत्यादिना कर्तरि निपातः। तेषु पक्षपाताः स्नेहा भवन्ति। न तु साध्वनुग्रहो महतां माध्यस्थ्यभञ्जक इति भावः॥

सुबो०—तथापि (बन्धुषु चित्तस्य तुल्यवृत्तित्वेऽपि) हे नृप (राजन्) तावकीनैः (त्वदीयैः) गुणौघैः (गुणसमूहैः) प्रह्वीकृतं (प्रवणीकृतं) मे (मम) हृदयं (चित्तं) निघ्नं (तव आयत्तं भवति)। (यतः) वीतस्पृहाणां (निष्कामानाम्) अपि मुक्तिभाजां (मुमुक्षूणां) भव्येषु (साधुषु) पक्षपाताः (स्नेहाः) भवन्ति।

समासः—गुणौघैः=गुणानाम् ओघाः तैः। वीतस्पृहाणाम्=वीता स्पृहा येषां तेषाम्। मुक्तिभाजाम्=मुक्तिं भजन्ते (प्राप्तुं यतन्ते) ये तेषाम् (क्विप्)।

व्या०—निघ्न=नि-हन+क। 'अधीनो निघ्न आयत्तः' इत्यमरः। प्रह्वीकृतम्=अप्रह्वं प्रह्वं कृतमिति च्विः। 'प्रवणं क्रमनिम्नोर्व्यां प्रह्वे नाटु चतुष्पथे' इत्यमरः। वीत=वि+इ+क्त।

वाच्य—प्रह्वीकृतेन मे हृदयेन निघ्नेन भूयते । भव्येषु पक्षपातैः भूयते ।

सरलार्थः—यद्यपि मदीयं चित्तं कौरवपाण्डवेषु समानं भवितुमुचितं, तथापि त्वदीयैर्गुणैराकृष्टं सत् त्वदायत्तमेव भवति । न केवलं ममैवैष स्वभावः, किन्तु निस्पृहा अपि मुमुक्षवः साधूनां गुणपक्षपातिनो भवन्त्येव ॥ १२ ॥

इदानीं युधिष्ठिरस्य गुणवत्तां प्रकटयितुं धृतराष्ट्रस्य दौर्जन्यं प्रकटयति—

सुता न यूयं किमु तस्य राज्ञः
सुयोधनं वा न गुणैरतीताः ।
यस्त्यक्तवान्वः स वृथा बलाद्वा
मोहं विधत्ते विषयाभिलाषः ॥ १३ ॥

अन्वयः—यूयं तस्य राज्ञः सुताः न किमु । गुणैः सुयोधनं न अतीताः वा । यः वः वृथा बलात् वा त्यक्तवान् सः विषयाभिलाषः मोहं विधत्ते । ( यद्वा-यः सः वः वृथात्यक्तवान् । विषयाभिलाषः बलात् वा मोहं विधत्ते ) ।

सुता इति ॥ यूयं तस्य राज्ञो धृतराष्ट्रस्य सुताः पुत्रा न किमु । अपि तु सुता एवेत्यर्थः । गुणैः शान्तिदानदाक्षिण्यादिभिः । सुयोधनं नातीता नातिक्रान्ता वा अतीत्य एवेत्यर्थः । कर्तरि क्तः । असुतत्वमगुणत्वं च त्यागे हेतुः । युष्मासु तन्नास्तीत्यर्थः उपालम्भे कारणमाह—य इति । यो धृतराष्ट्रो वो युष्मान्वृथा निष्कारणमेव त्यक्तवान् । यदि वयं सुता गुणाधिकाश्च तर्हि कथमत्याक्षीत्तत्राह-बलादिति । स विषयाभिलाषो भोगतृष्णा बलाद्वा बलादिव । 'वा स्याद्विकल्पोपमयोरिवार्थेऽपि समुच्चये, इति विश्वः । मोहमविवेकं विधत्ते । विषयाभिलाषातिरिक्तो न कश्चिद्युष्मत्त्यागहेतुरस्तीत्यर्थः । अत्र कार्यकारणसमर्थनरूपोऽर्थान्तरन्यासः ॥

सुबो०—यूयं ( पाण्डवाः ) तस्य राज्ञः ( धृतराष्ट्रस्य ) सुताः ( पुत्राः ) न किमु ( किं न भवथ; अपि तु भवथैव—

'भ्रातुष्पुत्रेण पुत्रता' इति शास्त्रात् ) । गुणैः ( दयादाक्षिण्यादिभिः ) सुयोधनं ( दुर्योधनं ) न अतीताः ( अतिक्रान्ताः ) वा ( किम्; अपि तु अतीता एव ) । यः सः ( धृतराष्ट्रः ) वः ( युष्मान् ) वृथा ( अकारणं ) बलात् वा ( बलाच्च ) त्यक्तवान् । ( यतः ) विषयाभिलाषः ( भोगलालसा ) मोहं ( बुद्धिभ्रंशं ) विधत्ते ( करोति ) ।

[ यद्वा—यः सः ( धृतराष्ट्रः ) वः ( युष्मान् ) वृथा ( अकारणं ) त्यक्तवान् । ( यतः ) विषयाभिलाषः ( भोगलालसा ) बलात् वा ( बलादिव ) मोहं विधत्ते । ]

समासः—विषयाभिलाषः = विषये अभिलाषः ।

व्या०—अतीताः = अति-इ + कर्त्तरिक्त । विधत्ते = वि-धा + लट् ।

वाच्यं०—युष्माभिः किमु तस्य सुतैः न भूयते । सुयोधनः युष्माभिः न अतीतो वा । येन तेन यूयं त्यक्ताः । विषयाभिलाषेण मोहः विधीयते ।

सरलार्थः—यद्यपि यूयं भ्रातुष्पुत्रत्वेन धृतराष्ट्रस्य पुत्रा एव, यद्यपि सुयोधनादधिकतरगुणशालिनः, तथापि एवं दुर्जनः सः, यत् राज्यलोभान्धतया अकारणं बलपूर्वकं च युष्मान् त्यक्तवान् ॥ १३ ॥

अथ राज्ञ उत्साहवर्धनाय शत्रोर्हानिं सूचयति—

जहातु नैनं कथमर्थसिद्धिः
संशय्य कर्णादिषु तिष्ठते यः ।
असाधुयोगा हि जयान्तरायाः
प्रमाथिनीनां विपदां पदानि ॥ १४ ॥

अन्वयः—एनम् अर्थसिद्धिः कथं न जहातु । यः संशय्य कर्णादिषु तिष्ठते । हि असाधुयोगाः जयान्तरायाः, प्रमाथिनीनां विपदां पदानि ।

जहात्विति । एनं धृतराष्ट्रमर्थसिद्धिः कथं न जहातु । जहात्वेवेत्यर्थः । 'प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च' इति प्राप्तकाले लोट् । तस्य हानिकालः प्राप्त इत्यर्थः । कुतः । यो धृतराष्ट्रः संशय्य संदिह्य कर्णादिषु तिष्ठते । कर्णादीन् दुर्मन्त्रिणः सन्दिग्धार्थे निर्णेतृत्वेनावलम्बत इत्यर्थः । 'प्रकाशनस्थेयाख्ययोश्च' इति स्थेयाख्यायामात्मनेपदम् । तिष्ठतेऽस्मिन्निति स्थेयो विवादपदनिर्णेता । तथाहि । असाधुयोगा दुर्जनसंसर्गा जयान्तराया जयविघातकाः । किञ्च प्रमाथिनीनामुन्मूलनशीलानां विपदां पदानि स्थानानि । 'पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुषु' इत्यमरः । न केवलं जयघातिनः किंत्वनर्थकारिणश्चेत्यर्थः । धृतराष्ट्रोऽपि दुर्जनविधेयत्वाद्विनङ्क्ष्यतीति भावः ।

सुबो०—एनं ( धृतराष्ट्रम् ) अर्थसिद्धिः ( कार्य्यसिद्धिः ) कथं न जहातु ( त्यजतु, जहात्वेवेत्यर्थः ) । यः ( धृतराष्ट्रः ) संशय्य ( कर्त्तव्यविषये संदिह्य ) कर्णादिषु तिष्ठते ( कर्णशकुन्यादीन् दुर्मन्त्रिणः निर्णेतृत्वेन अवलम्बते ) । हि ( तथाहि ) असाधुयोगाः ( दुर्जनसंसर्गाः ) जयान्तरायाः ( जयलाभस्य विघ्नभूताः ) प्रमाथिनीनाम् ( उन्मूलनशीलानां, ध्वंसकारिणीनां ) विपदां पदानि ( स्थानानि च भवन्ति ) ।

ससासः—अर्थसिद्धिः = अर्थस्य सिद्धिः । कर्णादिषु ॥ कर्णः आदिर्येषां तेषु । असाधुयोगाः = असाधुभिः योगाः । जयान्तरायाः = जयस्य अन्तरायाः । 'विघ्नोऽन्तरायः प्रत्यूहः' इत्यमरः ।

व्या०—जहातु = हा + लोट् । संशय्य = सम्-शॅ + ल्यप् । तिष्ठते = स्था + लट् । 'प्रकाशनस्थेयाख्ययोश्च, इति आत्मनेपदम् । प्रमाथिनीनाम् = प्र-मथ + णिनि ।

वाच्य—अयम् अर्थसिद्ध्या कथं न हीयताम् । येन स्थीयते । असाधुयोगैः जयान्तरायैः विपदां पदैश्च भूयते ।

सरलार्थः—यो धृतराष्ट्रः कर्णादीनां मतानुसारेण कार्य्यं करोति, तस्य कार्य्यसिद्धिः कदापि न भविष्यति । तथाहि दुर्जनसंसर्गात् विघ्नो विपदश्च जायन्ते ॥ १४ ॥

एवं शत्रोरनर्थं सूचयित्वा राज्ञोऽर्थसिद्धिं सूचयति—

पथश्च्युतायां समितौ रिपूणां
धर्म्यां दधानेन धुरं चिराय।
त्वया विपत्स्वप्यविपत्ति रम्य-
माविष्कृतं प्रेम परं गुणेषु ॥ १५ ॥

अन्वयः—रिपूणां समितौ पथः च्युतायां (सत्यां) चिराय धर्म्यां धुरं दधानेन त्वया विपत्सु अपि अविपत्ति रम्यं गुणेषु परं प्रेम आविष्कृतम्।

पथ इति। रिपूणां समितौ सभायाम्। 'सभासमितिसंसदः' इत्यमरः। पथश्च्युतायां मार्गाद्भ्रष्टायाम्। दुरात्मनो दुःशासनस्य स्त्रीहरणसाहसमङ्गीकृतवत्यामित्यर्थः। चिराय धर्म्यां धर्मादनपेताम्। 'धर्मपथ्यर्थन्यायादनपेते' इति यत्प्रत्ययः। धुरं भारं दधानेन। कृच्छ्रेष्वपि धर्मादचलतेत्यर्थः। त्वया विपत्स्वपि अविनाश्यत एव रम्यं गुणेषु शान्त्यादिषु विषये परमुत्कृष्टं प्रेमाविष्कृतं प्रकटीकृतम्। दुःसहमपि सोढवता त्वया साधु कृतमिति भावः।

सुबो०—रिपूणां (शत्रूणां) समितौ (सभायां-शत्रुगोष्ठ्यां) पथः (धर्म्यात् मार्गात्) च्युतायां (भ्रष्टायां सत्यां-द्यूतसभायां दुःशासनकृतद्रौपदीवस्त्रहरणमनुमोदयत्यां सत्यामित्यर्थः) चिराय (चिरं कालं) धर्म्यां धुरं (धर्मानुगतां भारं) दधानेन (धारयता-धर्मात् अविचलता) त्वया विपत्सु (आपत्सु) अपि अविपत्ति (अविनाशि) अतएव रम्यं (सुन्दरं) गुणेषु (शान्त्यादिषु) परम् (उत्कृष्टं) प्रेम (अनुरागः) आविष्कृतं (प्रकाशितम्-)।

समासः—अविपत्ति = नास्ति विपत्तिर्यस्य तत्।

व्या०—दधानेन = धा + शानच्। रम्यम् = रम + अधिकरणे यत्।

वाच्य—धर्म्यां धुरं दधानः त्वं गुणेषु परं प्रेम आविष्कृतवान्।

सरलार्थः—शत्रुभिरधर्मेण विप्रकृतोऽपि त्वं चिरकालं धर्मपथात् न विचलितोऽसि ॥ १५ ॥

विधाय विध्वंसनमात्मनीनं
शमैकवृत्तेर्भवतश्छलेन ।
प्रकाशितत्वन्मतिशीलसाराः
कृतोपकाराः इव विद्विषस्ते ॥ १६ ॥

अन्वयः—शमैकवृत्तेः भवतः छलेन अनात्मनीनं विध्वंसं विधाय प्रकाशितत्वन्मतिशीलसाराः ते विद्विषः कृतोपकाराः इव ।

विधायेति । किं च शम एवैका मुख्या वृत्तिर्यस्य तस्य । अपरोपतापिनो भवतश्छलेन कपटेन । आत्मने हित आत्मनीनः । स न भवतीत्यनात्मनीनः । स्वस्यैवानर्थहेतुरित्यर्थः । तम् । 'आत्मन्विश्वजनभोगोत्तरपदात्खः' इति खप्रत्ययः । विध्वंसमपकारं विधाय कृत्वा । प्रकाशितः प्रख्यापितस्त्वन्मतिशीलयोस्तव प्रज्ञास्वभावयोः सारः प्रकर्षो यैस्ते तथोक्ताः । ते तव विद्विषः कृतोपकारा इवोपकृतवन्त इव । अपकारोऽप्युपकारायैव संवृत्तः । यदेषां दौर्जन्यं युष्मत्सौजन्यं च जगति सुव्यक्तमासीदित्यर्थः । विद्यमानस्यापि सुजनस्य चन्दनदारुण इव गुणा परिभव एव प्रचुरीभवन्तीति भावः ।

सुबो०—शमैकवृत्तेः ( शान्तिपरायणस्य ) भवतः ( तव ) छलेन ( कपटेन ) अनात्मनीनम् ( आत्मनोऽहितकरं ) विध्वंसम् ( अपकारं ) विधाय ( कृत्वा ) प्रकाशितत्वन्मतिशीलसाराः ( प्रख्यापितत्वदीयप्रज्ञासद्वृत्तिप्रकर्षः, तवैव बुद्धिप्रकर्षं चरित्रप्रकर्षं च प्रख्याप्य ) ते ( तव ) विद्विषः ( शत्रवः ) कृतोपकाराः ( उपकृतवन्तः ) इव भवन्ति ।

समासः—शमैकवृत्तेः = शमः ( शान्तिः ) एव एका ( मुख्या ) वृत्तिः ( स्वभावः ) यस्य तस्य । 'एके मुख्यान्यकेवलाः' इत्यमरः । प्रकाशितत्वन्मतिशीलसाराः = मतिश्च शीलञ्च मतिशीले, तयोः सारः मतिशीलसारः,

तव मतिशीलसारः त्वन्मतिशीलसारः, प्रकाशितः त्वन्मतिशीलसारः यैः ते। कृतोपकाराः = कृतः उपकारः यैः ते।

व्या—अनात्मनीनम् = आत्मने हितः आत्मनीनः (खः) न आत्मनीनः तम्।

वाच्य—प्रकाशितत्वन्मतिशीलसारैः ते विद्विड्भिः कृतोपकारैः इव भूयते।

सरलार्थः—तव शत्रवो यं तवापकारं कृतवन्तः, तेन सर्वजन विरागभाजनतया स्वस्यैव अपकारम् अकुर्वन्, तव तु मतिशीलोत्कर्षं जगति ख्यापयन्त उपकारमेव कृतवन्तः॥ १६॥

अथ प्रयोजनान्तरमाह—

लभ्या धरित्री तव विक्रमेण
ज्यायांश्च वीर्यास्त्रबलैर्विपक्षः।
अतः प्रकर्षाय विधिर्विधेयः
प्रकर्षतन्त्रा हि रणे जयश्रीः॥ १७॥

अन्वयः—तव धरित्री विक्रमेण लभ्या। विपक्षः च वीर्यास्त्रबलैः ज्यायान्। अतः प्रकर्षाय विधिः विधेयः। हि रणे जयश्रीः प्रकर्षतन्त्रा।

लभ्येति। तव। त्वयेत्यर्थः। 'कृत्यानां कर्तरि वा' इति षष्ठी। धरित्री विक्रमेण लभ्या प्राप्तव्या। न च सुलभ्या तं विनेत्याह—विपक्षश्च शत्रुरपि। वीर्यं शौर्यमस्त्राण्याग्नेयादीनि बलानि सैन्यानि तैर्ज्यायान्प्रशस्यतरः। अधिकतर इति यावत्, ज्येष्ठस्य। 'ज्यादादीयसः' इति ज्यादेशः। अतः प्रकर्षायाधिक्याय विधिरुपायो विधेयः कर्तव्यः। हि यस्माद्रणे जयश्रीः प्रकर्षतन्त्रा प्रकर्षप्रधाना। प्रकर्षायत्तेत्यर्थः। 'तन्त्रं प्रधाने सिद्धान्ते' इत्यमरः। बलिन एव जयः, न तु दुर्बलस्येति भावः।

सुबो०—तव (त्वया) धरित्री (पृथिवी) विक्रमेण (वीर्येण) लभ्या (प्राप्या)। विपक्षः च (तव शत्रुरपि)

वीर्य्यास्त्रबलैः ( शौर्य्येण आयुधैः सैन्यैश्च ) ज्यायान् ( त्वत्तः अधिकतरः ) । अतः ( अस्माद्धेतोः ) प्रकर्षाय ( वीर्य्यास्त्रबलानाम् आधिक्याय ) विधिः ( उपायः ) विधेयः ( त्वया कर्त्तव्यः ) हि ( यतः ) रणे ( युद्धे ) जयश्रीः ( जयसम्पत् ) प्रकर्षतन्त्रा ( प्रकर्षायत्ता ) भवति ।

समासः—वीर्य्यास्त्रबलैः = वीर्य्यं च अस्त्राणि च बलानि च तैः । प्रकर्षतन्त्रा = प्रकर्ष एव तन्त्रः (प्रधानं) यस्याः सा । जयश्रीः = जय एव श्रीः ।

व्या०—तव = कर्त्तरि षष्ठी । ज्यायान् = प्रशस्य + ईयसु ।

वाच्य—त्वं धरित्रीं विक्रमेण लप्स्यसे । विपक्षेण ज्यायसा भूयते । अतः प्रकर्षाय विधिं विदधीथाः । जयश्रिया प्रकर्षतन्त्रया भूयते ।

सरलार्थः—विक्रमं विना त्वं राज्यं प्राप्तुं न शक्ष्यसि । किंतु ते शत्रुः विक्रमेण अस्त्रैः सैन्यैश्च त्वत्तो बलीयान् । अतः त्वयापि तत्तत्प्रकर्षलाभाय उपायः कर्त्तव्यः । यतः प्रकर्षं विना जयश्रीर्दुर्लभैव ॥ १७ ॥

अथ श्लोकचतुष्टयेन विपक्षस्य ज्यायस्त्वं वर्णयति—

त्रिःसप्तकृत्वो जगतीपतीनां
हन्ता गुरुर्यस्य स जामदग्न्यः ।
वीर्यावधूतः स्म तदा विवेद
प्रकर्षमाधारवशं गुणानाम् ॥ १८ ॥

अन्वयः—त्रिःसप्तकृत्वः जगतीपतीनां हन्ता गुरुः सः जामदग्न्यः यस्य वीर्य्यावधूतः तदा गुणानां प्रकर्षम् आधारवशं विवेद स्म ।

त्रिःसप्तेति । त्रिरावृत्तान्सप्तवारांस्त्रिः सप्तकृत्वः । एकविंशतिकृत्व इत्यर्थः । त्रिःसप्तशब्दयोः सुप्सुपेति समासः । 'संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्' इति कृत्वसुच्प्रत्ययः । जगतीपतीनां महीपतीनां हन्ता नाशको गुरुरस्त्रवेदोपदेष्टा सः प्रसिद्ध इत्यर्थः ।

अत एव यच्छब्दानपेक्षत्वम्। तदुक्तं काव्यप्रकाशे—'प्रक्रान्त-प्रसिद्धानुभूतार्थविषयस्तच्छब्दो यच्छब्दोपादानं नापेक्षते' इति। जमदग्नेरपत्यं पुमाञ्जामदग्न्यः। 'गर्गादिभ्यो यञ्' इति यञ्प्रत्ययः। यस्य भीष्मस्य वीर्यावधूतो विक्रमाभिभूतः। अम्बिकास्वयंवर-इत्यर्थः। तदा भङ्गप्राप्तिसमये गुणानां शौर्यादीनां प्रकर्षमतिशयमाधारवशमाश्रयाधीनं विवेद जज्ञे स्म। स्वविद्यायाः स्वशिष्ये भीष्मे स्वस्मादपि प्रकर्षाधानदर्शनादिति भावः। 'स्म पादपूरणे भूतेऽर्थे च' इति विश्वः।

सुबो०—त्रिःसप्तकृत्वः (एकविंशतिं वारान्) जगतीपतीनां (महीपतीनां) हन्ता (नाशकः) गुरुः (भीष्मस्य अस्त्रवेद-शिक्षकः) सः (प्रसिद्धः) जामदग्न्यः (परशुरामः) यस्य (भीष्मस्य) वीर्य्यावधूतः (विक्रमेण अभिभूतः सन्) तदा (तस्मिन् अम्बिकास्वयंवरे युद्धे भङ्गप्राप्तेः काले) गुणानां (शौर्य्यादीनां) प्रकर्षम् (आधिक्यम्) आधारवशम् (आश्र-याधीनं, गुरुशिष्यविचारमकृत्वा योग्यपात्रं समाश्रयन्तं) विवेद स्म (ज्ञातवान्)।

समासः—त्रिःसप्तकृत्वः=त्रिरावृत्तानि सप्त (सुप्सुपेति समासः) वारार्थे त्रिशब्दात् सुच्, सप्तन् शब्दात् कृत्वसुच् च। जगतीपतीनाम्=जगत्याः पतयः तेषाम्। 'जगती जगतिच्छन्दोविशेषेऽपि क्षितावपि' इत्यमरः। वीर्य्यावधूतः=वीर्य्येण अवधूतः (अभिभूतः)।

व्या०—जामदग्न्यः=जमदग्नेः अपत्यं पुमानिति गर्गादित्वात् यञ्। अत्र अनन्तरापत्येऽपि गोत्रत्वोपचारः। स्म=पादपूरणे 'तु हि च स्म ह वै पादपूरणे' इत्यमरः। विवेद=विद+लिट्।

वाच्य—जगतीपतीनां हन्त्रा गुरुणा तेन जामदग्न्येन यस्य वीर्य्या-वधूतेन गुणानां प्रकर्षः आधारवशः विविदे।

सरलार्थः—एकविंशतिकृत्वः पृथिवीं निःक्षत्रियां कृतवान् यः परशुरामो यस्य गुरुरासीत्, स एव येन भीष्मेण पराजितः अभवत्॥ १८॥

यस्मिन्ननैश्वर्यकृतव्यलीकः
पराभवं प्राप्त इवान्तकोऽपि ।
धुन्वन्धनुः कस्य रणे न कुर्यान्
मनो भयैकप्रवणं स भीष्मः ॥१६॥

अन्वयः—यस्मिन् अनैश्वर्य्यकृतव्यलीकः अन्तकः अपि पराभवं प्राप्तः इव । सः भीष्मः रणे धनुः धुन्वन् कस्य मनः भयैकप्रवणं न कुर्य्यात् ।

यस्मिन्निति । यस्मिन्भीष्मे विषये । अनीश्वरस्य भावोऽनैश्वर्यमसामर्थ्यम् । 'नञः शुचीश्वरक्षेत्रज्ञकुशलनिपुणानाम्' इति विकल्पान्नञः पूर्वपदवृद्ध्यभावः । तेन कृतव्यलीको जनितवैलक्ष्यः । 'दुःखे वैलक्ष्ये व्यलीकम्' इति यादवः । अन्तकोऽपि यमोऽपि पराभवं प्राप्त इव । भीष्मस्येच्छामरणत्वादन्तकोऽपि पराजित इवास्ते, किमुतान्य इति भावः । स भीष्मो रणे धनुर्धुन्वन्कम्पयन्कस्य मनो भयैकप्रवणं भय एकप्रवणमेकोन्मुखम् । शिवभागवतवत्समासः । न कुर्यान् सर्वस्यापि मनसि भयं कुर्यादेवेत्यर्थः ।

सुबो०—यस्मिन् ( भीष्मे विषये ) अनैश्वर्य्यकृतव्यलीकः ( इच्छामरणत्वात् भीष्मस्य मारणे असामर्थ्येन जनितलज्जः ) अन्तकः ( यमः ) अपि पराभवं ( पराजयं ) प्राप्त इव आस्ते । स भीष्मः रणे (युद्धे) धनुः धुन्वन् ( कम्पयन् ) कस्य ( जनस्य ) मनः (मानसं) भयैकप्रवणम् (अत्यन्त सभयं) न कुर्य्यात् (सर्वेषामेव कुर्य्यादित्यर्थः ) ।

समासः—अनैश्वर्य्यकृतव्यलीकः = अनैश्वर्य्येण ( असामर्थ्येन ) कृतं ( जनितं ) व्यलीकं ( वैलक्ष्यं, लज्जां ) यस्य सः । 'व्यलीकमप्रियाकार्य्ये वैलक्ष्येष्वपि पीड़ने' इत्यमरः । भयैकप्रवणम् = एकस्मिन् प्रवणं ( नम्रम् ) एकप्रवणम्, भये एकप्रवणम् ( शिवभागवतवत् समासः ) एकस्मिन्नेव भये प्रवणमित्यर्थः ।

व्या०—धुन्वन् = धू + शतृ ।

वाच्य—यस्मिन् अनैश्वर्य्यकृतव्यलीकेन अन्तकेनापि पराभवः प्राप्त इव । तेन भीष्मेण धनुः धुन्वता कस्य मनः भयैकप्रवणं न क्रियेत ।

सरलार्थः—इच्छामरणत्वात् यस्य भीष्मस्य समीपे यमोऽपि लज्जित इव आस्ते, तस्मिन् दुर्य्योधनपक्षावलम्बिनि भीष्मे रणं कुर्वति सति सर्व एव सभया भविष्यन्ति ॥ १९ ॥

सृजन्तमाजाविषुसंहतीर्वः
सहेत कोपज्वलितं गुरुं कः ।
परिस्फुरल्लोलशिखाग्रजिह्वं
जगज्जिघत्सन्तमिवान्तवह्निम् ॥ २० ॥

अन्वयः—आजौ इषुसंहतीः सृजन्तं कोपज्वलितं, परिस्फुरल्लोलशिखाग्रजिह्वं जगत् जिघत्सन्तम् अन्तवह्निम् इव गुरुं वः कः सहेत ।

सृजन्तमिति । आजौ रण इषुसंहतीर्बाणसङ्घान्सृजन्तं वर्षन्तं कोपज्वलितमत एव परिस्फुरन्त्यो लोलाश्च शिखाग्राण्येव जिह्वा यस्य तं तथोक्तं जगल्लोकं जिघत्सन्तमत्तुमिच्छन्तम् । अदेः सन्नन्ताच्छतृप्रत्ययः । 'लुङ्सनोर्घस्लृ' इति घस्लृादेशः । अन्तवह्निं कालाग्निमिव स्थितं गुरुं द्रोणं वो युष्माकं मध्ये कः सहेत सोढुं शक्नुयात् । न कोऽपीत्यर्थः । 'शक्लि लिङ् च' इति शक्यर्थे लिङ् ।

सुबो०—आजौ ( युद्धे ) इषुसंहतीः ( शरजालानि ) सृजन्तं ( प्रयुञ्जानं ) कोपज्वलितं ( क्रोधोद्दीप्तम् ) अतएव परिस्फुरल्लोलशिखाग्रजिह्वं ( परिस्फुरन्त्यः सर्वतः प्रकाशमानाः लोलाः चञ्चलाश्च शिखाग्राणि ज्वालाञ्चलान्येव जिह्वाः यस्य तथाभूतं ) जगत् ( विश्वं ) जिघत्सन्तम् ( अत्तुमिच्छन्तं, संहर्त्तुमुद्यतम् ) अन्तवह्निं ( प्रलयाग्निम् ) इव गुरुं ( युष्माकं धनुर्वेदोपदेशकं द्रोणाचार्य्यं ) वः ( युष्माकं मध्ये ) कः सहेत ( सोढुं शक्नुयात्, न कोऽपित्यर्थः ) ।

समासः—इषुसंहतीः = इषूणां संहतयः ताः । कोपज्वलितम् = कोपेन ज्वलितः तम् । परिस्फुरल्लोलशिखाग्रजिह्वम् = शिखानाम् अग्राणि शिखाग्राणि, शिखाग्राण्येव जिह्वाः, परिस्फुरन्त्यः लोलाश्च शिखाग्रजिह्वाः यस्य तम् । अन्तवह्निम् = अन्तं वह्निः तम् ( सुप्सुपेति समासः ) ।

व्या०—सहेत=सह+विधिलिङ् । जिघत्सन्तम्=अद+सन्+शतृ ।

वाच्य—इषुसंहतीः सृजन् कोपज्वलितः परिस्फुरल्लोलशिखाग्रजिह्वः जगत् जिघत्सन् अन्तवह्निरिव केन सह्यत ।

सरलार्थः—शरजालवर्षी युष्माकं गुरुर्द्रोणाचार्य्यः सर्वतः प्रसरज्ज्वालामालान्वितः कालाग्निरिव यदा रणस्थले द्रष्टव्यः तदा न कोऽपि तस्य तेजः सोढुं शक्ष्यति ॥ २० ॥

निरीक्ष्य संरम्भनिरस्तधैर्यं
राधेयमाराधितजामदग्न्यम् ।
असंस्तुतेषु प्रसभं भयेषु
जायेत मृत्योरपि पक्षपातः ॥ २१ ॥

अन्वयः—संरम्भनिरस्तधैर्य्यम् आराधितजामदग्न्यं राधेयं निरीक्ष्य मृत्योः अपि असंस्तुतेषु भयेषु प्रसभं पक्षपातः जायेत ।

निरीक्ष्येति । संरम्भेण कोपेन निरस्तं त्याजितं धैर्यं निर्विकारचित्तत्वं येन तं तथोक्तम् । आटोपेनैव परधैर्यापहारिणमित्यर्थः । आराधितजामदग्न्यं शुश्रूषितभार्गवम् जामदग्न्यादधिगतास्त्ररहस्यमित्यर्थः । राधेयं राधासुतं कर्णम् । 'स्त्रीभ्यो ढक्' निरीक्ष्य मृत्योरप्यसंस्तुतेष्वपरिचितेषु । 'संस्तवः स्यात्परिचयः' इत्यमरः । भयेषु प्रसभं पक्षपातः परिचयो जायेत । मृत्युरप्यस्माद्बिभीयात्किमुतान्य इति भावः । संभावनायां लिङ् । अत्र जनिक्रियापेक्षया तत्संभवान्निरीक्ष्येति ल्यब्निर्देशः । 'समर्थनीयः प्रधानोपसर्जनभावस्त्वप्रयोजकः' इति व्यक्तिविवेककारः । अत्र भयसंबन्धरहितस्य मृत्योर्भयसंबन्धाभिधानादसंबन्धे संबन्धरूपातिशयोक्तिरलंकारः ।

सुबो०—संरम्भनिरस्तधैर्य्यं ( क्रोधेन निराकृतमन्येषां धैर्य्यं येन तथाभूतम् , यस्य कोपाकुलमूर्त्तिदर्शनात् सर्वे अधीरा भवन्ति

तथाभूतमित्यर्थः ) आराधितजामदग्न्यम् ( उपासितपरशुरामं, परशुरामादधिगतास्त्रविद्यमित्यर्थः ) राधेयं ( राधासुतं कर्णं ) निरीक्ष्य ( दृष्ट्वा ) मृत्योरपि असंस्तुतेषु ( अपरिचितेषु, कदापि अविज्ञातेषु ) भयेषु प्रसभं ( हठात् ) पक्षपातः ( परिचयः ) जायेत ( उत्पद्येत )

समासः—संरम्भनिरस्तधैर्य्यम् = संरम्भेन निरस्तं धैर्य्यं येन तम्। आराधितजामदग्न्यम् = आराधितः जामदग्न्यः येन तम्।

व्या०—प्रसभमिति क्रियाविशेषणम् 'प्रसभन्तु बलात्कारो हठः' इति वोपालितश्च। जायेत = जन + विधिलिङ्।

वाच्य—मृत्योरपि पक्षपातेन जायेत।

सरलार्थः—यं कर्णं क्रुद्धं दृष्ट्वा सर्वेषां धैर्य्यच्युतिर्भवति, सर्वभयावहस्य मृत्योरपि भयमुत्पद्यते, तं जेतुं कः शक्ष्यति॥२१॥

अथानन्तरकृत्यं स्वागमनप्रयोजनं च युग्मेनाह—

यया समासादितसाधनेन
सुदुश्चरामाचरता तपस्याम्।
एते दुरापं समवाप्य वीर्य-
मुन्मूलितारः कपिकेतनेन॥ २२॥

अन्वयः—यया सुदुश्चरां तपस्याम् आचरता समासादित-साधनेन कपिकेतनेन दुरापं वीर्य्यं समवाप्य एते उन्मूलितारः।

ययेति। यया विद्यया करणेन सुदुश्चरामतिदुष्करां तपस्यां तपश्चर्याम्। 'कर्मणो रोमन्थतपोभ्यां वर्तिचरोः' इति क्यङ्। 'अप्रत्ययात्' इति स्त्रियामप्रत्ययः। आचरता। पशुपतिं प्रति तपः कुर्वतेत्यर्थः। अत एव समासादितं प्राप्तं साधनं पाशुपतास्त्ररूपं येन तेन। कपिर्हनुमान्केतनं चिह्नं यस्य तेन। अर्जुनेनेत्यर्थः। दुरापमन्यस्य दुर्लभं वीर्यं तेजः समवाप्य। एते पूर्वोक्तां भीष्मादय उन्मूलितार उन्मूलयिष्यन्ते। उन्मूलयतेर्ण्यन्तात्कर्मणि लुट्। अत्र चिण्वदिडा-

गमेऽपि तस्य 'असिद्धवदत्राभात्' 'णेरनिटि' इति णिलोपः। तन्निमित्तस्थैव "अनिटि" इति निषेधात्। उक्तं च-'चिण्वद् वृद्धिर्युक्च हन्तेश्च घत्वं दीर्घश्चोक्तो यो मितां वा चिणोति। इट् चासिद्धस्तेन मे लुप्यते णिर्नित्यश्चायं वल्निमित्तो विघाती।' इति।

सुवो०—यया (विद्यया) सुदुश्चराम् (अतिदुष्करां, कठोरां) तपस्यां (इन्द्रादीनुद्दिश्य तपः) आचरता (कुर्वाणेन) तत एव समासादितसाधनेन (प्राप्तास्त्रेण, अधिगतपाशुपताद्यस्त्रेणेत्यर्थः) कपिकेतनेन (वानरध्वजेन अर्जुनेन) दुरापम् (अन्यैर्दुर्लभं) वीर्य्यं (तेजः) समवाप्य (लब्ध्वा) एते (पूर्वोक्ता भीष्मद्रोणकर्णाः) उन्मूलितारः (उन्मूलयिष्यन्ते, विनाशयितव्याः)।

समासः—समासादितसाधनेन=समासादितानि साधनानि येन तेन। कपिकेतनेन=कपिः केतनं यस्य तेन।

व्या०—समासादित=सम्-आङ्-सद+स्वार्थे णिच्+कर्मणि क्त। सुदुश्चराम्=सु-दुर्-चर+कर्मणि खल्। दुरापम्=दुर्-आप+खल्। उन्मूलितारः=उन्मूल+करोत्यर्थे णिच्=उन्मूलि (नामधातु)+कर्मणि लुट्।

वाच्य०—यया तपस्याम् आचरन् समासादितसाधनः कपिकेतनः एतान् उन्मूलिता।

सरलार्थः—यया विद्यया अर्जुनः तपस्यया इन्द्रादीनाराध्य तेभ्यः पाशुपताद्यस्त्राणि प्राप्य भीष्मादीन् विनाशयिष्यति ॥२२॥

महत्त्वयोगाय महामहिम्ना-
माराधनीं तां नृप देवतानाम्।
दातुं प्रदानोचित भूरिधाम्नी-
मुपागतः सिद्धिमिवास्मि विद्याम् ॥ २३ ॥

अन्वयः—प्रदानोचित नृप, महत्त्वयोगाय महामहिम्नां देवतानाम् आराधनीं भूरिधाम्नीं सिद्धिम् इव तां विद्यां दातुम् उपागतः अस्मि।

महत्त्वेति। हे नृप, महत्त्वयोगाय प्रकर्षलाभाय महामहिम्नां महानुभावानां देवतानामिन्द्रादीनाम्। आराध्यतेऽनयेत्याराधनीताम्। प्रसादयित्रीमित्यर्थः। करणेः ल्युट्। ङीप्। भूरिधाम्नीं महाप्रभावाम्। 'धाम देशे गृहे रश्मौ स्थाने जन्मप्रभावयोः' इति विश्वः। 'अन उपधालोपिनोऽन्यतरस्याम्' इति वा ङीप्। विद्यामिन्द्रमन्त्ररूपां सिद्धिं साक्षात्कार्यसिद्धिमिवेति विद्याया अमोघत्वोक्तिः। हे प्रदानोचित दानपात्रभूत। फलभोक्तृत्वादस्य पात्रत्वोक्तिः। दातुमुपागतोऽस्मि।

सुबो०—हे प्रदानोचित (विद्यादानस्य योग्यपात्र) नृप (राजन् युधिष्ठिर) महत्त्वयोगाय (उत्कर्षलाभाय) महामहिम्नां (महानुभावानां) देवतानाम् (इन्द्रादीनाम्) आराधनीं (प्रसादयित्रीं) भूरिधाम्नीं (महाप्रभावां) सिद्धिं (साक्षात् कार्य्यसिद्धिम्) इव तां विद्यां (मन्त्रं) दातुम् आगतोऽस्मि (अहम् उपस्थितोऽभवम्)।

समासः—महत्त्वयोगाय = महत्त्वस्य योगः तस्मै। महामहिम्नाम् = महान् महिमा यासां तासाम्। प्रदानोचित = प्रदाने उचितस्तत्सम्बुद्धौ। भूरिधाम्नीम् = भूरि धाम यस्याः ताम्।

व्या०—आराधनीम् = आराध्यते अनया इति आङ्-राध + णिच् करणे ल्युट्।

वाच्य—मया उपागतेन भूयते।

सरलार्थः—इन्द्रादिदेवतानाम् आराधनसाधनभूतां महाप्रभावां तां विद्यां दातुमहमिहागतोऽस्मि॥ २३॥

इत्युक्तवन्तं व्रज साधयेति
प्रमाणयन्वाक्यमजातशत्रोः।
प्रसेदिवांसं तमुपाससाद
वसन्निवान्ते विनयेन जिष्णुः॥ २४॥

अन्वयः—इति उक्तवन्तं प्रसेदिवांसं तं जिष्णुः व्रज साधय

इति अजातशत्रोः वाक्यं प्रमाणयन् अन्ते वसन् इव विनयेन उपाससाद ।

इतीति । इत्युक्तवन्तं प्रसेदिवांसं प्रसन्नम् । 'भाषायां सदवसश्रुवः' इति क्वसुः । तं मुनिं जिष्णुर्जयनशीलोऽर्जुनः । 'ग्लाजि स्थश्च–' इति ग्स्नुप्रत्ययः । व्रज साधयानुतिष्ठेत्येवंरूपम् । अजातशत्रोर्धर्मराजस्य स्वयमविद्वेषणशीलत्वादियं संज्ञा । वाक्यं प्रमाणयन् । तदादिष्ट सन्नित्यर्थः । अन्ते वसंश्छात्र इव । 'छात्रान्तेवासिनौ शिष्ये' इत्यमरः । विनयेनानौद्धत्येनोपाससाद समीपं प्राप ।

सुबो०—इति ( उक्तरूपम् ) उक्तवन्तं ( कथितवन्तं ) प्रसेदिवांसं ( प्रसन्नं ) तं ( मुनिं ) जिष्णुः ( अर्जुनः ) व्रज (मुनिसमीपं गच्छ) साधय (विद्याग्रहणं कुरु) इति (इत्थं) अजातशत्रोः ( युधिष्ठिरस्य ) वाक्यं ( वचनं ) प्रमाणयन् ( अवश्यकर्त्तव्यत्वेन जानन्, स्वीकुर्वन्नित्यर्थः ) अन्ते वसन् ( अन्तेवासी, छात्रः ) इव विनयेन ( विनीतभावेन ) उपाससाद ( उपसन्नो बभूव ) ।

व्या०—साधय = सिध + णिच् + लोट् । प्रमाणयन् = प्रमाण + केरात्यर्थे णिच् + शतृ । प्रसेदिवांसम् = प्र-सद + क्वसु । उपाससाद = उप–आङ् + सद + लिट् । अन्तेवासी = " छात्रान्तेवासिनौ शिष्ये " इत्यमरः । जिष्णुः = जि + शीलार्थे ग्स्नु ।

वाच्य—अजातशत्रोः वाक्यं प्रमाणयता जिष्णुना अन्ते वसता इव इति उक्तवान् प्रसेदिवान् स उपासदे ॥ २४ ॥

निर्याय विद्याथ दिनादिरम्या-
द्बिम्बादिवार्कस्य मुखान्महर्षेः ।
पार्थाननं वह्निकणावदाता
दीप्तिः स्फुरत्पद्ममिवाभिपेदे ॥ २५ ॥

अन्वयः—अथ वह्निकणावदाता विद्या दिनादिरम्यात् अर्कस्य बिम्बात् महर्षेः मुखात् निर्य्याय दीप्तिःस्फुरत् पद्मम् इव पार्थाननम् अभिपेदे ॥ २५ ॥

निर्यायेति। अथ वह्निकणावदाता स्फुलिङ्गवदुज्ज्वला। देवतासान्निध्यादिति भावः। विद्येन्द्रमन्त्ररूपा। दिनादिरम्यादर्कस्य प्रभातभास्करस्य बिम्बादिव महर्षेर्व्यासस्य मुखान्निर्याय निर्गत्य समासेऽनञ्पूर्वे क्त्वो ल्यप्। दीप्तिरर्कदीधितिः। स्फुरद्विकसत्पद्ममिव। पार्थाननमर्जुनस्य मुखमभिपेदे प्रविष्टा।

सुबो०—अथ (अनन्तरं) वह्निकणावदाता (अग्निस्फुलिङ्गवत् शुद्धा, अत्युज्ज्वला, तेजोमयीतियावत्) विद्या (मन्त्रः) दिनादिरम्यात् (प्रभाते रमणीयात्) अर्कस्य बिम्बात् (सूर्य्यमण्डलात्) इव महर्षेः मुखात् (व्यासस्य वदनात्) निर्याय (निर्गत्य) दीप्तिः (प्राभातिकसूर्य्यस्य प्रभा) स्फुरत् (विकसत्) पद्म (कमलम्) इव पार्थाननम् (अर्जुनस्य मुखम्) अभिपेदे (प्राप्ता, प्रविष्टा)।

समासः—दिनादिरम्यात्=दिनस्य आदिः दिनादिः, दिनादौ रम्यं तस्मात्। पार्थाननम्=पार्थस्य आननं तत्। वह्निकणावदाता=वह्नेः कणा, सा इव अवदाता, 'अवदातः सिते पीते शुद्धे' इत्यमरः।

व्या०—अभिपेदे=अभि—पद+लिट्।

वाच्य—अर्कस्य दीप्त्या स्फुरत् पद्मम् इव वह्निकणावदातया विद्यया पार्थाननम् अभिपेदे।

सरलार्थः—यथा प्रभाते सूर्य्यमण्डलात् प्रभा निर्गत्य विकचकमलं प्रविशति, तथा व्यासमुखात् विद्या निर्गत्य अर्जुनमुखं प्रविवेश। व्यासोपदिष्टं मन्त्रम् अर्जुनोऽभ्यस्तवानिति भावः॥ २५॥

योगं च तं योग्यतमाय तस्मै
तपःप्रभावाद्वितताऽर सद्यः।
येनास्य तत्त्वेषु कृतेऽवभासे
समुन्मिमीलेव चिराय चक्षुः॥ २६॥

अन्वयः—योग्यतमाय तस्मै तं योगं च तपःप्रभावात् सद्यः विततार । येन तत्त्वेषु अवभासे कृते ( सति ) अस्य चक्षुः चिराय समुन्मिमील इव ।

योगं चेति ॥ योग्यतमायार्हतमाय तस्मै पार्थाय तं वक्ष्यमाणमहिमानं योगं ध्यानविधिं च । 'योगः संहननोपायध्यानसङ्गतियुक्तिषु' इत्यमरः । तपःप्रभावात् सद्यो विततार ददौ । चिरकालग्राह्यमपीति भावः । येन योगेन तत्त्वेषु प्रकृतिमहदादिषु । तथा च । मूलप्रकृतिर्महानहङ्कारो मनश्च पञ्च तन्मात्राणि पञ्च बुद्धीन्द्रियाणि पञ्च कर्मेन्द्रियाणि पञ्च महाभूतानीति चतुर्विंशति तत्त्वानि । तत्रावभासे साक्षात्कारे कृते सत्यस्यार्जुनस्य चक्षुरक्षि चिराय समुन्मिमीलेवोन्मिषितमिवेत्युत्प्रेक्षा । तदा तस्य कोऽपि महानखिलाज्ञानभञ्जनस्तत्त्वावभासश्चिरादन्धस्य दृष्टिलाभ इवाभवदिति भावः ॥

सुबो०—योग्यतमाय ( सर्वोत्कृष्टपात्राय ) तस्मै ( अर्जुनाय ) तं योगम् ( यमनियमाद्यष्टलक्षणं ) च तपःप्रभावात् ( स्वकीयतपोबलात् ) सद्यः ( तत्क्षणे ) विततार ( ददौ व्यास इति शेषः ) येन ( योगेन ) तत्त्वेषु (प्रकृतिमहदहंकारादिचतुर्विंशति लक्षणेषु) अवभासे ( साक्षात्कारे ) कृते सति अस्य ( अर्जुनस्य ) चक्षुः चिराय ( दीर्घकालात् परं ) समुन्मिमील इव ( उन्मिषितमिव बभूव ) ।

व्या०—विततार = वि-तॄ + लिट् । समुन्मिमील = सम्-उद्-मील + लिट् ।

वाच्य—व्यासेन स योगः तस्मै वितेरे । येन अस्य चक्षुषा तत्त्वेषु समुन्मिमीले ।

सरलार्थः—ततो वेदव्यासः तमर्जुनं योगमपि तत्क्षण एव शिक्षयामास । यस्य योगस्य प्रभावेण तस्य तत्त्वज्ञानं संजातम् ।२६।

आकारमाशंसितभूरिलाभं
दधानमन्तःकरणानुरूपम् ।

नियोजयिष्यन्विजयोदये तं
तपः समाधौ मुनिरित्युवाच ॥ २७ ॥

अन्वयः—आशंसितभूरिलाभम् अन्तःकरणानुरूपम् आकारं दधानं तं मुनिः विजयोदये तपःसमाधौ नियोजयिष्यन् इति उवाच।

आकारमिति ॥ आशंसित आख्यातो भूरिलाभोऽनेकश्रेयःप्राप्तिर्येन तं तथोक्तम्। महाभाग्यसूचकमित्यर्थः। अन्तःकरणशब्देन तद्वृत्तिरुत्साहो लक्ष्यते। तदनुरूपं तदनुकूलम्। उत्साहानुगुणव्यापारत्वमित्यर्थः। आकारं मूर्तिं दधानं तमर्जुनं मुनिर्विजयोदये विजयफलके तपःसमाधौ तपोनियमे। 'समाधिर्नियमे ध्याने नीवाके च समर्थने' इति विश्वः। नियोजयिष्यन् नियोजयितुमिच्छन्नित्यर्थः। 'लृट् शेषे च' इति लृट्। 'लृटः सद्वा' इति सत्प्रत्ययः इति वक्ष्यमाणमुवाच ॥

सुबो०—आशंसितभूरिलाभं ( प्रचुरश्रेयःप्राप्तिसूचकम् ) अन्तःकरणानुरूपम् ( उत्साहान्वितमनसोऽनुकूलम् ) आकारं ( मूर्त्तिं ) दधानं ( धारयन्तं ) तम् ( अर्जुनं ) मुनिः ( व्यासः ) विजयोदये ( विजयफलके, विजयलाभजनके ) तपःसमाधौ ( तपोनियमे ) नियोजयिष्यन् ( प्रवर्त्तयितुमित्यर्थः ) इति ( वक्ष्यमाणं वचनम् ) उवाच।

समासः—आशंसितभूरिलाभम् = भूरिः लाभः, भूरिलाभः, आशंसितः ( कथितः, सूचितः ) भूरिलाभः येन तम्। विजयोदये = विजय एव उदयः ( फलं ) यस्य तस्मिन्। तपःसमाधौ = तपसः समाधिः तस्मिन्।

व्या०—आशंसित = आङ्–शंस + क्त। दधानम् = धा + शानच्। नियोजयिष्यन् = नि–युज + णिच् + हेतौ शतृ।

वाच्य—आकारं दधानः सः तपःसमाधौ नियोजयिष्यता मुनिना ऊचे।

सरलार्थः—विद्यायां योगचर्य्यायां च अधिगतायाम् अर्जुनस्य आकारश्रियं दृष्ट्वा मुनिस्तं तपोनियमानुवाच ॥ २७ ॥

अनेन योगेन विवृद्धतेजाः
निजां परस्मै पदवीमयच्छन् ।
समाचराचारमुपात्तशस्त्रो
जपोपवासाभिषवैर्मुनीनाम् ॥ २८ ॥

अन्वयः—अनेन योगेन विवृद्धतेजाः निजां पदवीं परस्मै अयच्छन् उपात्तशस्त्रः ( सन् ) जपोपवासाभिषवैः मुनीनाम् आचारं समाचर ।

अनेनेति ॥ अनेन स्वोपदिष्टेन योगेन विवृद्धतेजा निजां पदवीं परस्मा अयच्छन् । परस्य प्रवेशमयच्छन्निवित्यर्थः । उपात्तशस्त्रो निगृहीतायुधः सन् । जपोपवासाभिषवैः स्वाध्यायानशनस्नानैर्मुनीनामाचारं समाचरानुतिष्ठ ॥

सुबो०—अनेन ( मया उपदिष्टेन ) योगेन विवृद्धतेजाः ( उपचितवीर्य्यः ) निजां ( स्वकीयां ) पदवीं ( स्थानं ) परस्मै ( अन्यस्मै ) अयच्छन् ( अददत्—स्वकीयाश्रमे अन्यस्य प्रवेशं वारयन् इत्यर्थः ) उपात्तशस्त्रः ( गृहीतप्रहरणः सन् ) जपोपवासाभिषवैः ( स्वाध्यायेन अनशनेन त्रैकालिकस्नानेन च ) मुनीनाम् आचारं ( नियमं ) समाचर ( अनुतिष्ठ ) ।

समा०—विवृद्धतेजा = विवृद्धं तेजो यस्य सः । उपात्तशस्त्रः = उपात्तं ( गृहीतं ) शस्त्रं येन सः । जपोपवासाभिषवैः = जपश्च उपवासश्च अभिषवश्च तैः ।

व्या०—योगेन = करणे तृतीया । अयच्छन् = नञ्-दा + शतृ । उपात्त = उप-आङ्-दा + क्त । अभिषव = अभि-सु + अप् ।

वाच्य०—विवृद्धतेजसा निजां पदवीम् अयच्छता उपात्तशस्त्रेण त्वया मुनीनाम् आचारः समाचर्य्यताम् ।

सरलार्थः—मदुपशिक्षितेन योगेन प्रभूतवीर्य्यमधिगम्य गृहीतशस्त्रो भूत्वा स्वाश्रमे अन्यस्य प्रवेशं निषिध्य जपोपवासस्नानादिरूपां मुनिवृत्तिमवलम्बस्व ॥ २८ ॥

क्षेत्रविशेषे तपःसिद्धिर्भवतीति तं निर्दिशन्नाह—

करिष्यसे यत्र सुदुश्चराणि
प्रसत्तये गोत्रभिदस्तपांसि।
शिलोच्चयं चारुशिलोच्चयं त-
मेष क्षणान्नेष्यति गुह्यकस्त्वाम् ॥ २९ ॥

अन्वयः—यत्र गोत्रभिदः प्रसत्तये सुदुश्चराणि तपांसि करिष्यसे, चारुशिलोच्चयं तं शिलोच्चयं त्वाम् एष गुह्यकः क्षणात् नेष्यति।

करिष्यस इति ॥ यत्र शिलोच्चये गोत्रभिद इन्द्रस्य प्रसत्तये प्रसादाय सुदुश्चराणि तपांसि करिष्यसे। चारुशिलोच्चयं रम्य-शिखरं तं शिलोच्चयं गिरिमिन्द्रकीलरूपम्। 'अद्रिगोत्रगिरिग्रावा-चलशैलशिलोच्चयाः' इत्यमरः। त्वामेष गुह्यको यक्षः। अनन्तर-मेवास्य पुरःप्रादुर्भावादेष इति निर्देशः। क्षणान्नेष्यति प्रापयि-ष्यति ॥

सुबो०—यत्र (यस्मिन् पर्वते) गोत्रभिदः (इन्द्रस्य) प्रसत्तये (प्रसादाय) सुदुश्चराणि (अतिकठोराणि) तपांसि (तपस्याः) करिष्यसे (त्वम् आचरिष्यसि), चारुशिलोच्चयं (इन्द्रनीलाख्यमनोरमरत्नोपलराशि-राजितं) तं शिलोच्चयं (इन्द्र-कीलं नाम पर्वतं) त्वाम् एषः (अनन्तरमागच्छन् अयं) गुह्यकः (यक्षः) क्षणात् (क्षणमात्रं प्राप्यैव, क्षणमात्रेण) नेष्यति (प्रापयिष्यति)।

समासः—गोत्रभिदः=गोत्रान् (पर्वतान्) भिनत्ति (पक्षच्छेदनाय विदारयतीति (क्विप्)। शिलोच्चयम्=शिलानाम् उच्चयः (स्तूपः) तन्मयत्वात्। चारुशिलोच्चयम्=शिलानाम् (रत्नोपलानाम्) उच्चयः (स्तूपः) यस्मिन् तम्। 'पाषाणप्रस्तरग्रावोपलाश्मानः शिला दृषत्' इति 'अद्रिगोत्रगिरि ग्रावाचलशैलशिलोच्चयाः' इति चामरः। चारवः शिलोच्चयाः यस्य तम्।

व्या० —सुदुश्चराणि = सु–दुर्–चर + कर्मणि खल् । प्रसत्तये = प्र–सद + क्तिन् । नेष्यति = नी + लृट् । नीधातोर्द्विकर्म्मकत्वात् त्वामिति मुख्यकर्म्म, शिलोच्चयमिति गौणकर्म्म ।

वाच्य —त्वया यत्र तपांसि करिष्यन्ते, तं शिलोच्चयं त्वं गुह्यकेन नेष्यते ।

सरलार्थः—यत्र त्वया तपः कर्त्तव्यं, तत्रासौ आगच्छन् यक्षस्त्वां क्षणमात्रेणैव नेष्यति ॥ २९ ॥

इति ब्रुवाणेन महेन्द्रसूनुं
महर्षिणा तेन तिरोबभूवे ।
तं राजराजानुचरोऽस्य साक्षा-
त्प्रदेशमादेशमिवाधितष्ठौ ॥ ३० ॥

अन्वयः— इति महेन्द्रसूनुं ब्रुवाणेन तेन महर्षिणा तिरोबभूवे । राजराजानुचरः अस्य मुनेः साक्षात् आदेश इव तं प्रदेशम् अधितष्ठौ ।

इतीति ॥ इतीत्थं महेन्द्रसूनुमर्जुनं ब्रुवाणेनोक्तवता । 'वर्तमान-सामीप्ये' इति भूते वर्तमानवत्प्रत्ययस्तिरोधानस्याविलम्बसूचनार्थः । तेन महर्षिणा व्यासेन तिरोबभूवेऽन्तर्दधे । भावे लिट् । राजराजो यक्षराजः । 'राजा प्रभौ नृपे चन्द्रे यक्षे क्षत्रियशक्रयोः' इति विश्वः । तस्यानुचरः पूर्वोक्तयक्षोऽस्य मुनेरादेशं साक्षादिव प्रदेशमर्जुना-धिष्ठितस्थानमधितष्ठौ । प्राप्त इत्यर्थः । 'स्थादिष्वभ्यासेन चाभ्यासस्य' इति षत्वम् ॥

सुबो०—इति ( उक्तरूपम् ) ब्रुवाणेन ( उक्तवता ) तेन महर्षिणा ( व्यासेन ) तिरोबभूवे ( अन्तर्हितम् ) । राजराजानुचरः ( कुबेरानुचरः गुह्यकः ) अस्य मुनेः ( व्यासस्य ) साक्षात् ( प्रत्यक्षः, मूर्त्तिमान् ) आदेशं ( आज्ञा ) इव तं प्रदेशं ( तत् स्थानम् ) अधितष्ठौ ( प्राप्तः, व्यासस्यादेशानुरूपः कश्चित् यक्ष-स्तत्रोपस्थित इत्यर्थः ) ।—यद्वा आदेशोऽत्र व्याकरणशास्त्र

प्रसिद्धः 'षष्ठी स्थानेयोगा' इति सूत्रेणोट्टङ्कितः कार्य्यविशेषः; राजराजानुचरः अस्य (मुनेः) आदेश इव साक्षात् (प्रत्यक्षः सन्) तं प्रदेशम् अधितष्ठौ। यथा "अस्तेर्भूः" इत्यादिसूत्रैः अस्त्यादेः स्थाने भ्वादयो भवन्ति (यस्मिन् स्थाने अस्त्यादय आसन् तान् तिरोभाव्य तत् स्थानं भ्वादयोऽधिकुर्वन्ति) तथा महर्षौ तिरोभूते तस्य स्थानं गुह्यकोऽधिकृतवान् इत्यर्थः।—महेन्द्रसूनुमित्यत्र नरेन्द्रसूनुमिति, साक्षादित्यत्र सद्य इति च पाठान्तरम्।

समासः—महेन्द्रसूनुम्=महेन्द्रस्य सूनुः तम्। 'आत्मजस्तनयः सूनुः' इत्यमरः। राजराजानुचरः=राजराजस्य अनुचरः। मनुष्यधर्म्मा धनदो राजराजो धनाधिपः' इत्यमरः।

व्या०—ब्रुवाणेन=ब्रू+वर्त्तमानसामीप्ये भूते शानच्। तिरोबभूवे=तिरस्-भू+भावे लिट्। प्रदेशम्='अधिशीङ्स्थासां कर्म्म' इति अधिकरणस्य कर्म्मत्वम्। अधितष्ठौ=अधि-स्था+लिट्।

वाच्य—इति ब्रुवाणः स महर्षिः तिरोबभूव। अस्य आदेशेनेव राजराजानुचरेण सः प्रदेशः अधितष्ठे।

सरलार्थः—एतावदुक्त्वा अन्तर्हिते महर्षौ तत्क्षणादेव यक्षस्तत्रागतः॥ ३०॥

कृतानतिर्व्याहृतसान्त्ववादे
जातस्पृहः पुण्यजनः स जिष्णौ।
इयाय सख्याविव संप्रसादं
विश्वासयत्याशु सतां हि योगः॥ ३१॥

अन्वयः— :पुण्यजनः कृतानतिः (सन्) व्याहृतसान्त्ववादे जिष्णौ जातस्पृहः (सन्) सख्यौ इव संप्रसादम् इयाय। सतां योगः आशु विश्वासयति।

कृतेति॥ स पुण्यजनो यक्षः कृतानतिः कृतप्रणामः सन्व्याहृतसान्त्ववादे उक्तप्रियवचने। 'व्याहार उक्तिर्लपितम्' इत्यमरः। जिष्णावर्जुने जातस्पृहो जातानुरागः सन्। सख्यौ सुहृदीव। 'अथ

मित्रं सखा सुहृत्' इत्यमरः । संप्रसादं विश्रम्भमियाय प्राप । तथाहि । सतां साधूनां योगः संगतिराशु विश्वासयति विश्वासं जनयति हि । सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः ॥

सुबो०—स पुण्यजनः ( यक्षः ) कृतानतिः ( कृतप्रणामः सन् ) व्याहृतसान्त्ववादे ( उक्तप्रियवचने ) जिष्णौ ( अर्जुने ) जातस्पृहः ( जातानुरागः सन् ) सख्यौ ( सुहृदि ) इव संप्रसादं ( विश्वासम् ) इयाय ( प्राप्तवान् ) । हि ( तथाहि ) सतां ( साधूनां ) योगः ( समागमः ) आशु ( शीघ्रं ) विश्वासयति ( विश्वासं जनयति ) ।

समासः—कृतानतिः = कृता आनतिर्येन सः । व्याहृतसान्त्ववादे = सान्त्वस्य ( प्रियवाक्यस्य ) वादः ( कथनम् ) सान्त्ववादः, व्याहृतः ( उक्तः ) सान्त्ववादः येन तस्मिन् । जातस्पृहः = जाता स्पृहा यस्य सः । पुण्यजनः = पुण्यो जनः । 'अथ पुण्यजनो यक्षे राक्षसे सज्जनेऽपि च' इति मेदिनी ।

व्या०—इयाय = इ+लिट् । विश्वासयति = विश्वास+करोत्यर्थे णिच् ।

वाच्य—कृतानतिना जातस्पृहेण तेन पुण्यजनेन संप्रसादः ईये । सतां योगेन विश्वास्यते ।

सरलार्थः—यक्ष आगत्य अर्जुनं प्रणतवान् । अर्जुनश्च तेन प्रियसम्भाषणं कृतवान् । तेन संभाषणेन अर्जुनं प्रति यक्षस्य अनुरागो जातः ॥ ३१ ॥

अथोष्णभासेव सुमेरुकुञ्जा-
न्विहीयमानानुदयाय तेन ।
बृहद्द्युतीन्दुःखकृतात्मलाभं
तमः शनैः पाण्डुसुतान्प्रपेदे ॥ ३२ ॥

अन्वयः—अथ उष्णभासा उदयाय विहीयमानान् बृहद्युतीन् सुमेरुकुञ्जान् इव तेन उदयाय विहीयमानान् बृहद्युतीन् पाण्डुसुतान् दुःखकृतात्मलाभं तमः शनैः प्रपेदे ।

अथेति ॥ अथोष्णभासा सूर्येणोदयाय पुनरुद्गमाय विहीयमानांस्त्यज्यमानानिति तमःप्राप्तिकारणोक्तिः। बृहद्द्युतीन्। सौवर्णत्वाद्दीप्यमानानित्यर्थः। इति तमसः संकोचकारणोक्तिः। सुमेरुकुञ्जानिव। अत्र सुमेरुग्रहणं कुञ्जानां सौवर्णत्वद्योतनार्थम्। तेनार्जुनेनोदयाय श्रेयसे विहीयमानान्बृहद्द्युतीननेकबुद्धिप्रकाशान्। पूर्ववद्विशेषणद्वयस्य प्रयोजनमनुसंधेयम्। पाण्डुसुतान्। चतुर इति शेषः। दुःखेन कृच्छ्रेण कृत उपपादित आत्मलाभ उत्पत्तिर्यस्य तत्तथोक्तम्। तेषां विवेकित्वात्कथंचिल्लब्धोदयमित्यर्थः। तमःशोकोऽन्धकारश्च। 'तमोऽन्धकारे स्वर्भानौ तमः शोके गुणान्तरे' इत्युभयत्रापि विश्वः। शनैर्मन्दं प्रपेदे। तेषां विवेकित्वाद्भीतभीतमिवेति भावः। अत्र तमःशब्दस्य श्लिष्टत्वाच्छ्लेषानुप्राणितेयमुपमा ॥

सुबो०—अथ ( यज्ञागमनानन्तरम् ) उष्णभासा ( सूर्य्येण ) उदयाय ( पुनरुद्गमनाय ) विहीयमानान् ( त्यज्यमानान् ) बृहद्युतीन् ( सुवर्णमयत्वात् महादीप्तिशालिनः ) सुमेरुकुञ्जान् इव ( सुमेरुपर्वतस्थितानि लतादिपिहितोदरगुहादिस्थानानि इव—तान् यथा तमोऽन्धकारः शनैः प्रपद्यते तथा ) तेन ( अर्जुनेन ) उदयाय ( वीर्य्यरूपाभ्युदयलाभाय ) विहीयमानान् ( तपस्यार्थगमनेन त्यज्यमानान् ) बृहद्द्युतीन् ( अतितेजस्विनः ) पाण्डुसुतान् ( चतुरः पाण्डवान् ) दुःखकृतात्मलाभं ( कृच्छ्रेण लब्धप्रसारम्, तेषां विवेकशालित्वात् बहुचेष्टयैव उत्पन्नं ) तमः ( शोकः ) शनैः ( मन्दं मन्दं ) प्रपेदे ( प्राप्तवत्,—धैर्य्यशालिनः पाण्डवाः आत्मानं यत्नतः संस्तभ्यापि अर्जुनविरहशोकेन मुमुहुरित्यर्थः )।

समासः—उष्णभासा = उष्णाः भासः ( प्रभाः ) यस्य स उष्णभाः तेन। सुमेरुकुञ्जान् = सुमेरोः कुञ्जाः तान्। 'निकुञ्जकुञ्जौ वा क्लीबे लतादिपिहितोदरे' इत्यमरः। बृहद्द्युतीन् = बृहती द्युतिः येषां तान्। दुःखकृतात्मलाभम् = आत्मनः लाभः आत्मलाभः, दुःखेन कृतः आत्मलाभः ( उत्पत्तिः ) यस्य तत्।

व्या०—विहीयमानान् = वि–हा + कर्मणि शानच् । प्रपेदे = प्र–पद + लिट् । 'तमो ध्वान्ते गुणे शोके क्लीवं वा ना विधुन्तुदे' इति मेदिनी ।

वाच्य—उष्णभासा सुमेरुकुञ्जा इव तेन विहीयमानाः बृहद्युतयः पाण्डुसुतेन दुःखकृतात्मलाभेन तमसा प्रपेदिरे ।

सरलार्थः—तपस्यार्थं यक्षेण सह गमनोद्यतमर्जुनं दृष्ट्वा पाण्डवाः शोकाकुला बभूवुः ॥ ३२ ॥

असंशयालोचितकार्यनुन्नः
प्रेम्णा समानीय विभज्यमानः ।
तुल्याद्विभागादिव तन्मनोभि-
र्दुःखातिभारोऽपि लघुः स मेने ॥ ३३ ॥

अन्वयः—असंशयालोचितकार्य्यनुन्नः प्रेम्णा समानीय विभज्यमानः सः दुःखातिभारः तन्मनोभिः तुल्यात् विभागात् इव लघुः मेने ।

असंशयेति ॥ असंशयमसन्दिग्धं यथा तथाऽलोचितं विवेचितं यत्कार्यं तेन नुन्नो निरस्त इति लघुत्वहेतूक्तिः । 'नुदविदोन्दत्रा-ग्राहीभ्योऽन्यतरस्याम्' इति निष्ठानत्वम् । कार्यगौरवमालोच्य निरस्त इत्यर्थः । तथापि प्रेम्णा भ्रातृवात्सल्येन कर्त्रा समानीय पुनराकृष्य विभज्यमानः समशोभागीक्रियमाणः । तुल्येन प्रेम्णा तुल्यदुःखत्वं भवतीति भावः । स पूर्वोक्तो दुःखमेवातिभारोऽपि । अतिभारभूतमपि दुःखमित्यर्थः । तन्मनोभिस्तेषां चतुर्णां पार्थानां मनोभिस्तुल्याद्विभागादिव । पूर्वोक्तात्प्रेमकृतात्समविभागादिवेत्यर्थः । वस्तुतस्तु विवेकादेवेति भावः । पुनर्विभागग्रहणं तस्य हेतुत्वोत्प्रेक्षार्थमनुवादाददोषः । लघुर्मेने मतः यथैकोऽनेकधा विभज्य बहुभिरुह्यमानो महानपि भारो लघुर्मन्यते तद्वदित्यर्थः ।

सुबो०—असंशयालोचितकार्य्यनुन्नः ( असंशयम् असन्दिग्धं यथा स्यात् तथा आलोचितं विचारितं यत् शत्रुविजयरूपं कार्य्यं

तेन नुन्नः निरस्तः ) तथापि प्रेम्णा ( भ्रातृवात्सल्येन ) समानीय ( पुनराकृष्य ) विभज्यमानः ( चतुर्षु भ्रातृषु समांशैः विभक्तः क्रियमाणः ) सः दुःखातिभारः ( शोकातिभारः, अतिभारः शोकः ) अपि तन्मनोभिः ( तेषां चतुर्णां भ्रातॄणां मानसैः ) तुल्यात् विभागात् ( समानात् भागात् हेतोः ) लघुः ( अल्पः ) मेने ( मतः ) ।

समासः—असंशयालोचितकार्य्यनुन्नः=नास्ति संशयो यस्मिन् तत् असंशयम्, असंशयम् आलोचितं, तत् कार्य्यं, तेन नुन्नः । तन्मनोभिः= तेषां मनांसि तैः । दुःखातिभारः=दुःखस्य अतिभारः ।

व्या०—नुन्नः=नुद+क्त । विभज्यमानः=वि-भज+कर्म्मणि शानच्; अस्य कर्तृपदं प्रेम्णेति । मेने=मन+कर्म्मणि लिट्; अस्य कर्मपदं दुःखातिभारः इति, कर्तृपदं च मनोभिरिति ।

वाच्य—तन्मनांसि असंशयालोचितकार्य्यनुन्नं प्रेम्णा विभज्यमानं दुःखातिभारम् अपि लघुः मेनिरे ॥ ३३ ॥

सरलार्थः—कार्य्यगौरवं विवेच्य गुरुतरं भ्रातृविरहजं शोकं त्यक्तुं यतमाना अपि भ्रातरः भ्रातृवात्सल्यतया प्रथमं तावत् निःशेषं त्यक्तुं न शेकुः ॥ ३३ ॥

अथैवं प्रेम्णा कृष्यमाणमपि शोकं विवेको निर्जिगायेत्याह—

धैर्येण विश्वास्यतया महर्षे-
स्तीव्रादरातिप्रभवाच्च मन्योः ।
वीर्यं च विद्वत्सु सुते मघोनः
स तेषु न स्थानमवाप शोकः ॥ ३४ ॥

अन्वयः—धैर्य्येण, महर्षेः विश्वास्यतया, अरातिप्रभवात् तीव्रात् मन्योः च, मघोनः सुते वीर्य्यं च विद्वत्सु तेषु सः शोकः स्थानं न अवाप ।

धैर्येणेति । धैर्येण तेषां निसर्गतो निर्विकारचित्तत्वेन तथा महर्षेर्व्यासस्य । प्रवर्तकस्येति शेषः । विश्वास्यतया । श्रद्धेयवचनत्वेनेत्यर्थः । अरातिप्रभवादरातिहेतुकात्तीव्राद्दुःसह्यान्मन्योः क्रोधाद्धेतोस्तथार्जुनप्रभावपरिज्ञानाच्चेति । हेत्वन्तरं विशेषणमुखेनाह—मघोनः सुतेऽर्जुने वीर्यं च । 'न लोक-' इत्यादिना षष्ठीप्रतिषेधः । विद्वत्सु । ज्ञातवत्स्विति यावत् । 'विदेः शतुर्वसुः' इति वैकल्पिको वस्वादेशः । तेषु पार्थेषु स शोकः स्थानं स्थितिं नावाप न प्राप ।

सुबो०—धैर्य्येण ( स्वभावतो धैर्य्यशालितया, ) महर्षेः ( व्यासस्य ) विश्वास्यतया ( श्रद्धेयवचनतया ), अरातिप्रभवात् ( शत्रुभिरुत्पादितात् ) तीव्रात् ( सातिशयात् ) मन्योः ( क्रोधात् ) च; मघोनः सुते ( इन्द्रपुत्रे अर्जुने ) वीर्य्यं ( पराक्रमं ) च विद्वत्सु ( जानत्सु ) तेषु ( पाण्डवेषु ) सः शोकः स्थानं न अवाप ( प्राप्तवान्—तैर्निःशेषं परित्यक्त इत्यर्थः ।

समासः—अरातिप्रभवात् = अरातिः ( शत्रुः ) प्रभवः ( कारणं ) यस्य तस्मात् ।

व्या०—विश्वास्यतया = वि–श्वस + णिच् + कर्मणि यत् + भावार्थे तल् । विद्वत्सु = विद + शतृस्थाने क्वसु । मघोनः = मघवन् + ६ष्ठी १व० । अवाप = अव–आप + लिट् ।

वाच्य—तेन तेषु स्थानं न अवापे ।

सरलार्थः—पश्चात् ते पाण्डवाः स्वाभाविकधैर्य्येण, महर्षिवचने विश्वासेन, शत्रुं प्रति तीव्रमन्युना, अर्ज्जुनवीर्य्यपरिज्ञानेन च शोकं निःशेषं तत्यजुः ॥ ३४ ॥

तान्भूरिधाम्नश्चतुरोऽपि दूरं
विहाय यामानिव वासरस्य ।
एकौघभूतं तदशर्म कृष्णां
विभावरीं ध्वान्तमिव प्रपेदे ॥ ३५ ॥

अन्वयः—तत् अशर्म्म, भूरिधाम्नः चतुरः तान् अपि—वासरस्य यामान् इव दूरं विहाय एकौघभूतं ( सत् ) विभावरीं ध्वान्तम् इव—कृष्णां प्रपेदे।

तानिति। तत्पार्थोऽस्त्यक्तवच्छर्म सुखम्। 'शर्मशातसुखानि च' इत्यमरः। तद्विरुद्धमशर्म दुःखम्। 'नञ्' इति नञ्समासः। भूरिधाम्नोऽतितेजस्विन इति हानिहेतुत्वोक्तिः। चतुरस्तान्पार्थानपि वासरस्य भूरिधाम्नश्चतुरो यामान्प्रहरानिव। दूरं विहाय त्यक्त्वैकौघभूतमेकराशिभूतं सत्। 'श्रेण्यादयः कृतादिभिः' इत्यर्थे कर्मधारयः 'श्रेण्यादिराकृतिगणः' इति शाकटायनः। कृष्णां विभावरीं कृष्णपक्षरात्रिं ध्वान्तमिव। कृष्णां द्रौपदीं प्रपेदे प्राप॥

सुबो०—तत् ( पाण्डवेषु अलब्धस्थानम् ) अशर्म्म ( दुःखं, शोकः ) भूरिधाम्नः ( अतितेजस्विनः ) चतुरः ( चतुः संख्याकान् ) तान् ( पाण्डवान् ) अपि वासरस्य ( दिवसस्य ) यामान् ( प्रहरान् ) इव दूरं विहाय ( परित्यज्य ) एकौघभूतम् एकराशीभूतं सत् ) विभावरीं ध्वान्तम् इव ( रात्रिम् अन्धकार इव—ध्वान्तमपि यथा भूरिधाम्नः दिवसस्य चतुरो यामान् विहाय एकौघभूतं सत् कृष्णपक्षरात्रिं प्रपद्यते तथा ) कृष्णां ( द्रौपदीं ) प्रपेदे ( प्राप )।

समासः—भूरिधाम्नः=भूरि ( प्रभूतं ) धाम ( तेजः ) येषां तान्। एकौघभूतम्=एकः ओघः ( राशिः ) एकौघः, अनेकौघः एकौघः भूतं तत् ( च्व्यर्थे कर्म्मधारयः )।

व्या०—प्रपेदे=प्र–पद+कर्तरि लिट।

वाच्य—ध्वान्तेन विभावरी इव तेन अशर्म्मणा एकौघभूतेन सता कृष्णा प्रपेदे।

सरलार्थः—अन्धकारो यथा सूर्य्योदयात् तेजस्विनो दिवसस्य चतुरो यामान् विहाय एकीभूतं सत् कृष्णपक्षरात्रिम्

अधिकरोति, तथा स शोकः विवेकोदया तेजस्विनश्चतुरः पाण्डवान् विहाय एकीभूतं सत् एकां द्रौपदीमेव अधिचकार ।— द्रौपदी अतीव शोकाकुला बभूवेत्यर्थः ॥ ३५ ॥

तुषारलेखाकुलितोत्पलाभे
पर्यश्रुणी मङ्गलभङ्गभीरुः ।
अगूढभावापि विलोकने सा
न लोचने मीलयितुं विषेहे ॥ ३६ ॥

अन्वयः—सा विलोकने अगूढभावा अपि मङ्गलभङ्गभीरुः ( सती ) पर्य्यश्रुणी तुषारलेखाकुलितोत्पलाभे लोचने मीलयितुं न विषेहे ।

तुषारेति ॥ सा द्रौपदी विलोकनेऽर्जुनावलोकनेऽगूढभावागूढाभिप्रायापि । स्फुटाभिलाषिणीति यावत् । 'भावो लीलाक्रियाचेष्टाभूत्यभिप्रायजन्तुषु' इति वैजयन्ती । मङ्गलभङ्गभीरुर्मङ्गलहानेर्भीता सती । पर्यश्रुणी परिगताश्रुके । बाष्पावृते इत्यर्थः । अत एव तुषारलेखाकुलितोत्पलाभे हिमबिन्दुसहितेन्दीवरसंनिभे इत्युपमालङ्कारः । लोचने मीलयितुं न विषेहे न शशाक । अश्रुणोर्ईष्ट्यावरकत्वेऽपि तन्निपातस्यामङ्गलत्वात्तन्निवर्तकं निमीलनं सा न चकारेत्यर्थः ॥

सुबो०—सा ( द्रौपदी ) विलोकने ( अर्जुनस्य दर्शने ) अगूढभावा ( स्फुटाभिलाषा ) अपि मङ्गलभङ्गभीरुः ( मङ्गलहानेर्भीता सती, यात्राकाले रोदनात् अमङ्गलाशङ्किनी सती ) पर्य्यश्रुणी ( बाष्पाकुले ) अतएव तुषारलेखाकुलितोत्पलाभे ( हिमबिन्दुपरिपूर्णेन्दीवरसदृशे ) लोचने ( चक्षुषी ) मीलयितुं ( संकोचयितुं ) न विषेहे ( न शशाक ) ।

समासः—तुषारलेखाकुलितोत्पलाभे = तुषारस्य लेखाः, ताभिः आकुलिते, ते उत्पले, तयोराभा इव आभा ( शोभा ) ययोः ते । पर्य्यश्रुणी =

परिगते अश्रूणि। मङ्गलभङ्गभीरुः=मङ्गलस्य भङ्गः, तस्मात् भीरुः। अगूढभावा=न गूढः अगूढः, अगूढः भावो यस्याः सा।

व्या०—मीलयितुम्=मील+णिच्+तुमुन्। विषेहे=वि-सह+लिट्।

वाच्य—मङ्गलभङ्गभीर्वा अगूढभावया तया न विषेहे।

सरलार्थः—अर्जुनविरहशोकातुरा द्रौपदी सजलनयना बभूव ॥ ३६ ॥

अकृत्रिमप्रेमरसाभिरामं
रामार्पितं दृष्टिविलोभि दृष्टम्।
मनःप्रसादाञ्जलिना निकामं
जग्राह पाथेयमिवेन्द्रसूनुः ॥ ३७ ॥

अन्वयः—इन्द्रसूनुः अकृत्रिमप्रेमरसाभिरामं रामार्पितं दृष्टिविलोभि दृष्टं मनःप्रसादाञ्जलिना पाथेयम् इव निकामं जग्राह।

अकृत्रिमेति ॥ इन्द्रसूनुरर्जुनः। क्रियया निर्वृत्तः कृत्रिमः। 'ड्वितः क्त्रिः' इति क्त्रिः। 'क्त्रेर्मम्नित्यम्' इति मम्प्रत्ययः। तद्विरुद्धम्। प्रेमैव रसः। अकृत्रिमेण प्रेमरसेनाभिरामम्। अन्यत्र प्रेमरसेन मधुरादिना चाभिरामम्। रामया रमण्यार्पितम्। दृष्टिं विलोभयतीति दृष्टिविलोभि। दृष्टिप्रियमित्यर्थः। दृष्टं दर्शनम्। 'नपुंसके भावे क्तः'। मनःप्रसादः। प्रसन्नं मन इत्यर्थः। सोऽञ्जलिरिवेत्युपमितसमासः। तेन मनःप्रसादाञ्जलिना। पथि साधु पाथेयं शम्बलमिव। 'पथ्यतिथिवसतिस्वपतेर्ढञ्' निकाममतिशयेन जग्राह। रामार्पितं पाथेयं पथि क्षेमाय भवतीत्यागमः ॥

सुबो०—इन्द्रसूनुः (अर्जुनः) अकृत्रिमप्रेमरसाभिरामं (स्वाभाविकानुरागेण मनोरमं) रामार्पितं (रमण्या दत्तं) दृष्टिविलोभि (नयनाकर्षकं) दृष्टं (दर्शनं) मनःप्रसादाञ्जलिना

( प्रसन्नमनोरूपेण अञ्जलिना ) पाथेयं ( सम्बलम् ) इव निकामं ( पर्य्याप्तं यथा स्यात्तथा ) जग्राह ( गृहीतवान् ) ।

समासः— अकृत्रिमप्रेमरसाभिरामम् = प्रेमैव रसः, अकृत्रिमः प्रेमरसः, तेन अभिरामं तत् । रामार्पितम् = रामया अर्पितं तत् । दृष्टिविलोभि = दृष्टिं (नयनं—करणे क्तिन्) विलोभयति यत् तत् । मनःप्रसादाञ्जलिना = मनसः प्रसादः, स एव अञ्जलिः तेन ।

व्या०—अर्पितम् = ऋ + णिच् + क्त । दृष्टम् = दृश + भावे क्त । निकामम् = क्रियाविशेषणम् । 'काम प्रकामं पर्य्याप्त निकामेष्टं यथेप्सितम्' इत्यमरः । जग्राह = ग्रह + लिट् ।

वाच्य—इन्द्रसूनुना रामार्पितं दृष्टं पाथेयमिव जगृहे ।

सरलार्थः—द्रौपदी अर्जुनं प्रति मधुरदृष्टिं पातयामास॥ ३७॥

धैर्यावसादेन हृतप्रसादा
वन्यद्विपेनेव निदाघसिन्धुः ।
निरुद्धबाष्पोदयसन्नकण्ठ-
मुवाचकृच्छ्रादिति राजपुत्री ॥ ३८ ॥

अन्वयः—वन्यद्विपेन निदाघसिन्धुः इव धैर्य्यावसादेन हृतप्रसादा राजपुत्री निरुद्धबाष्पोदयसन्नकण्ठं कृच्छ्रात् इति उवाच ।

धैर्येति ॥ वन्यद्विपेन । वन्यग्रहणमुच्छृङ्खलत्वद्योतनार्थम् । निदाघसिन्धुर्ग्रीष्मनदीव । निदाघग्रहणं दौर्बल्यद्योतनार्थम् । धैर्यावसादेन धैर्यभ्रंशेन कर्त्रा हृतप्रसादा हृतनैर्मल्या । क्षोभं गमितेत्यर्थः । राजपुत्री क्षत्रियसुता द्रौपदी । अतः क्षात्रयुक्तमेव वक्ष्यतीति भावः । निरुद्धबाष्पोदयं संरुद्धरोदनं सन्नकण्ठं हीनस्वरम् । अथ तयोरुभयोः कृतबहुव्रीह्योः क्रियाविशेषणयोर्विशेषणसमासः । कृच्छ्रात्कथंचिदिति वक्ष्यमाणमुवाच ॥

सुबो०—वन्यद्विपेन ( वन्यगजेन ) निदाघसिन्धुः ( ग्रीष्मकालस्य नदी ) इव धैर्य्यावसादेन ( धैर्य्यच्युत्या ) हृतप्रसादा

( नाशितनैर्मल्या, मलिनीकृतेत्यर्थः ) राजपुत्री ( द्रुपदराजकन्या ) निरुद्धबाष्पोदयसन्नकण्ठं ( अश्रुवेगसंवरणेन रुद्धकण्ठं यथा स्यात् तथा, बाष्पगद्गदं ) कृच्छ्रात् ( कष्टेन ) इति ( वक्ष्यमाणम् ) उवाच ।

समासः—धैर्य्यावसादेन = धैर्य्यस्य अवसादः तेन । हृतप्रसादा = हृतः प्रसादः यस्याः सा । वन्यद्विपेन = वन्यः द्विपः तेन । निदाघसिन्धुः = निदाघस्य सिन्धुः । ग्रीष्म उष्मकः । निदाघ उष्णोपगमः ' इत्यमरः । ' देशे नदविशेषेऽब्धौ सिन्धुर्ना सरिति स्त्रियाम् ' इत्यमरः । निरुद्धबाष्पोदयसन्नकण्ठम् = बाष्पाणाम् उदयः बाष्पोदयः, निरुद्धः बाष्पोदयः निरुद्धबाष्पोदयः, तेन सन्नः कण्ठो यस्मिन् तत् ।

व्या०— सन्न = सद + क्त । कृच्छ्रात् = 'करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्त्ववचनस्य' इति पञ्चमी ।

वाच्य०—निदाघसिन्ध्वा इव हृतप्रसादया राजपुत्र्या इति ऊचे ।

सरलार्थ०—ततो द्रौपदी बाष्पगद्गदमेतदुवाच ॥ ३८ ॥

मग्नां द्विषच्छद्मनि पङ्कभूते
संभावनां भूतिमिवोद्धरिष्यन् ।
आधिद्विषामा तपसां प्रसिद्धे-
रस्मद्विना मा भृशमुन्मनीभूः ॥ ३९ ॥

अन्वयः—पङ्कभूते द्विषच्छद्मनि मग्नां सम्भावनां भूतिमिव उद्धरिष्यन् आधिद्विषां तपसाम् आ प्रसिद्धेः अस्मत् विना भृशं मा उन्मनीभूः ।

मग्नामिति ॥ पङ्कभूते पङ्कोपमिते । ' भूतं क्ष्मादौ पिशाचादौ न्याय्ये सत्योपमानयोः ' इति विश्वः । द्विषच्छद्मनि शत्रुकपटे मग्नाम् । दुरुद्धरामित्यर्थः । संभावनां योग्यताम् । गौरवमिति यावत् । भूतिं संपदमिव । ' भूतिर्भस्मनि संपदि ' इत्यमरः । उद्धरिष्यन् । उद्धारकस्त्वमिति शेषः । आधिद्विषां दुःखच्छिदां तपसामा प्रसिद्धेः सम्यक्सिद्धिपर्यन्तमस्मद्विना । अस्माभिर्विने-

त्यर्थः । 'पृथग्विना—' इत्यादिना विकल्पात्पञ्चमी । भृशं मोन्मनीभूः । अस्मद्विरहादुदुर्मना मा भूरित्यर्थः । दौर्मनस्यस्य तपःपरिपन्थित्वादिति भावः । 'माङि-' इत्याशीरर्थे लुङ् । 'न माङ्योगे' इत्यडागमप्रतिषेधः । अनुन्मना उन्मनाः संपद्यमान उन्मनी । अभूततद्भावे च्विः । 'अरुर्मनश्चक्षुश्चेतोरहोरजसां लोपश्च' इति सकारलोपः । 'अस्य च्वौ' इतीकारः ॥

सुबो०—पङ्कभूते ( पङ्कसदृशे ) द्विषच्छद्मनि ( शत्रूणां कपटे ) मग्नां ( अन्तर्गतां ) संभावनां ( समाननां, गौरवं ) भूतिं ( सम्पदम् ) इव उद्धरिष्यन् ( उत्तोलयिष्यन् त्वम् ) आधिद्विषां ( मनक्लेशनाशिनां ) तपसां ( तपस्यानाम् ) आ प्रसिद्धेः सिद्धिपर्य्यन्तम् ) अस्मत् विना ( अस्माकं विरहेण ) भृशम् (अत्यन्तम् मा उन्मनीभूः ( उत्कण्ठितचित्तो न भव ) ।

समा०—द्विषच्छद्मनि = द्विषतां छद्म तस्मिन् । पङ्कभूते = पङ्कस्यभूतः ( समं ) तस्मिन् । "युक्तेक्ष्मादावृते भूतं प्राणयतीति समं त्रिषु" इत्यमरः । आधिद्विषाम् = आधये ( मनोव्यथाये ) द्विषन्ति यानि तेषाम् ।

व्या०—मग्नाम् = मस्ज + क्त । उद्धरिष्यन् = उद्-हृ + लृटः शतृ । प्रसिद्धेः = आङ्योगे पञ्चमी । अस्मत् = विनायोगे पञ्चमी । उन्मनीभूः = अनुन्मनाः उन्मनाः सम्पद्यमानः इति उन्मनी, अभूततद्भावेच्विः सलोपश्च; भूः = अस + लुङ्; नित्योगतिसमासः । माङ्योगे अडागमाभावः ।

वाच्य०— सम्भावनाम् उद्धरिष्यता त्वया मा उन्मन्यभावि ।

सरलार्थः—शत्रुणा कपटेन हृतस्य राज्यस्य उद्धरणाय यानि तपांसि चरितुं गच्छसि, यावत् तेषां सिद्धिर्नभवति तावत् अस्मदर्थम् उत्कण्ठितो मा भूः ॥ ३९ ॥

अथ अनुत्कण्ठाया दार्ढ्यार्थं तस्याः सर्वार्थसिद्धिनिदानत्वमाह—

यशोऽधिगन्तुं सुखलिप्सया वा
मनुष्यसंख्यामतिवर्तितुं वा ।
निरुत्सुकानामभियोगभाजां
समुत्सुकेवाङ्कमुपैति सिद्धिः ॥ ४० ॥

अन्वयः—यशः अधिगन्तुं सुखलिप्सया वा मनुष्यसंख्याम् अतिवर्तितुं वा अभियोगभाजां निरुत्सुकानां सिद्धिः समुत्सुका इव अङ्कम् उपैति।

यश इति ॥ यशोऽधिगन्तुम्। कीर्तिं लब्धुमित्यर्थः। सुखस्य लिप्सया लब्धुमिच्छया वा। मनुष्यसंख्यां मनुष्यगणनामतिवर्तितुमतिक्रमितुं वा। अमानुषं कर्म कर्तुं वेत्यर्थः। अभियोगभाजामभिनिवेशवतां निरुत्सुकानामनुत्सुकानाम्। अदुर्मनायमानानामित्यर्थः। सिद्धिः पूर्वोक्तं यशः सुखाद्यर्थसिद्धिश्च। समुत्सुकेवानुरक्तकान्तेवोङ्कमुत्सङ्गमन्तिके चोपैति। तस्मादस्मद्विरहदुःखमातपःसिद्धेः सोढव्यमिति भावः॥

सुबो०—यशः (कीर्त्तिम्) अधिगन्तुं (प्राप्तुं), सुखलिप्सया (सुखलाभेच्छया, सुखं लब्धुं) वा; मनुष्यसंख्याम् अतिवर्त्तितुं (मनुष्यमध्ये या गणना ताम् अतिक्रमितुं, अलौकिकं कर्म्मकर्त्तुं) वा अभियोगभाजाम् (अभिनिविष्टानां, प्रवृत्तानां जनानां निरुत्सुकानाम् (उत्कण्ठारहितानां सतां) सिद्धिः (यश आदिकार्य्यसम्पत्) समुत्सुका इव (उत्कण्ठावती इव, तान् वरीतुं व्यग्रा इव) अङ्कम् (उत्सङ्गं, समीपम्) उपैति (प्राप्नोति)।

समासः—सुखलिप्सया=सुखस्य लिप्सा तया। मनुष्यसंख्याम्=मनुष्याणां संख्या ताम्। निरुत्सुकानाम्=न उत्सुकाः तेषाम् (नञर्थो निरशब्दः)। अभियोगभाजाम्=अभियोगं भजन्ते ये तेषाम्।

व्या०—लिप्सया=लभ+सन्+अ, धनेन वसतीत्यादिवत् हेतौ (निमित्तार्थे) तृतीया। भाजाम्=भज+ण्वि। उपैति=उप-इ+लट्।

वाच्य—समुत्सुकया सिद्धया अङ्कः उपेयते।

सरलार्थः—यशसे सुखाय असाधारणकर्म्मणे च तपस्याद्याचरणे ये उत्कण्ठां परित्यज्य प्रवर्त्तन्ते, तेषां निश्चितमेव अभीष्टसिद्धिर्भवति॥ ४०॥

अथास्य मन्यूद्दीपनद्वारा तपःप्रवृत्तिं द्रढयितुम् अरिनिकारं तोषत् चतुर्भिः उद्घाटयति—

लोकं विधात्रा विहितस्य गोप्तुं
क्षत्रस्य मुष्णन्वसु जैत्रमोजः ।
तेजस्विताया विजयैकवृत्ते-
र्निघ्नन्प्रियं प्राणमिवाभिमानम् ॥ ४१ ॥
व्रीडानतैराप्तजनोपनीतः
संशय्य कृच्छ्रेण नृपैः प्रपन्नः ।
वितानभूतं विततं पृथिव्यां
यशःसमूहन्निव दिग्विकीर्णम् ॥ ४२ ॥
वीर्य्यावदानेन कृताभिमर्श-
स्तन्वन्नभूतामिव सम्प्रतीतिम् ।
कुर्वन् प्रयामक्षयमायतीना-
मर्कत्विषामह इवावशेषः ॥ ४३ ॥
प्रसह्य योऽस्मासु परैः प्रयुक्तः
स्मर्त्तुं न शक्यः किमुताधिकर्त्तुम् ।
नवीकरिष्यत्युपशुष्यदार्द्रः
स त्वद्विना मे हृदयं निकारः ॥ ४४ ॥

अन्वयः—विधात्रा लोकं गोप्तुं विहितस्य क्षत्रस्य जैत्रम् ओजः वसु मुष्णन्, विजयैकवृत्तेः तेजस्वितायाः प्रियं प्राणम् इव अभिमानं निघ्नन्, आप्तजनोपनीतः संशय्य व्रीडानतैः नृपैः कृच्छ्रेण प्रपन्नः, पृथिव्यां वितानभूतं दिग्विकीर्णं विततं यशः समूहन् इव, वीर्य्यावदानेन कृताभिमर्शः, संप्रतीतिम् अभूताम् इव तन्वन्, अहः अवशेषः अर्कत्विषाम् इव आयतीनां प्रयामक्षयं कुर्वन्, परैः अस्मासु प्रसह्य प्रयुक्तः यः स्मर्त्तुं न शक्यः अधिकर्त्तुं किमुत, सः निकारः त्वत् विना आर्द्रः ( सन् ) उपशुष्यत् मे हृदयं नवीकरिष्यति ।

लोकमिति ॥ विधात्रा ब्रह्मणा लोकं गोप्तुं विहितस्य सृष्टस्य क्षत्रस्य क्षत्रियजातेः सम्बन्धि। जयनशीलं जेतृ तदेव जैत्रम्। जेतृशब्दात्तृन्नन्तात् 'प्रज्ञादिभ्यश्च' इति स्वार्थेऽणप्रत्ययः। ओजो बलं दीप्तिर्वा। 'ओजो बले च दीप्तौ च' इति विश्वः। तदेव वसु, धनमिति रूपकालङ्कारः। मुष्णन्नपहरन्। अरिनिकृतस्य कुतः क्षात्रं तेज इति भावः। किंच विजयैकवृत्तेर्विजयैकजीवितायाः। 'क्षत्रियस्य विजितव्यम्' इति स्मरणादिति भावः। 'वृत्तिर्वर्तनजीवने' इत्यमरः। तेजस्वितायाः। तेजस्विनामित्यर्थः। तेजःप्राधान्यद्योतनार्थं भावप्रधानोनिर्देशः। प्रियं प्राणमिव। प्राणसममित्यर्थः। अभिमानमहंकारं निघ्नन्खण्डयन्। तेजस्विनां प्राणहानिप्राया मानहानिरिति भावः॥

व्रीडेति ॥ पुनश्च। आप्तजनेनोपनीतः साधितः। प्रापित इत्यर्थः। तथापि संशय्य संदिह्य। असंभावितबुद्ध्येति भावः। व्रीडानतैः। जुगुप्सितवृत्तान्तश्रवणादिति भावः। नृपैर्देशान्तरस्थैः कृच्छ्रेण प्रपन्नैः। आप्तोक्तत्वात्कथंचिद्विश्वस्त इत्यर्थः। यः शृण्वतामपि दुःसहः किमुतानुभवतामिति भावः। इत्येषा पूर्वेषां व्याख्या। अन्यथा च व्याख्यायते---आप्तजनोपनीतो ज्ञातिकृतः संशय्य कथमिदमन्याय्यमुपेक्ष्यमिति विचार्य व्रीडानतैः। जुगुप्सितकर्मदर्शनादिति भावः। नृपैस्तत्रस्थैः कृच्छ्रेण प्रपन्नोऽङ्गीकृतः। गोत्रकलहेण मध्यस्थैरुदासितव्यमिति बुद्ध्योपेक्षित इत्यर्थः। पक्षद्वयेऽपि प्रपन्न इत्यत्राप्तजनोपनीतत्वस्य पदार्थभूतस्य विशेषगुणत्यागहेतुत्वोक्त्या काव्यलिङ्गमलंकारः। पृथिव्यां वितानभूतमुल्लोचोपमितम्। यद्वा वितानभूतं वितानसमम्। उल्लोचतुल्यमिति यावत्। 'युक्ते दमादावृते भृत प्राण्यतीते समं त्रिषु, इत्यमरः। 'अस्त्री वितानमुल्लोचः' इत्यमरः। दिग्विकीर्णं दिगन्तलग्नम्। वितानमपि दिगन्तलग्नमितिभावः। विततं प्रथितं यशःसमूहन्निव संकोचयन्निवेत्युत्प्रेक्षा। अरातिपरिभूतस्य कुतः कीर्तिरिति भावः॥

वीर्येति ॥ पुनश्च। वीर्याण्येवावदानानि तेषु कृतावमर्षः कृतास्कन्दनः। पुराकृतपराक्रमजातान्यपि प्रमृजन्नित्यर्थः। 'अवदानं कर्म वृत्तम्' इत्यमरः। अत एव संप्रतीतिं ख्यातिम्। 'प्रतीते प्रथितख्यातवित्तविज्ञानविश्रुताः, इत्यमरः। अभूतामविद्यमानामिवेत्युत्प्रेक्षा। सतोऽप्यसत्त्वमुत्प्रेक्ष्यते। तन्वन्कुर्वन्। पुनश्चा-

ह्रोऽवशेषो दिनान्तोऽर्कस्त्विषामिवायतीनामुत्तरकालानां प्रयामक्षयं दैर्घ्यनाशं कुर्वन्निति श्रौती पूर्णेयमुपमा । अरिनिराकृतस्य कुतश्चिरावस्थानामिति भावः ॥

प्रसह्येति । पुनश्च । परैः शत्रुभिरस्मासु प्रसह्य प्रयुक्त आचरितो यो निकारः परिभवः केशाकर्षणरूपः स्मर्तुं न शक्यः । अधिकर्तुमनुभवितुं किमुत । यस्य स्मरणमपि दुःसहमनुभवस्तु दुःसह इति किमु वक्तव्यमित्यर्थः । स निकारस्त्वद्विना त्वया विना । 'पृथग्विना–' इत्यादिना पञ्चमी । आर्द्रःसन्कुताश्चिदभिभूतात्पुराणप्रहार इव । त्वद्विरहदुःखात्पुनर्नवीकरिष्यति । नवीभविष्यतीत्यर्थः । उपशुष्यत् । त्वया विना शुष्कमिति भावः । दुःखस्तम्भनं शोषपदार्थो मे हृदयं नवीकरिष्यत्याद्रीकरिष्यति । ब्रणमिवेति भावः । दुःखितस्य पुनर्दुःखोपचयः । प्रशान्तप्रायमपि दुःखहेतुं पुनरुद्घाटयतीत्यर्थः । अत्र शोषादिविशेषणसाम्याद्व्रणाद्यप्रस्तुतार्थप्रतीतेः समासोक्तिरलंकारः ॥

सुबो०—विधात्रा ( ब्रह्मणा ) लोकं ( भुवनं ) गोप्तुं (रक्षितुं) विहितस्य ( सृष्टस्य ) क्षत्रस्य ( राजन्यस्य ) जैत्रं ( जयशीलम् ) ओजः ( बलं, तेजो वा ) वसु ( धनम् ओजोरूपं धनं ) मुष्णन् ( हरन्, नाशयन्–एवंभूतो यो निकारः, तथा ) विजयैकवृत्तेः ( विजयैकजीविकायाः, केवलविजयोपजीविकायाः ) तेजस्वितायाः ( तेजस्विनामित्यर्थः ) प्रियं प्राणम् इव प्राणसमं (गर्वं) निघ्नन् ( नाशयन् ) आप्तजनोपनीतः ( विश्वस्तजनैरुदाहृतोऽपि ) संशय्य ( सन्दिह्य ) व्रीडानतैः ( जुगुप्सितकर्म्मश्रवणसंजातया लज्जया अवनतमुखैः ) नृपैः ( दूरदेशस्थैः राजभिः ) कृच्छ्रेण ( कष्टेन, कथमपि ) प्रपन्नः ( विश्वस्तः ) अथवा आप्तजनोपनीतः ( अस्मदीयैर्ज्ञातिभिरेव कृतः ), संशय्य ( भयमं स्वप्नोऽयं वा सत्योऽथ वेति सन्दिह्य ) व्रीडानतैः (पश्चात् सत्योऽयमिति निश्चित्य जुगुप्सितकर्म्मदर्शनसंजातया लज्जया अवनतमुखैः ) नृपैः द्यूतसभास्थितैः राजभिः ) कृच्छ्रेण (कष्टेन, राज्ञो विप्रियशङ्कया

कथञ्चित् ) प्रपन्नः ( अनुमोदितः ) पृथिव्यां वितानभूतं ( सभागृहाद्याच्छादनवस्त्रसदृशं ) दिग्विकीर्णं ( दिशि दिशि व्याप्तं ) विततं ( विस्तीर्णं ) यशःसमूहन् ( संकोचयन् ) इव, वीर्य्यावदानेषु ( वीरत्वप्रकाशरूपेषु पुराकृतकर्म्मसु ) कृताभिर्शः ( कृता क्रमणः ) अतएव सम्मतीर्ति ( ख्यातिम् ) अभूताम् ( अविद्यमानां ) इव तन्वन् ( कुर्वन् ), अह्नः अवशेषः ( दिनावसानम् ) अर्कत्विषाम् ( सूर्य्यप्रभावानाम् ) इव आयतीनाम् (उत्तरकालानां, युष्माकं स्थितिकालानां ) प्रयामक्षयं (दैर्घ्यनाशं) कुर्वन् ( विदधत् एवंभूतः ) परैः ( शत्रुभिः ) अस्मासु प्रसह्य ( बलात् ) प्रयुक्तः आचरितः ) यः ( निकारः ) स्मर्तुं ( मनसि कर्तुम् अपि ) न शक्यः ( न पारणीयः ) अधिकर्तुम् ( अनुभवितुं ) किमुत, स निकारः ( मदीयकेशाकर्षणरूपः परिभवः ) त्वत् विना ( त्वां विना, त्वद्विरहेण आर्द्रः ( सरसः सन्, नूतनः सन् ) उपशुष्यत् ( शोषमाप्नुवत्, मे ( मम ) हृदयं ) नवीकरिष्यति ( नूतनयिष्यति आघातजं क्षतं कालेन शुष्यत् अन्याघातेन यथा नवीभवति, तथा शत्रुकृतः स निकारः इयता कालेन विस्मर्य्यमाणः त्वद्विरहेण पुनर्नवीभविष्यति इतिभावः )।

समासः—विजयैकवृत्तेः = विजय एव एका वृत्तिर्यस्याः तस्याः। व्रीडानतैः = व्रीडया नताः तैः। आप्तजनोपनीतः = आप्ताः जनाः आप्तजनाः, तैः उपनीतः। दिग्विकीर्णम् = दिशु विकीर्णम्। वीर्य्यावदानेषु = वीर्य्याण्येव अवदानानि तेषु 'अवदानं कर्म वृत्तम्' इत्यमरः। कृताभिमर्शः = कृतः अभिमर्शः येन सः। प्रयामक्षयम् = प्रयामस्य क्षयः तम्। अर्कत्विषाम् = अर्कस्य त्विषः तासाम्।

व्या०—गोप्तुम् = गुप + तुमुन्। मुष्णन् = मुष + शतृ (मुष्णन्नित्यादीनि सर्वाणि प्रथमान्तपदानि विकारस्य विशेषणानि)। जेत्रम् = जि + शीलार्थे तृच् = जेतृ + स्वार्थे अण्। निघ्नन् = निहन + शतृ। संशय्य = सम्—शी + ल्यप्। प्रपन्नः = प्र—पद् + क्त। विततम् = वितन् + क्त।

समूहन् = सम्-ऊह + शतृ । विकीर्णम् = वि-कॄ + क्त । तन्वन् = तन + शतृ । नवीकरिष्यति = अनवं नवं सम्पद्यमानं करिष्यतीति च्विः । उपशुष्यत् = उप-शुष + शतृ । त्वत् = विनायोगे पञ्चमी । निकारः = नि-कॄ + घञ्; 'निकारः स्यात् परिभवे' इति मेदिनी ।

वाच्य०—मुष्णता निघ्नता आप्तजनोपनीतेन प्रपन्नेन समूहता कृताभिमर्शेन तन्वता कुर्वता अह्नः अवशेषेण इव येन प्रयुक्तेन शक्येन भूपते, तेन आर्द्रेण निकारेण मे उपशुष्यत् हृदयं नवीकरिष्यते ।

सरलार्थः—द्यूतसभायां शत्रवो मम केशग्रहणरूपं यम् अपमानं कृतवन्तः, स क्षत्रियाणां तेजोनाशकः, दर्पहारी च केनचित् विश्वसितुमशक्यः, भवतां दिगन्तविश्रुतयशसो विलोपी पूर्वप्रदर्शितवीरत्वस्य अपलापकारी अचिरेण अस्तित्वलोपकारी च, मनसो चिन्तयितुमपि अशक्यः किमुत अनुभवितुम् । एवंभूतो योऽपमानः इयता कालेन शनैः शनैः मनसोऽपसरन्नपि इदानीं भवद्विरहेण पुनर्नवीभवति ॥ ४४ ॥

पुनः प्रकारान्तरेण मन्युमुद्दीपयति—

प्राप्तोऽभिमानव्यसनादसह्यं
दन्तीव दन्तव्यसनाद्विकारम् ।
द्विषत्प्रतापान्तरितोरुतेजाः
शरद्घनाकीर्ण इवादिरह्नः ॥ ४५ ॥

सव्रीड़मन्दैरिव निष्क्रियत्वा-
दत्यर्थमस्त्रैरवभासमानः ।
यशःक्षयात् क्षीणजलार्णवाभ-
स्त्वमन्यमाकारमिवाभिपन्नः ॥ ४६ ॥

अन्वयः—अभिमानव्यसनात् दन्तव्यसनात् दन्ती इव असह्यं विकारं प्राप्तः, द्विषत्प्रतापान्तरितोरुतेजाः शरद्घनाकीर्णः अह्नः आदिः इव, निष्क्रियत्वात् सव्रीड़मन्दैः इव अस्त्रैः अत्यर्थं

न अवभासमानः, यशःक्षयात् क्षीणजलार्णवाभः त्वम् अन्यम् आकारम् अभिपन्नः इव।

अभिमानस्य व्यसनाद्भ्रंशात् 'व्यसनं विपदि भ्रंशे दोषे कामजकोपजे' इत्यमरः दन्तव्यसनाद्दन्तभङ्गाद्दन्तीवासह्यं विकारं वैरूप्यं प्राप्तः। अतो न प्रत्यभिज्ञायत इति भावः। एवमुत्तरत्राप्यनुसंधेयम्। पुनश्च। द्विषत्प्रतापेन शत्रुतेजसान्तरितं तिरस्कृतमुरुतेजः प्रतापो यस्य स तथोक्तः। अत एव शरद्घनाकीर्णः शरन्मेघच्छन्नोऽह्न आदिः प्रत्यूष इव स्थितः। तद्वदेवाप्रत्यभिज्ञायमान इत्यर्थः। मध्याह्नस्तु मेघवरणेऽपि कंथचित्प्रत्यभिज्ञयत एवेत्याशयेनोक्तमादीरिति॥

सव्रीडेति॥ पुनश्च। निष्क्रियत्वादर्थक्रियाशून्यत्वात्सव्रीडमन्दैरिव सव्रीडैरत एव मन्दैरपटुभिरिव स्थितैरित्युत्प्रेक्षा। 'मूढाल्पापटुनिर्भाग्या मन्दाः' इत्यमरः। अस्त्रैरत्यर्थं नावभासमानो न प्रकाशमानः। पूर्वं तु नैवमिति भावः। किं तु यशःक्षयाद्धेतोः क्षीणजलो योऽर्णवस्तदाभस्तत्सदृशस्त्वमन्यमाकारमभिपन्नः प्राप्त इव स्थित इवेत्युत्प्रेक्षा। तस्य क्षीणजलार्णवाभ इत्युपमासंसृष्टिः॥

सुबो०—अभिमानस्य (गर्वस्य) व्यसनात् (भ्रंशात्, नाशात् हेतोः) दन्तव्यसनात् (दन्तभ्रंशात् हेतोः) दन्ती (गजः) इव असह्यं (सोढुमशक्यं) विकारं (वैरूप्यं) प्राप्तः (लब्धवान्), पुनश्च द्विषत्प्रतापान्तरितोरुतेजाः (द्विषतां शत्रूणां प्रतापेन तेजसा अन्तरितं तिरस्कृतम् उरु तेजः महत् प्रतापो यस्य तथाभूतः) अतएव शरद्घनाकीर्णः (शारदिकमेघेन आच्छन्नः) अह्नः आदिः इव (दिवसस्य प्रथमोभागः—प्रत्यूषः इव स्थितः), निष्क्रियत्वात् (वेधनादिकर्म्मरहितत्वात्, अव्यवहृतत्वादित्यर्थः) सव्रीडमन्दैः (लज्जितैः कुण्ठैश्च) इव अस्त्रैः (आयुधैः) अत्यर्थम् (अत्यन्तं) न अवभासमानः (न प्रकाशमानः) अपिच यशःक्षयात् (यशोनाशात् हेतोः) क्षीणजलार्णवाभः (शुष्कजलस्य समुद्रस्य सदृशः) त्वम् अन्यम् (अपरम्) आकारम् (आकृतिम्) अभिपन्नः (प्राप्तः) इव।

समासः—अभिमानव्यसनात्=अभिमानस्य व्यसनं तस्मात् । द्विषत्प्रतापान्तरितोरुतेजाः=द्विषतां प्रतापः, उरुतेजः उरु तेजः, द्विषत्प्रतापेन अन्तरितम् उरुतेजः यस्य सः । शरद्घनाकीर्णः=शरदः घनः, तेन आकीर्णः । सव्रीडमन्दैः=व्रीड्या सह वर्त्तमानानि सव्रीडानि, सव्रीडानि च तानि मन्दानि तैः । यशःक्षयात्=यशसः क्षयः तस्मात् । क्षीणजलार्णवाभः=क्षीणं जलं यस्य स क्षीणजलः, क्षीणजलश्चासौ अर्णवश्चेति क्षीणजलार्णवः, तस्य आभा इव आभा यस्य सः ।

व्या०—अन्तरितं=अन्तरं (व्यवधानं) कृतमिति अन्तरशब्दात् नामणिजन्तात् क्तः । अवभासमानः=अव-भास+शानच् । क्षीण=क्षि+क्त । अभिपन्नः=अभि-पद+क्त ।

वाच्य०—दन्तिना इव विकारं प्राप्तेन द्विषत्प्रतापान्तरितोरुतेजसा शरद्घनाकीर्णेन अह्नः आदित्येन, अस्त्रैः न अवभासमानेन क्षीणजलार्णवाभेन त्वया अन्यमाकारम् आभिपन्नम् ।

सरलार्थः—त्वं दर्पनाशात् विकृताकारः, तेजोनाशात् शरद्घनाच्छन्नः प्रत्यूष इव, अव्यवहृतत्वात् मलिनैरस्त्रैः न पूर्ववत् शोभमानः, यशःक्षयात् शुष्कसमुद्र इव अन्यविधम् आकारं प्राप्तः ॥ ४४ ॥ ४५ ॥ ४६ ॥

दुःशासनामर्षरजोविकीर्णै-
रेभिर्विनाथैरिव भाग्यनाथैः ।
केशैः कदर्थीकृतवीर्यसारः
कच्चित्स एवासि धनञ्जयस्त्वम् ॥ ४७ ॥

अन्वयः—दुःशासनमर्षरजोविकीर्णैः विनाथैः इव भाग्यनाथैः एभिः केशैः कदर्थीकृतवीर्य्यसारः त्वं स एव धनञ्जयः असि कच्चित् ।

दुःशासनेति ॥ पुनश्च । दुःशासनस्य हतुरार्कर्ष आकर्षणकर्षणं स एव रजो धूलिः । मालिन्यहेतुत्वादिति भावः । तेन विकीर्णैर्विक्षिप्तैरत एव विनाथैरिव स्थितवतां युष्माकमसत्त्वप्रायत्वादनाथैरिव । स्थितैरित्युत्प्रेक्षा । अन्यथा कथमियं दुर्दशेति भावः ।

किंतु भाग्यनाथैर्दैवमात्रशरणैः । अन्यथा स्वरूपमपि लुप्येतेति भावः एभिः परिदृश्यमानैः । असंयमितैरिति भावः केशैः शिरोरुहैः कुत्सितोऽर्थो वस्तु कदर्थः । अर्थोऽभिधेयैरवस्तुप्रयोजननिवृत्तिषु' इत्यमरः । 'कोः कत्तत्पुरुषेऽचि' इति कुशब्दस्य कदादेशः । कदर्थीकृतौ गर्ह्यार्थीकृतौ वीर्यसारौ शौर्यबले यस्य स तथोक्तः । इत्थं पूर्वविलक्षणस्त्वं स एव धनञ्जयोऽसि कश्चित् कच्चित्कामप्रवेदने' इत्यमरः । स एव चेत्त्वं नैवमस्मानुपेक्षस इति भावः ॥

सुबो०—दुःशासनामर्शरजोविकीर्णैः (दुःशासनकृताकर्षणरूपधूलिना विक्षिप्तैः) अतएव विनाथैः इव (वर्त्तमानेष्वपि युष्मासु नाथेषु उपेक्षमाणेषु अनाथैरिव) भाग्यनाथैः (दैवमात्रशरणैः) एभिः केशैः (मदीयैः कचैः) कदर्थीकृतवीर्य्यसारः (निन्दितशौर्य्यबलः) त्वं स एव धनञ्जयः असि कश्चित् (किम्—धनञ्जयनामा अन्योवा कश्चित्)।

समासः—दुःशासनामर्शरजोविकीर्णैः = दुःशासनस्य अमर्षः, स एव रजः, तेन विकीर्णाः तैः । भाग्यनाथैः = भाग्यमेव नाथः येषां तैः । कदर्थीकृतवीर्य्यसारः = कुत्सितौ अर्थौ (वस्तुनी) कदर्थौ, अकदर्थौ कदर्थौ कृतौ कदर्थीकृतौ (च्वि) वीर्य्यं च सारश्च वीर्य्यसारौ; कदर्थीकृतौ वीर्य्यसारौ यस्य सः ।

व्या०—केशैः = कर्त्तरि तृतीया ।

वाच्य—केशैः कदर्थीकृतवीर्य्यसारेण त्वया तेनैव धनञ्जयेन भूयते ।

सरलार्थः—दुःशासनाकृष्टैः मदीयैः केशैः धिक्कृतस्त्वं दुरन्ताधिना एवं विकृताकारः संवृत्तोऽसि यत् स एव धनञ्जयस्त्वं न वेति लोकैः संदिह्यते ॥ ४७ ॥

उपेक्षणे दोषमाह—

स क्षत्रियस्त्राणसहः सतां य-
स्तत्कार्मुकं कर्मसु यस्य शक्तिः ।
वहन्द्वयीं यद्यफलेऽर्थजाते
करोत्यसंस्कारहतामिवोक्तिम् ॥ ४८ ॥

अन्वयः—यः सतां त्राणसहः स क्षत्रियः । यस्य कर्म्मसु शक्तिः तत् कार्मुकम् । द्वयीम् उक्तिम् यदि अफले अर्थजाते वहन् ( तदा ) असंस्कारहतां इव करोति ।

स इति ॥ क्षतात्त्रायत इति क्षत्रं क्षत्रियकुलम् । 'सुपि' इति योगविभागात्कप्रत्ययः । पृषोदरादित्वात्पूर्वपदस्यान्त्यलोपः । अथवा क्षदिति क्विबन्तोपपदात्कप्रत्ययः । क्षत्रे जातः क्षत्रियः । 'क्षत्राद्घः' इति घप्रत्ययः कर्मणे प्रभवतीति कार्मुकम् । 'कर्मण उकञ्' इत्युकञ्प्रत्ययः । एवं स्थिते वाक्यार्थः कथ्यते । यः सतां साधूनाम् । सहत इति सहः । पचाद्यच् । यस्त्राणस्यो सहस्त्राणसहो रक्षणक्षमः स एव क्षत्रियशब्दवाच्यः । तथा यस्य कार्मुकस्य कर्मसु रणक्रियासु शक्तिः । अस्तीति शेषः । तदेव कार्मुकशब्दवाच्यम् । अत्रैवैतौ शब्दौ मुख्यौ । नान्यत्रेत्यर्थः । एवं स्थिते द्वयीं द्विविधामुक्तिम् । द्वाविमौ क्षत्रियकार्मुकशब्दावित्यर्थः । अफले । पूर्वोक्तावयवार्थशून्ये अर्थजाते । स्वाभिधेयसामान्यजातिमात्र इत्यर्थः । 'जातं जात्योघजन्मसु' इति विश्वः । वहन्वर्तयन् । संस्कारहतामव्युत्पत्तिदूषितामिव करोतीत्युत्प्रेक्षा । तस्मात्त्वमस्मद्रक्षणेनोक्तदोषादात्मानं मोचयस्वेत्यर्थः ॥

सुबो०—यः सतां ( साधूनां ) त्राणसहः ( रक्षणक्षमः सः क्षत्रियः ( क्षत्रियशब्दवाच्यः ) । यस्य कर्मसु ( रणक्रियासु ) शक्तिः ( सामर्थ्यं ) तत् कार्म्मुकं ( धनुः ) । द्वयीम् उक्तिं पूर्वोक्तं शब्दद्वयं, द्वौ क्षत्रियकार्मुकशब्दौ इत्यर्थः ) यदि अफले ( अर्थशून्ये, अव्युत्पन्ने, तत्तन्नामधारिमात्रे इति यावत् ) अर्थजाते ( पदार्थसमूहे, क्षत्रियकार्मुकशब्दवाच्ये व्यक्तिसमूहे ) वहन् ( धारयन् पुरुषः, तदा ) असंस्कारहतां ( असंस्कारेण अव्युत्पत्त्या हतां दूषितां ) करोति ।

समा०—त्राणसहः=त्राणस्य सहः । अफले=नास्ति फलं यस्य तस्मिन् । अर्थजाते=अर्थानां जातं तस्मिन् । असंस्कारहताम्=न संस्कारः असंस्कारः, तेन हता ताम् ।

व्या०—क्षत्रियः=क्षतः (हिंसायाः) त्रायते (रक्षति) क्षत्-त्रै+क =क्षत्र, क्षत्रस्यापत्यं पुमान् इति क्षत्र+घ (इय)। कार्मुकम्=कर्म्मणे प्रभवति इति कर्म्मन्+उकञ्।

वाच्य०—अफले अर्थजाते वहता द्वयी उक्तिः असंस्कारहता क्रियते।

सरलार्थः—क्षतस्त्रायते इति व्युत्पत्त्या क्षत्रशब्दः सिद्धः, कर्म्मणा प्रभवतीति व्युत्पत्त्या च कार्मुकशब्दः सिद्धः। यः पुरुषः क्षतः त्राणासमर्थः सन् क्षत्रकुलप्रसूतिमात्रेणैवात्मानं क्षत्रिय इति ख्यापयति, रणकर्म्माक्षमं स्वधृतं धनुश्च कार्म्मुकमिदमिति परिचाययति, स क्षत्रियकार्मुकशब्दौ अव्युत्पत्तिदोषेण कलङ्कयति। अतस्त्वमस्मान् शत्रुनिकारात् उद्धृत्य स्वस्य क्षत्रियत्वं स्वकीयधनुषश्च कार्मुकत्वं च सार्थकं कुरु। ४८।

अन्यथा त्वद्गुणा अपि नोज्जीवेयुरित्याह—

वीतौजसः संनिधिमात्रशेषा
भवत्कृतां भूतिमपेक्षमाणाः।
समानदुःखा इव नस्त्वदीयाः
सरूपतां पार्थ गुणा भजन्ते॥ ४९॥

अन्वयः—पार्थ वीतौजसः सन्निधिमात्रशेषाः भवत्कृतां भूतिम् अपेक्षमाणाः त्वदीयाः गुणाः समानदुःखाः इव नः सरूपतां भजन्ते।

वीतेति॥ हे पार्थ, वीतौजसो निष्प्रभाः संनिधिमात्रशेषाः सत्तामात्रावशिष्टा भवत्कृतां भवता करिष्यमाणाम्। 'आशंसायां भूतवच्च' इति भूतवत्प्रत्ययः। भूतिमभ्युदयमपेक्षमाणास्त्वदीया गुणाः समानदुःखाः समदुःखभाज इव नोऽस्माकं सरूपतां वीतौजस्त्वादिसाधर्म्यं भजन्त इत्युपमा। सा च समानदुःखा इवेत्युत्प्रेक्षया वीतौजस्त्वादिसम्भावितयानुप्राणितेत्यनुसन्धेयम्॥

सुबो०—हे पार्थ (अर्जुन) वीतौजसः (हतप्रभावाः) अतएव सन्निधिमात्रशेषाः (सत्तामात्रावशिष्टाः) तथा भवत्कृतां (त्वया

करिष्यमाणामित्यर्थः भूतिम् ( अभ्युदयम् ) अपेक्षमाणाः (आशासानाः) त्वदीयाः गुणाः (वीर्य्यशौर्य्यादयः) समानदुःखाः तुल्यदुःखाः इव नः (अस्माकं) सरूपतां (सादृश्यं, वीतौजस्त्वादिगुणसाम्यं) भजन्ते (आश्रयन्ति) ।

समा०—वीतौजसः=वीतम् ओजो येषां ते । सन्निधिमात्रशेषाः=सन्निधिरेव सन्निधिमात्रं, तत् शेषः येषां ते। भवत्कृताम्=भवता कृता ताम् ( 'आशंसाया भूतवच्च, इति भूते क्तः ) । समानदु.खाः=समानं दुःखं येषां ते । सरूपताम्=समानं रूपं येषां ते सरूपाः, तेषां भावः तत्ता ताम् ।

व्या० —भजन्ते=भज+लट् ।

वाच्य०—वीतौजोभिः सन्निधिमात्रशेषैः भूतिम् अपेक्षमाणैः समानदुःखैः इव त्वदीयैः गुणैः नः सरूपता भज्यते ।

सरलार्थः—वयं यथा निष्प्रभाः सत्तामात्रावशिष्टा भवत्कृतमभ्युदयम् अपेक्षामहे, तव गुणा अपि अस्मत्समदुःखभागिनः सन्तः तथा वर्त्तन्ते । अतो भवदुपेक्षया यथा अस्माकं नाशः तथा भवद्गुणानामपीति ।। ४९ ।

तथापि ममैव कोऽयं भार इत्यत आह—

आक्षिप्यमाणं रिपुभिः प्रमादा-
न्नागैरिवालूनसटं मृगेन्द्रम् ।
त्वां धूरियं योग्यतयाधिरूढा-
दीप्त्या दिनश्रीरिव तिग्मरश्मिम् ॥ ५० ॥

अन्वयः—प्रमादात् रिपुभिः आक्षिप्यमाणम्, नागैः आलूनसटं मृगेन्द्रम् इव त्वाम् इयं धूः तिग्मरश्मिं दीप्त्या दिनश्रीः इव योग्यतया अधिरूढा ।

आक्षिप्येति ॥ प्रमादात्प्रज्ञाहीनत्वात् । नतु दौर्बल्यादिति भावः। रिपुभिराक्षिप्यमाणमाधिक्षिप्यमाणमत एव प्रमादात् । नागैर्गजैः । 'ग्रहेभाहिजा नागाः' इति वैजयन्ती । आलूनसटमाक्षिप्तकेसरम् । 'सटा जटाकेसरयोः' इत्यमरः मृगेन्द्रं सिंहमिव स्थितम् । त्वामियं

धूः कार्यभारः। तिग्मरश्मिं सूर्यं दीप्त्या दिनश्रीरिव योग्यतया निर्वाहकतयाधिरूढारूढवती। कर्तरि क्तः। त्वदधीनेत्यर्थः॥

सुबो०—प्रमादात् ( अनवधानतया औदास्यादित्यर्थः ) रिपुभिः ( शत्रुभिः ) आक्षिप्यमाणां ( तिरस्क्रियमाणाम् ) अतएव नागैः ( गजैः मूषिकैर्वा ) आलूनसटं ( छिन्नकेसरं ) मृगेन्द्रम् इव ( सिंहमिव स्थितं ) त्वाम् इयं धूः ( कार्य्यभारः ) तिग्मरश्मिं ( सूर्य्यं ) दीप्त्या ( प्रभया ) दिनश्रीः ( दिवसशोभा ) इव योग्यतया ( निर्वाहसमर्थतया ) अधिरूढा ( आरूढवती )।

समासः—आलूनसटम् = आलूनाः सटाः यस्य तम्। तिग्मरश्मिम् = तिग्माः ( प्रखराः ) रश्मयः ( किरणाः ) यस्य तम्।

व्या०—आक्षिप्यमाणाम् = आङ्-क्षिप + कर्म्मणि शानच्। नागैः = 'नागः पन्नगमातङ्ग-क्रूरचारिषु तोयदे' इति मेदिनी। अधिरूढा = अधि रुह + क्त। वाच्य—रिपुभिः आक्षिप्यमाणः नागैः आलूनसटः मृगेन्द्रः इव त्वम् अनया धुरा दिनश्रिया तिग्मरश्मिरिव अधिरूढः।

सरलार्थः—यथा औदास्यात् सिंहो नागैरालूनकेसरो भवति, तथा त्वं औदास्यादेव शत्रुभिरेवमभिभूतोऽसि, न तु हीनबलत्वात्। अतः सूर्य्यो यथा दीप्त्या दिनश्रियं सम्पादयितुं समर्थः, न तु अनलादिः, तथा त्वमेव योग्यतया शत्रुपराभवरूपं कार्य्यं साधयितुं समर्थः, न त्वन्ये भ्रातरः॥ ५०॥

पूर्वं निर्व्यवसायस्य दोष उक्तः, इदानीं व्यवसायिनो गुणमाह—

करोति योऽशेषजनातिरिक्तां
सम्भावनामर्थवतीं क्रियाभिः।
संसत्सु जाते पुरुषाधिकारे
न पूरणीं तं समुपैति संख्या॥ ५१॥

अन्वयः—यः अशेषजनातिरिक्तां संभावनां क्रियाभिः

अर्थवतीं करोति, तं संसत्सु पुरुषाधिकारे जाते ( सति ) पूरणी संख्या न समुपैति ।

करोतीति ॥ यः पुमानशेषजनादितरजनादतिरिक्तामधिकाम् । सर्वातिशायिनीमित्यर्थः । सम्भावनां योग्यतां क्रियाभिश्चरितैरर्थवतीं सफलां करोति । तं पुमांसं संसत्सु 'सभासमितिसंसदः' इत्यमरः । पुरुषाधिकारे योग्यपुरुषगणनाप्रस्तावे जाते सति । पूर्यतेऽनयेति पूरणी संख्या द्वित्वादिसंख्या न समुपैति न गच्छति । अद्वितीयो भवतीत्यर्थः।तस्मादसाधारणलाभाय त्वयापि महानुत्साह आस्थेय इति भावः ॥

सुबो०—यः ( पुरुषः ) अशेषजनातिरिक्तां ( सर्वजनेभ्योऽधिकां, निखिलजनातिशायिनीं ) संभावनां ( योग्यतां ) क्रियाभिः ( कार्य्यैः ) अर्थवतीं ( सफलां ) करोति, तं ( पुरुषं ) संसत्सु ( सभासु गोष्ठीषु ) पुरुषाधिकारे ( योग्यपुरुषगणनाप्रस्तावे ) जाते ( प्रवृत्ते सति ) पूरणी संख्या ( पूरणवाचिका द्वित्र्यादि संख्या ) न समुपैति ( न प्राप्नोति—सर्वप्रथममेव तस्य नाम गृह्यते इति भावः )।

समासः—अशेषजनातिरिक्ताम् = अशेषाः जनाः, तेभ्यः अतिरिक्ताम् । पुरुषाधिकारे = पुरुषाणाम् अधिकारः तस्मिन् ।

व्या०—पूरणी = पूर्य्यते अनयेति पूर् + णिच् + करणे ल्युट् । समुपैति = सम्–उप–इ + लट् ।

वाच्य—येन अशेषजनातिरिक्ता संभावना अर्थवती क्रियते, सः पूरणया संख्यया न समुपेयते ।

सरलार्थः—यः पुरुषः सर्वातिरिक्तं बलविक्रमं प्राप्य कर्म्मभिस्तं सार्थकं करोति, सभायां वीरपुरुषगणनावसरे तस्य नाम प्रथममेव कीर्त्त्यते । अन्यथा तस्य जन्म निरर्थकम् । तथा चोक्तम्—गुणिगणगणनारम्भे न पतति कठिनी सुसंभ्रमाद् यस्य । तेनाम्बा यदि सुतिनी वद वन्ध्या कीदृशी भवति ॥५१॥

अथाशिषं प्रयुङ्क्ते—

प्रियेषु यः पार्थ विनोपपत्ते-
र्विचिन्त्यमानैः क्लममेति चेतः
तव प्रयातस्य जयाय तेषां
क्रियादघानां मघवा विघातम् ॥ ५२ ॥

अन्वयः—पार्थ प्रियेषु उपपत्तेः विना विचिन्त्यमानैः यैः चेतः क्लमम् एति, जयाय प्रयातस्य तव तेषाम् अघानां मघवा विघातं क्रियात् ।

प्रियेष्विति ॥ हे पार्थ, प्रियेष्वस्मासु विषय उपपत्तेः कारणाद्विनैव विचिन्त्यमानैरकस्मादेवाशङ्क्यमानैर्यैरघैश्चेतः क्लमं खेदमेति । जयाय प्रयातस्य तव सम्बन्धिनां तेषामघानां व्यसनानाम् । 'दुःखैनोव्यसनेष्वघम्' इत्यमरः । मघवेन्द्रः । योऽस्माभिरुपास्यत इति भावः । विघातं निवारणं क्रियात्करोतु । आशिषि लिङ् । तस्मादस्मच्चिन्तया न चेतः खेदयितव्यं जयार्थिना त्वया । अन्यथा तदसंभवादिति भावः ॥

सुबो०—हे पार्थ (पृथातनय अर्जुन) प्रियेषु (प्रेमपात्रेषु अस्मासु विषयेषु) उपपत्तेः विना (कारणात् विना) विचिन्त्यमानैः (प्रवासिना त्वया आशङ्क्यमानैः) यैः (अघैः) चेतः (मनः) क्लमं (खेदम्) एति (प्राप्नोति) जयाय (जयलाभोपायभूताय तपसे इत्यर्थः) प्रयातस्य (प्रस्थितस्य) तव तेषाम् अघानाम् (अनिष्टानां) मघवा (इन्द्रः—तव पितृभूतः विघातं (निवारणं) क्रियात् (कुरुतात्) ।

व्या०—एति = इ + लट् । क्रियात् = कृ + आशीर्लिङ् ।

वाच्य०— चेतसा क्लमः ईयते । मघोना विघातः कृषीष्ट ।

सरलार्थः—प्रवासिनस्तव प्रियजनेष्वस्मासु अकारणं यानि अनिष्टान्याशङ्क्य मनःखेदो जायते, तानि भगवान् इन्द्रः शमयति । तदर्थं खेदं मा कुरु । ५२

अथ कर्तव्यमुपदिशति—

मा गाश्चिरायैकचरः प्रमादं
वसन्नसंबाधशिवेऽपि देशे ।
मात्सर्यरागोपहतात्मनां हि
स्खलन्ति साधुष्वपि मानसानि ॥ ५३ ॥

अन्वयः—असंबाधशिवे अपि देशे चिराय एकचरः वसन् प्रमादं मा गाः । मात्सर्य्यरागोपहतात्मनां मानसानि साधुषु अपि स्खलन्ति हि ।

मा गा इति ॥ असंबाधोऽसङ्कटः । विजन इत्यर्थः । संकटं ना तु सम्बाधः' इत्यमरः । शिवो निर्बाधः । द्वयोरन्यतरस्य विशेष्यत्वविवक्षायां विशेषणसमासः । अस्मिन्नसम्बाधशिवेऽपि देशे चिराय चिरमेकश्चासौ चरश्चेत्येकचर एकाकी वसन्प्रमादं दौर्बल्यं मा गाः । 'इणो गा लुङि' इति गादेशः । ननु निःस्पृहस्य ममाकिञ्चित्करः प्रमाद इति वाच्यमित्याशङ्क्याह—मात्सर्येति । मत्सर एव मात्सर्यं द्वेषो रागः स्नेहस्ताभ्यामुपहतात्मनां रागद्वेषदूषितस्वभावानां मानसानि मनांसि साधुषु सज्जनेष्वपि विषये स्खलन्ति विकुर्वते हि । अत्र प्रमादनिषेधलब्धाप्रमादरूपकारणेनार्थप्राप्तिरूपकार्यस्य व्यतिरेककारणसमर्थनाद्वैधर्म्येण कार्यकारणसमर्थनरूपोऽर्थान्तरन्यासः ॥

सुबो०—असंबाधशिवे (असंकटे निर्विघ्ने) अपि देशे (स्थाने) चिराय (बहुकालम्) एकचरः (एकाकी) वसन् (वासंकुर्वन्) प्रमादम् (अनवधानतां) मा गाः (न प्राप्नुहि) । मात्सर्य्यरागोपहतात्मनां (विद्वेषानुरागदूषितस्वभावानां) मानसानि (मनांसि) साधुषु (सज्जनेषु) अपि स्खलन्ति (विकृतानि भवन्ति) हि (निश्चितम्) ।

समा०—एकचरः = चरतीति चरः ( पचाद्यच् ) एकश्चासौ चरश्चेति । असंबाधशिवे = नास्ति संबाधः ( संकटं ) यस्मिन् तत् असंबाधम्, असंबाधं च तत् शिवं चेति तत् तस्मिन् । मात्सर्य्यरागोपहतात्मनाम् = मात्सर्य्यं च रागश्च, ताभ्याम् उपहतः आत्मा येषां तेषाम् । 'आत्मा पुंसि स्वभावे च प्रयत्नमनसोरपि । धृतावपि मनीषायां शरीरब्रह्मणोरपि ॥' इति मेदिनी ।

व्या०—मा गाः=इ+लुङ्। स्खलन्ति=स्खल लट्।

वाच्य०—एकचरेण वसता त्वया प्रमादः मा गायि मानसैः स्खल्यते।

सरलार्थः—निर्भये निर्विघ्ने स्थानेऽपि एकाकिना चिरं वसता त्वया सदा तथा सावधानेन भवितव्यम्, यथा कश्चित् हिंस्रजन्तुः कामिनीजनो वा तपोविघ्नं न कुर्य्यात्। यतो रागद्वेषदूषितचेतसो अकामिनामपि अहिंसकानामपि च प्रलोभनेन हिंसया च अहितमाचरन्ति ॥ ५३ ॥

तदाशु कुर्वन्वचनं महर्षे-
र्मनोरथान्नः सफलीकुरुष्व।
प्रत्यागतं त्वाऽस्मि कृतार्थमेव
स्तनोपपीडं परिरब्धुकामा ॥ ५४ ॥

अन्वयः—तत् आशु महर्षेः वचनं कुर्वन् नः मनोरथान् सफलीकुरुष्व। कृतार्थं प्रत्यागतम् एव त्वा स्तनोपपीड़ं परिरब्धुकामा अस्मि।

तदिति ॥ तत्तस्मात्कारणात्। आशु शीघ्रं महर्षेर्वचनं कुर्वन्। तपस्यन्नित्यर्थः। नोऽस्माकं मनोरथान्सफलीकुरुष्व। अरिनिर्यातनेनास्मान्प्रतिष्ठापयेत्यर्थः। प्रार्थनायां लोट्। किञ्च कृतार्थं कृतकृत्यं प्रत्यागतमेव त्वा त्वाम्। 'त्वामौ द्वितीयायाः' इति त्वादेशः। स्तनयोरुपपीड्य स्तनोपपीडम्। 'सप्तम्यां चोपपीडरुधकर्षः' इति णमुल्। परिरब्धुं कामो यस्याः सा परिरब्धुकामास्मि। आलिङ्गितुमिच्छामीत्यर्थः। 'तुंकाममनसोरपि' इति मकारलोपः। प्राकार्यसिद्धेः प्रमदालिङ्गनमपि न प्रीतिदमिति भावः ॥

सुबो०—तत् ( तस्माद्धेतोः ) आशु ( शीघ्रं ) महर्षेः व्यासस्य ) वचनं ( तपश्चरणरूपमादेशवाक्यं ) कुर्वन् ( पालयन् ) नः ( अस्माकं ) मनोरथान् ( शत्रुविजयरूपान् अभिलाषान् ) सफलीकुरुष्व ( सफलान् कुरु )। कृतार्थं ( साधितकार्य्यं सन्तं ) प्रत्यागतं ( पुनरागतम् ) एव त्वा ( त्वां ) स्तनोपपीड़ं (स्तनद्वय-

मुपपीड्य, गाढ़मित्यर्थः) परिरब्धुकामा (आलिङ्गितुमभिलाषिणी) अस्मि ( अहं भवामि ) ॥

समा०—कृतार्थम् = कृतः अर्थः ( प्रयोजनं, कार्य्यं ) येन तम् । 'अर्थोऽभिधेयरेवस्तुप्रयोजननिवृत्तिषु इत्यमरः । परिरब्धुकामा = परिरब्धुं कामः यस्याः सा । लुम्पेदवश्यमः कृत्ये तुम् काममनसोरपि, ।

व्या—सफलीकुरुष्व = असफलान् सफलान् सम्पद्यमानान् कुरुष्व इति च्विः, स्तनोपपीड़म् = स्तनौ उपपीड्य इति उप = पीड़ + णमुल् । परिरब्धुम् = परि–रभ + तुम् ।

वाच्य०—कुर्वता त्वया नो मनोरथा; सफलीक्रियन्ताम् । मया परिरब्धुकामया भूयते ।

सरलार्थः—ततोऽस्मन्मनोरथपूरणार्थं महर्षेः वचनात् तपश्चरितुं गच्छ । कृतकृत्यं सन्तं प्रत्यागतं त्वामहं गाढ़मालिङ्गिष्यामि ॥५४॥

उदीरितां तामिति याज्ञसेन्या
नवीकृतोद्ग्राहितविप्रकाराम् ।
आसाद्य वाचं स भृशं दिदीपे
काष्ठामुदीचीमिव तिग्मरश्मिः ॥ ५५ ॥

अन्वयः—सः इति याज्ञसेन्या उदीरितां नवीकृतोद्ग्राहितविप्रकारां तां वाचम् आसाद्य उदीचीं काष्ठाम् आसाद्य तिग्मरश्मिः इव भृशं दिदीपे ।

उदीरितामिति ॥ सोऽर्जुन इतीत्थं यज्ञसेनस्यापत्येन स्त्रिया याज्ञसेन्या द्रौपद्योदीरितामुक्ताम् । नवीकृत पुनरुद्घाटनेन तथा प्रत्यायितोऽत एवोद्ग्राहितो मनसि निधापितश्च विप्रकारः परिभवो यया सा तां वाचमासाद्य । आकर्ण्येत्यर्थः । उदीचीं काष्ठां दिशम् । 'दिशस्तु ककुभः काष्ठा आशाश्च हरितश्च ताः' इत्यमरः । तिग्मरश्मिरिव । भृशं दिदीपे जज्वाल । चुक्रोधेत्यर्थः ॥

सुबो०—सः ( अर्जुनः ) इति ( उक्तरूपां ) याज्ञसेन्या ( द्रौपद्या ) उदीरिताम् ( उक्तां ) नवीकृतोद्ग्राहितविप्रकारां

( पुनरुत्थापनेन नवीकृतः नूतनवत् कृतः उद्ग्राहितः अर्जुनस्य हृदये आहितश्च विप्रकारः शत्रुकृतोऽभिभवो यया तथाविधां ) तां वाचं ( वाक्यम् ) आसाद्य ( प्राप्य, श्रुत्वा ) उदीचीम् (उत्तरां) काष्ठां ( दिशम् ) आसाद्य तिग्मरश्मिः ( सूर्य्यः ) इव भृशम् ( अत्यन्तं ) दिदीपे ( जज्वाल )।

समा०—नवीकृतोद्ग्राहितविप्रकाराम् = अनवः नवः सम्पद्यमानः कृतः नवीकृतः ( च्विः ) नवीकृतः उद्ग्राहितश्च विप्रकारो यया ताम्। तिग्मरश्मिः तिग्माः रश्मयो यस्य सः।

व्या०—उदीरिताम् = उद्-ईर + णिच् + क्त। याज्ञसेन्या = यज्ञसेनस्य ( द्रुपदस्य ) अपत्यं स्त्री याज्ञसेनी ( अण् ) उद्ग्राहित = उद्-ग्रह् + णिच् + क्त। आसाद्य = आङ्-सद् + णिच्+ल्यप्। दिदीपे = दीप + लिट्। उदीचीम् = उद्-अञ्च + क्विप् = उदच् + ङीप्।

वाच्य०—तिग्मरश्मिना इव तेन दिदीपे।

सरलार्थः—द्रौपद्या वचनमाकर्ण्य अर्जुनस्य मनसि शत्रुकृतपरिभवो नूतनतामापद्यमानस्तमुत्तेजयामास ॥ ५५ ॥

अथाभिपश्यन्निव विद्विषः पुरः
पुरोधसारोपितहेतिसंहतिः।
बभार रम्योऽपि वपुः स भीषणं
गतः क्रियां मन्त्र इवाभिचारिकीम् ॥ ५६ ॥

अन्वयः—अथ विद्विषः पुरः अभिपश्यन् इव पुरोधसा आरोपितहेतिसंहतिः सः रम्यः ( सन् ) अपि आभिचारिकीं क्रियां गतः मन्त्रः इव भीषणं वपुः बभार।

अथेति ॥ अथ विद्विषः शत्रून्पुरोऽभिपश्यन्निव स्थितस्तथा पुरोधसा धौम्येनारोपिता समन्त्रमाहिता हेतिसंहतिरायुधकलापो यस्य स तथोक्तः। 'हेतिर्ज्वालाङ्कुरायुधे' इति वैजयन्ती। सोऽर्जुनो रम्यः सौम्यः सन्नपि। अभिचारः परहिंसा प्रयोजनं यस्याः साभिचारिकी। 'प्रयोजनम्' इति ठञ्। तां क्रियां गतः। अभिचारकर्माणि

नियुक्त इत्यर्थः । मन्त्र इव । रम्यः प्रकृत्या रमणीयः । भीषयत इति भीषणम् । नन्द्यादित्वाल्ल्युप्रत्ययः । वपुर्बभार । प्रशान्तो मन्त्रः प्रयोगभेदादिव । सोऽप्यवस्थाभेदाद्भीषणो बभूवेत्यर्थः ॥

सुबो०—अथ ( दीपनानन्तरं ) विद्विषः ( शत्रून् ) पुरः ( अग्रे ) अभिपश्यन् ( आभिमुख्येन पश्यन् ) इव स्थितः, पुरोधसा ( पुरोहितेन धौम्येन ) आरोपितहेतिसंहतिः ( मन्त्रपाठपूर्वकम् आयुधसमूहं ग्राहितः ) सः ( अर्जुनः ) रम्यः ( स्वभावतः सौम्यमूर्त्तिः सन् ) अपि आभिचारिकीं ( मारणोच्चाटनादिसाधनभूतां ) क्रियां गतः ( प्राप्तः, तत्तत्क्रियायां प्रयुक्त इत्यर्थः ) मन्त्र इव भीषणं ( भयंकरं ) वपुः ( मूर्त्तिं ) बभार ( धारयामास ) ।

समासः—आरोपितहेतिसंहतिः = हेतीनां संहतिः हेतिसंहतिः, आरोपिता हेतिसंहतिः यस्मिन् सः ।

व्या०—पुरोधसा = पुरोधीयतेऽसौ इति पुरस्-धा + असुन् । आरोपित = आङ्-रुह+णिच् + क्त । बभार = भृ + लिट् । भीषणम् = भी + णिच् + ल्यु । आभिचारिकीम् = अभिचारः प्रयोजनमस्येति ठञ् ।

वाच्य०—पुरः विद्विषः अभिपश्यता इव पुरोधसारोपितहेतिसंहतिना तेन रम्येणापि आभिचारिकीं क्रियां गतेन मन्त्रेणेव भीषणं वपुः बभ्रे ।

सरलार्थः—स्वभावतः सौम्यमूर्त्तिः सन्नपि अर्जुनः प्रयाणकाले पुरोहितेन मन्त्रपूतान्यायुधानि धारयन् द्रौपदीवचनेनोत्तेजितः शत्रून् अभिमुखागतान् पश्यन्निव भीषणां मूर्त्तिं दधार॥५६॥

अथ प्रस्थानं विवृणोति त्रिभिः—

अविलङ्घ्यविकर्षणं परैः
प्रार्थितज्यारवकर्म कार्मुकम् ।
अगतावरिदृष्टिगोचरं
शितनिस्त्रिंशयुजौ महेषुधी ॥ ५७ ॥

यशसेव तिरोदधन्मुहु-
र्महसा गोत्रभिदायुधक्षतीः ।
कवचं च सरत्नमुद्वह-
ज्ज्वलितज्योतिरिवान्तरं दिवः ॥ ५८ ॥
अलकाधिपभृत्यदर्शितं
शिवमुर्वीधरवर्त्म संप्रयान् ।
हृदयानि समाविवेश स-
क्षणमुद्बाष्पदृशां तपोभृताम् ॥ ५९ ॥

अन्वयः—परैः अविलङ्घ्यविकर्षणं प्रथितज्यारवकर्म्म कार्मुकम्, अरिदृष्टिगोचरम् अगतौ शितनिस्त्रिंशयुजौ महेषुधी, गोत्रभिदायुधक्षतीः यशसा इव महसा मुहुः तिरोदधत् सरत्नं ज्वलितज्योतिः दिवः अन्तरम् इव कवचं च उद्वहन् सः अलकाधिपभृत्यदर्शितं शिवम् उर्वीधरवर्त्म संप्रयान् क्षणम् उद्बाष्पदृशां तपोभृतां हृदयानि समाविवेश ।

अविलङ्घ्येति ॥ परैः शत्रुभिरविलङ्घ्यमनतिक्रमणीयं विकर्षणं यस्य तत् । अमोघाकर्षणमित्यर्थः किञ्च प्रथितो ज्यारवो गुणध्वनिः कर्म बाणमोक्षणादिकं च यस्य तत्कार्मुकं चोद्वहन्नित्यन्वयः । तथारीणां दृष्टिगोचरं दृष्टिपथमगतौ । आहवेष्वनिवर्तित्वादस्येति भावः । निर्गतस्त्रिंशतोऽङ्गुलिभ्यो निस्त्रिंश खड्गः डप्रत्यये संख्यायास्तत्पुरुषस्योपसंख्यानात्समासान्तः । तेन शितेन तीक्ष्णेन युक्त इति शितनिस्त्रिंशयुजौ । 'सत्सूद्विष-' इत्यादिना क्विप् । महेषुधी महानिषङ्गौ । इषवो धीयन्तेऽनयोरिति विग्रहः । कर्मण्यधिकरणे च' इति किप्रत्ययः । 'तूणोपासङ्गतूणीरनिषङ्गा इषुधिर्द्वयोः । तूण्यां खड्गे तु निस्त्रिंशचन्द्रहासासिरिष्टयः ॥' इत्यमरः ॥

यशसेति ॥ किञ्च । गोत्रभिद इन्द्रस्यायुधक्षतीर्वज्रप्रहाररध्वाणि । खाण्डवदाहसम्भवादिति भावः । महसा स्वकान्त्या यशसेव मूर्तया कीर्त्येव मुहुस्तिरोदधदाच्छादयन् । सरत्नं रत्नसहितमत एव ज्वलितज्योतिर्दीप्ततारकम् । 'ज्योतिस्तारागिनिभाज्वाला दृक्पुत्रार्थधरात्मसु' इति वैजयन्ती । दिवोऽन्तरं नभोमध्यमिवाव-

स्थितम् । 'अन्तरं परिधानीये बाह्ये स्वीयेऽन्तरात्मनि । क्लीबे मध्ये प्रकाशे च' इति वैजयन्ती । कवचं चोद्वहन् ॥

अलकेति ॥ सोऽर्जुनोऽलकाधिपभृत्येन यक्षेण दर्शितमतः शिवं निर्बाधमुर्वीधरवर्त्म हिमवन्मार्गं प्रति सम्प्रयान्प्रगच्छन् । क्षणमुद्वाष्पदृशां वियोगदुःखात्साश्रुनेत्राणां तपोभृतां द्वैतवननिवासिनां तपस्विनां हृदयानि समाविवेश । खेदयामासेत्यर्थः ॥

सुबो०—परैः ( शत्रुभिः ) अविलङ्घ्यविकर्षणम् ( अनतिक्रमणीयाकर्षणम्, अव्यर्थाकर्षणमित्यर्थः ) प्रथितज्यारवकर्म्म ( प्रथितो विख्यातः ज्यारवः मौर्वीशब्दः टङ्कार इत्यर्थः, कर्म्म बाणमोक्षणरूपं कार्य्यं च यस्य तथाभूतं ) कार्म्मुकं ( धनुः ) तथा अरिदृष्टिगोचरम् अगतौ ( कदापि रणे पृष्ठप्रदर्शनाभावात् शत्रूणां चक्षुर्विषयम् अप्राप्तौ ) शितनिस्त्रिंशयुजौ ( तीक्ष्णखड्गयुक्तौ, तीक्ष्णखड्गगर्भकोपद्वयेन सह पृष्ठविलम्बितौ इत्यर्थः ) महेषुधी ( महान्तौ तूणौ ), तथा गोत्रभिदायुधक्षतीः ( खाण्डवदाहसमये गोत्रभिद इन्द्रस्य आयुधेन वज्रेण कृताः याः क्षतयः रन्ध्रा ताः ) यशसा ( मूर्त्तिमत्या कीर्त्या ) इव महसा ( स्वकीयया कान्त्या मुहुः तिरोदधत् ( आच्छादयत्—सूर्य्यस्य रन्ध्राणि यथा तदीयतेजःप्रभावेण न लक्ष्यन्ते तथा इन्द्रादन्यस्य कस्यापि प्रहरणप्रहारजनितस्य यशसः प्रभारूपेणैव वर्तमानतया यस्य रन्ध्राणि न लक्ष्यन्ते तथाविधं ) सरत्नं (हीरकादिमणिखचितम्) अतएव ज्वलितज्योतिः ( दीप्ततारकं ) दिवः अन्तरम् ( आकाशस्य मध्यभागम् ) इव कवचं ( वर्म्म ) च उद्वहन् ( धारयन् ) सः ( अर्जुनः ) अलकाधिपभृत्यदर्शितं ( कुबेरानुचरेण प्रदर्शितं ) शिवं ( निर्विघ्नम् ) उर्वीधरवर्त्म ( हिमाचलमार्गं )संप्रयान् (गच्छन् ) क्षणं ( कियन्तं कालं व्याप्य ) उद्वाष्पदृशां (साश्रुनयनानां) तपोभृतां ( द्वैतवनवासिनां तपस्विनां ) हृदयानि ( मनांसि ) समाविवेश ( प्रविष्टवान् ) व्याकुलीचकार इत्यर्थः ॥

समा०—अविलङ्घ्यविकर्षणम्=न विलङ्घ्यम् अविलङ्घ्यम्, अविलङ्घ्यं, विकर्षणं यस्य तत्। प्रथितज्यारवकर्म्म=ज्याया रवः ज्यारवः, ज्यारवश्च कर्म्म च ज्यारवकर्मणी, प्रथिते ज्यारवकर्मणी यस्य तत्। अरिदृष्टिगोचरम्=अरीणां दृष्टयः, तासां गोचरः (विषयः) तम्। शितनिस्त्रिंशयुजो=निर्गतः त्रिंशतः (अङ्गुलिभ्यः) इति निस्त्रिंशः, शितः निस्त्रिंशः, तेन युज्यन्ते, (युज समाधौ क्विन्)। महेषुधी=इषवः (बाणाः) धीयन्ते (स्थाप्यन्ते, अनयोरिति इषुधी (धा+कि) महान्तौ इषुधी तौ। गोत्रभिदायुधक्षतीः=गोत्रान् (पर्वतान्) भिनत्ति इति गोत्रभित् (भिद्+क्विप्), तस्य आयुधम्, तस्य क्षतयः ताः। सरत्नम्=रत्नैः सह वर्त्तमानं तत्। ज्वलितज्योतिः=ज्वलितानि ज्योतींषि यस्मिन् तत्। अलकाधिपभृत्यदर्शितम्=अलकायाः अधिपः, तस्य भृत्यः, तेन दर्शितं तत्। कुबेरमुपक्रम्य "अस्योद्यानं चैत्ररथं पुत्रस्तु नलकूबरः। कैलासः स्थानमलका पूर्विमानं तु पुष्पकम्"। इत्यमरः। उर्वीधरवर्त्म=उर्व्याः (मह्याः) धरः उर्वीधरः (पर्वतः) तस्य वर्त्म (पन्थाः) तत्। 'महीध्रे शिखरिक्ष्माभृदहार्य्यधरपर्वताः' इत्यादि, 'अयनं वर्त्म मार्गाध्वपन्थानः पदवी सृतिः' इति चामरः। उद्बाष्पदृशाम्=उद्गतानि बाष्पाणि याभ्यः ताः उद्बाष्पाः, उद्बाष्पाः दृशः (नेत्राणि) येषां तेषाम्। 'लोचनं नयनं नेत्रमीक्षणं चक्षुरक्षिणी। दृग्दृष्टी' चेत्यमरः। 'बाष्पमुष्मांश्रु' इत्यमरः। तपोभृताम्=तपः बिभ्रति ये तेषाम्।

व्या०—शित=शो+क्त। तिरोदधत्=तिरस्-धा+शतृ। उद्वहन्=उद्-वह+शतृ। संप्रयान्=सम्-प्र-या+शतृ। समाविवेश=सम्-आङ्-विश+शतृ।

वाच्य०—उद्वहता संप्रयता तेन तपोभृतां हृदयानि समाविविशिरे।

सरलार्थः—धनुः खड्गं तूणीरे कवचं च धृत्वा यक्षप्रदर्शितेन पथा हिमाचलं गच्छन्तमर्जुनं दृष्ट्वा द्वैतवनवासिनां मुनीनामपि मनांसि व्याकुलान्यभवन्। ५७—५८—५९

प्रयाणकाले सुनिमित्तान्याह—

अनुजगुरथ दिव्यं दुन्दुभिध्वानमाशाः
सुरकुसुमनिपातैर्व्योम्नि लक्ष्मीर्वितेने ।
प्रियमिव कथयिष्यन्नालिलिङ्ग स्फुरन्तीं
भुवमनिभृतवेलावीचिबाहुः पयोधिः ॥ ६० ॥

इति भारविकृतौ महाकाव्ये किरातार्जुनीये
तृतीयः सर्गः ।

अन्वयः—अथ आशाः दिव्यं दुन्दुभिध्वानम् अनुजगुः । व्योम्नि सुरकुसुमनिपातैः लक्ष्मीः वितेने । अनिभृतवेलावीचिबाहुः पयोधिः स्फुरन्तीं भुवं प्रियं कथयिष्यन् इव आलिलिङ्ग ।

अनुजगुरिति ॥ अथाशा दिशः । दिवि भवं दिव्यम् । 'दिवादिभ्यो यत्' । दुन्दुभिध्वानमनुजगुरनुदध्वनुः । गायतेर्लिट् । व्योम्नि सुरकुसुमनिपातैर्लक्ष्मीर्वितेने । पुष्पवृष्टिश्चाजनिष्टेत्यर्थः । किञ्च । अनिभृताश्चञ्चला वेलायां कूले या वीचयस्ता एव बाहवो यस्य स तथोक्तः । 'वेला कूलविकारयोः' इति शाश्वतः । पयोधिः स्फुरन्तीमुल्लसन्तीं हर्षात्स्पन्दमानां च भुवं प्रियमिष्टं भारावतारणरूपं कथयिष्यन्निव । कथयितुमिवेत्यर्थः । 'लृट् शेषे च' इति चकारात्क्रियार्थायां क्रियायां लृट् । आलिलिङ्ग । सर्वं चेदं शिवं दैवकार्यप्रवृत्तत्वादस्येति भावः । अत्र विशेषणमात्रसाम्यादप्रस्तुतस्य गम्यत्वात्समासोक्तिरलङ्कारः । तत्र चाप्रस्तुतयोर्भूमिसमुद्रयोः प्रतिपन्नाभ्यां नायकाभ्यां भेदेऽभेदलक्षणातिशयोक्तिवशादालिङ्गनोक्तिरिति रहस्यम् । एवमतिशयोक्त्यनुप्राणिता समासोक्तिः । प्रियकथनात्स्नेहवज्जीवयति तदङ्गभावं भजत इत्युभयोरङ्गाङ्गिभावेन सङ्कर इति विवेचनीयम् ॥

इति श्रीमहामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां
किरातार्जुनीयकाव्यव्याख्यायां घण्टापथसमाख्यायां
तृतीयः सर्गः समाप्तः ।

सुबो०—अथ (अर्जुनस्य प्रयाणानन्तरम्) आशाः (दिशः) दिव्यं (स्वर्गीयं) दुन्दुभिध्वानं (दुन्दुभिध्वनिम्) अनुजगुः (अनुध्वनितवत्यः—देववादितदुन्दुभिध्वनेः प्रतिध्वनिं चक्रुरित्यर्थः)। व्योम्नि ( आकाशे ) सुरकुसुमनिपातैः ( देवगणकृतपुष्पवर्षणैः ) लक्ष्मीः ( शोभा ) वितेने ( विस्तीर्णा ) अनिभृतवेलावीचिबाहुः ( अनिभृताः अस्थिराः याः वेलायां कूले वीचयः तरङ्गाः ता बाहवो यस्य तथाभूतः ) पयोधिः ( समुद्रः ) स्फुरन्तीम् ( उल्लसन्तीं ) भुवं ( पृथिवीं ) प्रियं ( भारहरणरूपं प्रीतिकरं वचनं ) कथयिष्यन् ( कथयितुम् ) इव आलिलिङ्ग ( परिषस्वजे )।

सभा०—दुन्दुभिध्वानम् = दुन्दुभेः ध्वानः तम्। सुरकुसुमनिपातैः = कुसुमानां निपाताः = कुसुमनिपाताः = सुराणां कुसुमनिपाताः, तैः। अनिभृतवेलावीचिबाहुः = वेलायां वीचयः, = वेलावीचयः, अनिभृताः वेलावीचयः, ता एव बाहवो यस्य सः। 'निभृतविनीतप्रश्रिताः समाः' इत्यमरः। 'भङ्गस्तरङ्ग ऊर्मिर्वा स्त्रियां वीचिः' इत्यमरः।

व्या०—अनुजगुः = अनु–गै + लिट्। वितेने = वि–तन + कर्म्मणि लिट्। आलिलिङ्ग = आङ् + लिङ्ग + लिट्।

वाच्य०—आशाभिः दिव्यः दुन्दुभिध्वानः अनुजगे। सुरकुसुमनिपाताः लक्ष्मीं वितेनुः। प्रियमिव कथयिष्यता अनिभृतवेलावीचिबाहुना पयोधिना स्फुरन्ती भूः आलिलिङ्गे।

सरलार्थः—अर्जुनस्य प्रयाणकाले देवदुन्दुभयो नेदुः, पुष्पवर्षाणि पेतुः, समुद्रोऽपि उद्वेलो बभूव ॥ ६० ॥

इति श्रीपाठकोपाह्वगौरीनाथशर्म्मविरचितसुबोधिन्याख्यया व्याख्यया सरलार्थया च सहिते महाकाव्ये किरातार्ज्जुनीये तृतीयः सर्गः।

## आख्यानसंक्षेपः ।

# प्रथमः सर्गः ।

युधिष्ठिरनियोगात् कश्चिद्वनेचरो दुर्य्योधनस्य चरितं सम्यग् विदित्वा द्वैतवनं प्रत्याजगाम ततो युधिष्ठिरं प्रणम्य प्रोवाच। भवतः प्रियमप्रियं वा भवतु सर्वथा सत्यवचनमेव कथयामि श्रूयताम् । स दुर्य्योधनश्छलेन भवदीयराज्यमात्मसात्कृत्वा इदानीं नयेन सर्वेषामनुरञ्जनं कर्त्तुं यतते। तथाहि अनलसः सन् सर्वाणि कर्माणि यथासमयं करोति । अमात्यादिषु बन्धुवद् व्यवहरति । अन्यान् राज्ञः सामदानाभ्यां वशीकरोति। रिपौ सुते च अपक्षपातं यथापराधं दण्डं प्रणयति। युद्धार्जितानर्थान् सैन्येभ्य एव वितरति। गुणानुरक्ताः सर्वे राजानः प्रतिदिनं तस्मै नानोपायनानि प्रयच्छन्ति, सैन्याश्चैकमत्यमालम्ब्य तस्य विजयं साधयन्ति । आप्तचरैः स सर्वेषां राज्ञां चेष्टितान्यवगच्छति। दुःशासनं यौवराज्येऽभिषिच्य स्वयमनासक्त इव भोगेषु सततं यज्ञादिकमनुतिष्ठति। एवमाचरन्नप्यसौ भवतो विभेत्येव । अत आशु प्रतिक्रियां कर्त्तुमर्हति भवान् ।

एवमुक्त्वा प्रस्थिते वनेचरे युधिष्ठिरो द्रौपद्या भवनं प्रविश्य तत्र सर्वान् भ्रातॄनाहूय सर्वमकथयत् ।

तदाकर्ण्य द्रौपद्युवाच। विज्ञतमं त्वां प्रति अज्ञाया मम उपदेशवचनं यद्यपि नोचितं तथापि दुःखाकुलाहं किंचित् कथयामि । ये शठेषु शाठ्यं न समाचरन्ति ते नाशं प्राप्नुवन्ति। त्वदन्यो न कोऽपि नीरवः सन् शत्रवे राज्यं ददाति । शत्रुकृतमेवं दुःसहं परिभवं प्राप्यापि कथं ते क्रोधो न जायते। क्रोधहीनं राजानं न कोऽपि संमानयति। महावीराणां भ्रातॄणाम् स्वस्य च ईदृशीं दुर्गतिं दृष्ट्वा कथं ते मन्युर्न ज्वलति। अतोऽहमनुनयामि शत्रूणां वधाय यतस्व। अथ यदि क्षमामेवावलम्बसे तदा कार्मुकं परित्यज्य इह वने तपश्चर।

## द्वितीयः सर्गः ।

द्रौपद्या वचनं समर्थयन् भीमसेन उवाच । द्रौपद्या यद् यद् उक्तं तत् सर्वं समीचीनं मन्ये । तदनुसारेण भवताऽऽचरितव्यम् । सर्वविद्यापारदर्शिनस्तव कथमीदृशो बुद्धिविपर्य्ययो जातः । द्विषतामभ्युदयो न सोढव्यः । अचिरेण आत्मपौरुषं प्रकाशय । समयपरिपालने तदायत्तं राज्यं कथमपि ग्रहीतुं समर्थो न भविष्यसि ।

इत्युक्तवन्तं भीमं युधिष्ठिरः प्रत्याह । सहसा किमपि कार्य्यं न कर्त्तव्यम् । क्रोधवशेन परिणाममविचिन्त्य कार्यकरणे सिद्धिर्न भविष्यति । अतः समयपरिपालनं कर्त्तव्यमेव अन्यथा ये राजानोऽस्मत्पक्षपातिनो वर्त्तन्ते, तेषामपि वयं विरागभाजनानि भविष्यामः । योऽन्तःशत्रुं क्रोधं जेतुमसमर्थः स कथं बहिःशत्रून् जेतुं शक्नुयादिति ।

अत्रान्तरे वेदव्यासः सहसा तत्रागतः । तं दृष्ट्वोत्थाय सत्कृत्य च राजा आसनं ददौ ।

## तृतीयः सर्गः ।

सुखोपविष्टं मुनिं महीपतिरागमनकारणं पप्रच्छ । ततो मुनिरुवाच । यद्यपि धार्त्तराष्ट्राः पाण्डवाश्च यूयं सर्व एव मे समानाः, तथापि तेषामधार्म्मिकत्वं युष्माकं धार्मिकत्वं च दृष्ट्वा युष्मास्वेव मे पक्षपातो जातः । अतो हितोपदेशं दातुं युष्मत्सकाशमागतोऽस्मि । विक्रमेण त्वया पृथिवी लभ्या । किन्तु भीष्मद्रोणकर्णादीन् विक्रमेण जेतुं न कोऽपि समर्थः । अतस्तेभ्योऽधिकतरविक्रमलाभार्थमर्जुनेन साम्प्रतं तपश्चरितव्यमिति । तदर्थमर्जुनाय मन्त्रं दास्यामीति । ततो युधिष्ठिरानुमतोऽर्जुनो वेदव्यासान्मन्त्रं गृहीतवान् । अथ हिमाचलस्य यस्मिन् प्रदेशे तपश्चरितव्यं तत्र नयनाय इदानीमेव यक्ष एक आगमिष्यतीत्युक्त्वा अन्तर्हिते व्यासे यक्षस्तत्राजगाम । ततो युधिष्ठिरादयोऽर्जुनविरहदुःखेन कातरा बभूवुः, सर्वापेक्षया अधिकं द्रौपदी । तथापि द्रौपदी तमुवाच । शत्रुकृतं दुर्विषहं परिभवं संस्मृत्य अस्मदर्थं व्याकुलो मा भूः । भगवानिन्द्रोऽस्मान् रक्षिष्यति । त्वमप्रमत्तः सन् तपःसिद्धये यतस्वेति ।

अथार्जुनो धनुर्बाणासिकवचानि धारयन् यक्षेण सह हिमाचलं प्रस्थितः ।

## सर्गत्रयस्थित-सुभाषितानि ।

### प्रथमसर्गे

न हि प्रियं प्रवक्तुमिच्छन्ति मृषा हितैषिणः ॥ २ ॥
हितं मनोहारि च दुर्लभं वचः ॥ ४ ॥
समुन्नयन् भूतिमनार्य्यसंगमाद् वरं विरोधोऽपि समं महात्मभिः ८
प्रतीयते धातुरिवेहितं फलैः ॥ २० ॥
अहो दुरन्ता बलवद्विरोधिता ॥ २३ ॥
व्रजन्ति ते मूढ़धियः पराभवं भवन्ति मायाविषु ये न मायिनः ३०
विचित्ररूपाः खलु चित्रवृत्तयः ॥ ३७ ॥
परैरपर्य्यासितवीर्य्यसंपदां पराभवोऽप्युत्सव एव मानिनाम् ४१

### द्वितीयसर्गे

स तु तत्र विशेषदुर्लभः सदुपन्यस्यति कृत्यवर्त्म यः ॥ ३ ॥
ननु वक्तृविशेषनिःस्पृहा गुणगृह्या वचने विपश्चितः ॥ ५ ॥
न महानिच्छति भूतिमन्यतः ॥ १८ ॥
अभिभूतिभयादसूनतः सुखमुज्झन्ति न धाम मानिनः २०
प्रकृतिः खलु सा महीयसः सहते नान्यसमुन्नतिं यया ॥ २१ ॥
सहसा विदधीत न क्रियाः अविवेकः परमापदां पदम् ॥ ३० ॥
शुचि भूषयति श्रुतं वपुः ॥ ३२ ॥
अविभिद्य निशाकृतं तमः प्रभया नांशुमताऽप्युदीयते ॥ ३६ ॥
असुरक्षा हि बहुच्छलाः श्रियः ॥ ३९
न तितिक्षासममस्ति साधनम् ॥ ४३ ॥
सहते न जनोऽप्यधःक्रियां किमु लोकाधिकधाम राजकम् ॥४७॥
विपदन्ता ह्यविनीतसंपदः ॥ ५२ ॥

### तृतीयसर्गे

भवन्ति भव्येषु हि पक्षपाताः ॥ १२ ॥
मोहं विधत्ते विषयाभिलाषः ॥ १३ ॥
प्रकर्षतन्त्रा हि रणे जयश्रीः ॥ १७ ॥
विश्वासयत्याशु सतां हि योगः ॥ ३१ ॥
निरुत्सुकानामभियोगभाजां समुत्सुकेवाङ्कमुपैति सिद्धिः ॥४०॥
मात्सर्य्यरागोपहतात्मनां हि स्खलन्ति साधुष्वपि मानसानि ५३

# विक्रेयाणि संस्कृतपुस्तकानि ।

(१) किरातार्जुनीय—सर्गत्रयात्मक सुबोधिनी स० ... मू० ।।।)
(२) रघुवंश महाकाव्य द्वितीयादिपंचमसर्गपर्यन्त सुबोधिनी व्याख्यापेत ... ... ... ,, ।।।=)
(३) मेघदूतकाव्य परीक्षोपयोगी सुबोधिनी स० ... ,, ।।)
(४) श्रुतबोध सान्वय सोदाहरण सुबोधिनी स० ... ,, =)
(५) मेघदूतकाव्य—मल्लिनाथी टीका ... ... ,, ।।-)
(६) तर्कसंग्रह—न्यायबोधिनी पदकृत्य सहित ... ,, ।≡)
(७ समासचक्र .. ... ... ... ... ,, -)
(८) अमरकोष शब्दानुक्रमसहित ... ... ,, ।।=)
(९) ,, मूलमात्र ... ... ... ,, ।।)
(१० ,, प्रथमकाण्ड ... ... ... ,, =)
(११ दुर्गासप्तशती—मूल बड़े अक्षरों में खुले पत्रे की ,, ।।।=)
(१२) ,, ,, सजिल्द ... ,, १।)
(१३) ,, ६४ पेजी गुटका मुसाफिरीयोग्य... ,, ।=)
(१४) श्रीमद्भगवद्गीता—अत्यन्त बड़े अक्षरों में कपड़े की जिल्द सहित .. ... ... ... ,, १)
(१५) श्रीमद्भगवद्गीता—अत्यन्त बड़े अक्षरों में कागज की जिल्द ... ... .. ... ... ,, ।।।)
(१६) विवाहवृन्दावन—सान्वय भा० टी० ... ... ,, १।।)
(१७) वृहज्जातक—सोदाहरण भा० टी० रफ ... ... ,, २)
(१८) ,, ,, ,, ग्लेज ... ,, २।।)
(१९) अहिवलचक्र—भाषाटीका ... .... ... ,, =)
(२०) वृहत्स्तोत्र रत्नाकर—बड़े अक्षरों का ... ... ,, १।)
(२१) हवनात्मक—महारुद्र .... ... ... ... ,, ।।)
(२२) साङ्गप्रणवकल्प—( संन्यासियों को परमोपयोगी ) ,, =)

पुस्तक प्राप्तिस्थान—

माष्टर खेलाड़ीलाल संस्कृत बुकडिपो,
कचौड़ीगली बनारस सिटी ।

Registered under Act. XXV of 1867.